# संस्कृत
# Sanskrit

## कक्षा / Class X
## 2025-26

## विद्यार्थी सहायक सामग्री
## Student Support Material




केन्द्रीय विद्यालय संगठन~Kendriya Vidyalaya Sangathan

# संदेश

विद्यालयी शिक्षा में शैक्षिक उत्कृष्टता प्राप्त करना एवं नवाचार द्वारा उच्च – नवीन मानक स्थापित करना केन्द्रीय विद्यालय संगठन की नियमित कार्यप्रणाली का अविभाज्य अंग है। राष्ट्रीय शिक्षा नीति 2020 एवं पी. एम. श्री विद्यालयों के निर्देशों का पालन करते हुए गतिविधि आधारित पठन-पाठन, अनुभवजन्य शिक्षण एवं कौशल विकास को समाहित कर, अपने विद्यालयों को हमने ज्ञान एवं खोज की अद्‌भुत प्रयोगशाला बना दिया है। माध्यमिक स्तर तक पहुँच कर हमारे विद्यार्थी सैद्धांतिक समझ के साथ-साथ, रचनात्मक – विशेषणात्मक एवं आलोचनात्मक चिंतन भी विकसित कर लेते हैं। यही कारण है कि वह बोर्ड कक्षाओं के दौरान विभिन्न प्रकार के मूल्यांकनों के लिए सहजता से तैयार रहते हैं। उनकी इस यात्रा में हमारा सतत योगदान एवं सहयोग आवश्यक है - केन्द्रीय विद्यालय संगठन के पांचों आंचलिक शिक्षा एवं प्रशिक्षण संस्थान द्वारा संकलित यह विद्यार्थी सहायक- सामग्री इसी दिशा में एक आवश्यक कदम है । यह सहायक सामाग्री कक्षा 9 से 12 के विद्यार्थियों के लिए सभी महत्वपूर्ण विषयों पर तैयार की गयी है। केन्द्रीय विद्यालय संगठन की विद्यार्थी सहायक- सामग्री अपनी गुणवत्ता एवं परीक्षा संबंधी - सामग्री संकलन की विशेषज्ञता के लिए जानी जाती है और शिक्षा से जुड़े विभिन्न मंचों पर इसकी सराहना होती रही है। मुझे विश्वास है कि यह सहायक सामग्री विद्यार्थियों की सहयोगी बनकर निरंतर मार्गदर्शन करते हुए उन्हें सफलता के लक्ष्य तक पहुँचाएगी।

शुभाकांक्षा सहित ।

**निधि पांडे**
**आयुक्त , केन्द्रीय विद्यालय संगठन**

**PATRON**

Smt. Nidhi Pandey, Commissioner, KVS

**CO-PATRON**

Dr. P. Devakumar, Additional Commissioner (Acad.), KVS (HQ)

**CO-ORDINATOR**

Ms. Chandana Mandal, Joint Commissioner (Training), KVS (HQ)

**COVER DESIGN**

KVS Publication Section

**EDITORS:**

1. Mr. B L Morodia, Director, ZIET Gwalior
2. Ms. Menaxi Jain, Director, ZIET Mysuru
3. Ms. Shaheeda Parveen, Director, ZIET Mumbai
4. Ms. Preeti Saxena, In-charge Director, ZIET Chandigarh
5. Mr. Birbal Dhinwa, In-charge Director, ZIET Bhubaneswar

**CONTENT CREATORS:**

1. Mr. Devendra Kumar Olawat, Principal, KV No. 01, Halwara
2. Dr Keshav Dev PGT (Sanskrit), KV Reona Ucha - Fatehgarh Sahib
3. Mrs Pooja Yadav, TGT (Sanskrit), KV No. 1, Amritsar
4. Mr Ashutosh Kumar Pandey, TGT (Sanskrit), KV No. 3, Amritsar
5. Dr Kunal Bhardwaj, TGT (Sanskrit), KV Suranussi
6. Dr Hari Gopal TGT (Sanskrit), KV, KV No 1 Adampur
7. Ms Shweta Arya TGT (Sanskrit), KV, KMS Wala, Firozpur
8. Mr Sandeep Kumar, TGT (Sanskrit), KV, Sector 47, Chandigarh

# विषयानुक्रमणिका


| क्र. सं. | विषयवस्तु का नाम | पृष्ठ संख्या |
|---|---|---|
| 1 | अपठित-अवबोधनम् | 4-11 |
| 2 | उत्तरसंकेतः अपठित-अवबोधनम् | 12-14 |
| | 14रचनात्मकं कार्यम् | |
| 3 | पत्रलेखनम् चित्रवर्णनम् च | 15-22 |
| 4 | उत्तरसंकेतः पत्रलेखनम् चित्रवर्णनम् च | 22-24 |
| 5 | अनुच्छेद लेखनम् | 25 |
| 6 | संवादपूर्तिः कथापूर्तिः च | 25-32 |
| 7 | उत्तरसंकेतः संवादपूर्तिः कथापूर्तिः च | 32-34 |
| 8 | अनुप्रयुक्त-व्याकरणम् उत्तरसंकेतः च | 35-57 |
| | पठितावबोधनम् | |
| 9 | गद्यांशाः<br>उत्तरसंकेतः गद्यांशाः | 58-62<br>62-64 |
| 10 | पद्यांशाः<br>उत्तरसंकेतः पद्यांशाः | 65-75<br>75-82 |
| 11 | नाट्यांशाः<br>उत्तरसंकेतः नाट्यांशाः | 83-90<br>90-92 |
| 12 | प्रश्ननिर्माणकार्यम् | 93-99 |
| 13 | उत्तरसंकेतः प्रश्ननिर्माणकार्यम् | 99-101 |
| 14 | अन्वयः | 102-107 |
| 15 | उत्तरसंकेतः अन्वयः | 107-108 |
| 16 | भावार्थः | 109-122 |
| 17 | उत्तरसंकेतः भावार्थः | 122-123 |
| 18 | प्रसंगानुकूल: उचितार्थः | 123-126 |
| 19 | उत्तरसंकेतः प्रसंगानुकूल: उचितार्थः | 127 |
| 20 | कथायाः रिक्तस्थानपूर्तिः | 129-129 |
| 21 | उत्तरसंकेतः कथायाः रिक्तस्थानपूर्तिः | 130 |
| 22 | आदर्श-प्रश्न पत्राणि | 131-143 |
| 23 | उत्तरसंकेतः आदर्श-प्रश्न पत्राणि | 143-148 |


## अपठित-अवबोधनम्

**ध्यातव्याः बिन्दवः**

अपठितावबोधने 80-100 शब्दपरिमित: एक: अपठित: गद्यांश: दीयते। तं गद्यांशं पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि संस्कृते लेखनीयानि। परीक्षाया: प्रश्नप्रकारा: अधो दीयन्ते।

**I) एकपदेन उत्तरत।** (प्रश्नस्य उत्तरं गद्यांशात् चित्वा एकपदेन लेखनीयम्।)

**II) पूर्णवाक्येन उत्तरत।** (प्रश्नस्य उत्तरं गद्यांशात् चित्वा पूर्णवाक्येन लेखनीयम्।)

**III) गद्यांशस्य उचितं शीर्षकं लिखत।** (गद्यांशस्य प्रतिपाद्यविषयम् अनुसृत्य शीर्षकं (Title) लेखनीयम्।)

**IV) अनुच्छेदाधारितं भाषिककार्यम्।**

क) वाक्ये कर्तृ-क्रियापदचयनम्।

ख) विशेषण-विशेष्य-पदचयनम्।

ग) पर्याय-विलोम-पदचयनम्।

**एकपदेन पूर्णवाक्येन च शुद्धोत्तर लेखनाय ध्यातव्या: विषया: -**

1. प्रश्नवाचकपदं किम् इति प्रथमं चिन्तयन्तु।

2.प्रश्नस्य अन्यपदानि अनुच्छेदस्य कस्मिन् वाक्ये सन्ति इति अवगच्छन्तु। तस्मिन् वाक्ये प्रश्नवाचकपदस्य लिङ्ग-विभक्ति-वचनानुसारं यत् पदम् अस्ति तदेव उत्तरं भवति।

3. प्रश्नवाचकपदानाम् आधारेण प्रश्नानाम् उत्तराणि लिङ्ग-विभक्ति-वचनानुसारं लिखन्तु।

**शीर्षकलेखनम् -**

1. शीर्षके एकपदं वा पदद्वयं वा पदत्रयं एव भवतु।

2. शीर्षके अनुच्छेदस्य विषयाधारितं - **प्रथमाविभक्तिपदं / षष्ठीविभक्तिपदेन सह प्रथमाविभक्तिपदं** वा लिखत। यथा-

**प्रथमाविभक्ति पदम्** - वृक्ष:, भारतम्।

**षष्ठीविभक्तिपदेन सह प्रथमाविभक्तिपदं**- पर्यावरणस्य रक्षा, संस्कृतस्य महत्त्वम्,भारतस्य संस्कृति:।

**भाषिककार्यम् (यथानिर्देशम् उत्तरत ) -**

अस्मिन् वाक्ये कर्तृपदं किम् / क्रियापदं किम् ?

अस्मिन् वाक्ये / अनयो: पदयो: विशेषणपदं किम् /विशेष्यपदं किम् ?

अस्मिन् अनुच्छेदे ...... इति पदस्य समानार्थकपदं किम् / विलोमपदं किम् ? इत्येवं विधा: प्रश्ना: एव भवन्ति अत्र ?

## अपठितावबोधनम् -1

संस्कृतभाषा सरला सरसा च अस्ति। संस्कृतभाषा देवभाषा, देववाणी, गीर्वाणवाणी च कथ्यते। संस्कृतभाषायां चत्वार: वेदा: सन्ति। ऋग्वेद:, यजुर्वेद:, सामवेद:, अथर्ववेदश्च। वेदानां विषये वर्णितमस्ति- "धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुति:"। वैदिकसाहित्यस्य अन्येऽपि ग्रन्था: संस्कृतभाषायामेव सन्ति। यथा- ब्राह्मणग्रन्था:, षड्वेदाङ्गा:, षड्दर्शनानि, उपनिषद:। वाल्मीकिविरचितं रामायणं, व्यास-प्रणीतं महाभारतं, कविकुल-शिरोमणिकालिदासेन विलिखितम् अभिज्ञानशाकुन्तलं च संस्कृतभाषाया: गुणगौरवं महत्त्वं च प्रकटयन्ति। संस्कृतस्य महत्त्वविषये केनापि कथितम्- 'भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा'। संस्कृते विद्यमानाः सूक्तयः अभ्युदयाय प्रेरयन्ति, यथा- सत्यमेव जयते, वसुधैव कुटुम्बकम्, योगः कर्मसु कौशलम् इत्यादयः। सर्वभूतेषु आत्मवत् व्यवहारं कर्तुं संस्कृतभाषा सम्यक् शिक्षयति। धन्या एषा भाषा।

**I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**

(i) संस्कृतभाषा कीदृशी अस्ति ?

(ii) संस्कृतभाषायां कति वेदा: सन्ति ?

(ii) व्यासप्रणीतं किम् अस्ति ?

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम् )**

(I) वेदानां विषये किं वर्णितमस्ति ?

(ii) के ग्रन्था: संस्कृतस्य गुणगौरवं प्रकटयन्ति?

(iii) संस्कृतस्य महत्त्वविषये किं उक्तम् ?

**III. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत ।**

**IV. निर्देशानुसारं उत्तरत - (केवलं प्रश्नत्रयम् )**

(i) **"संस्कृतभाषायां चत्वार: वेदा: सन्ति"** इति वाक्ये 'सन्ति' क्रियाया: कर्तृपदं किम् ?

अ) संस्कृतम् ब) चत्वार: स) वेदा: द) भाषायां

(ii) **'परिवारस्य'** इति पदस्य पर्यायपदं गद्यांशे प्रयुक्तम् ?

अ) वेदस्य ब) कुटुम्बकस्य स) संस्कृतभाषायाः द) उपनिषद:

(iii) **'वेदा:'** इति पदस्य किं विशेषणपदम् ?

अ) सरला: ब) देवभाषा: स) संस्कृतम् द) चत्वार :

(iv) **'वेदानां विषये वर्णितमस्ति'** अस्मिन् वाक्ये क्रियापदं किम् ?

अ) वेदानां ब) विषये स) वर्णितम् द) अस्ति

## अपठितावबोधनम् -2

बीरबलः राज्ञः अकबरस्य नवरत्नेषु एकं रत्नम् आसीत्। सः अतीव बुद्धिमान् वाक्पटुः चतुर: चासीत्। एकदा अकबरः बीरबलम् अवदत्-"यदि भवान् एतावान् बुद्धिमान् अस्ति तदा तव पिता तु त्वत्तः अपि चतुरतरः भविष्यति, अहं तव पितरं द्रष्टुम् इच्छामि" इति। गृहं गत्वा बीरबलः पितरम् अवदत्-"राजा भवन्तं द्रष्टुम् इच्छति, परं भवान् तस्य समक्षं तूष्णीं तिष्ठेत्" इति। बीरबलस्य पिता राज्ञः अकबरस्य राजभवनम् अगच्छत्। राजा तम् अनेकान् प्रश्नान् अपृच्छत् परं सः किमपि न अवदत्। अन्यस्मिन् अहनि यदा बीरबलः राजप्रासादम् आगच्छत् तदा राजा बीरबलम् अपृच्छत्,"यदि कोऽपि मूर्खः तव समक्षम् आगच्छेत् तदा किं कर्त्तव्यम्"? बीरबलः प्रत्यवदत्-" तूष्णीं स्थातव्यम्" इति। अकबरः बीरबलस्य चातुर्यम् दृष्ट्वा अहसत्।

**I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम् )**

(i) बुद्धिमान् वाक्पटुः चतुर: च कः आसीत्?

(ii) कस्य समक्षं तूष्णीं स्थातव्यम्?

(iii) अकबरस्य राजभवनं कः अगच्छत्?

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम् )**

(i) अकबरः किमर्थम् अहसत्?

(ii) अकबरस्य नवरत्नेषु एकं रत्नं कः आसीत्?

(iii) बीरबलः पितरं किं अवदत्?

**III. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत ।**

**IV. निर्देशानुसारं उत्तरत - (केवलं प्रश्नत्रयम् )**

(i) **'अहसत्'** इति क्रियापदस्य कर्तृपदं किम्?

अ) बीरबलस्य ब) अकबरः स) पिता द) चातुर्यम्

(ii) **'दिने'** इति पदस्य पर्यायपदं किं प्रयुक्तम्?

अ) एकदा ब) भवान् स) तव द) अहनि

(iii) **"सः अतीव बुद्धिमान् वाक्पटुः चतुर: चासीत्"** अस्मिन् वाक्ये क्रियापदं किम्?

अ) चतुर: ब) वाक्पटुः स) चासीत् द) आसीत्

(iv) **'एकं रत्नं'** अत्र विशेष्यपदं किम्?

अ) रत्नं		ब) एकं		स) भवान्		द) चतुर:

## अपठितावबोधनम् -3

वैज्ञानिकाः संचारसाधनेषु प्रतिदिनं नवीनतमान् आविष्कारान् कुर्वन्ति येन सन्देशप्रेषणे अधिकतमा सुविधा स्यात्। चलदूरभाषयन्त्रं (मोबाइल्) तादृशम् एव लोकप्रियं यन्त्रम्। बालाः, वृद्धाः, युवकाः, पुरुषाः, महिलाः, नागरिकाः, ग्रामीणाः वा, सर्वेषाम् एव एतत् कर्णभूषणं जातम्। यानानि आरूढाः, कार्यालयेषु कार्यं कुर्वन्तः, मार्गेषु चलन्तः, सभागारेषु प्रवचनं शृण्वन्तः जनाः अस्य ध्वनिं श्रुत्वा वार्तामग्नाः भवन्ति। अविवेकपूर्णः अस्य प्रयोगः कार्येषु व्यवधानं करोति। मार्गेषु दुर्घटनाः भवन्ति। सभागारेषु, कक्षासु, अन्यसभासु वा अव्यवस्था भवति। सत्यम् अस्ति यत् आविष्कारः कदापि हानिकरः न, परन्तु तस्य दुष्प्रयोगेण जीवनस्य शान्तिः नश्यति। वस्तुतः वयं यन्त्रस्य अधीनाः न स्याम अपितु यन्त्रम् अस्माकम् अधीनं स्यात्। ते एव बुद्धिमन्तः ये विज्ञानस्य सदुपयोगं कुर्वन्ति।

**I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम् )**

(i) वर्तमानकाले किं लोकप्रियं सञ्चारसाधनम्?

(ii) यन्त्रस्य दुष्प्रयोगेण कस्य शान्तिः नश्यति?

(iii) किं कर्णभूषणं जातम्?

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम् )**

(i) के खलु बुद्धिमन्तः?

(ii) कक्षासु यन्त्रस्य ध्वनिना किं भवति?

(iii) सत्यं किम् अस्ति?

**III. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत ।**

**IV. निर्देशानुसारं उत्तरत - (केवलं प्रश्नत्रयम् )**

(i) **'संदेशप्रेषणे अधिकतमा सुविधा स्यात्'** अत्र किं विशेषणपदम्?

अ) सुविधा		ब) अधिकतमा		स) संदेशप्रेषणे		द) स्यात्

(ii)**'व्यवस्था'** इति पदस्य विलोमपदम् अत्र किं प्रयुक्तम्?

अ) नवीनतमान्		ब) हानिकरः		स) अव्यवस्था		द) व्यवधानं

(iii) **'वयं यन्त्रस्य अधीनाः न स्याम'** अस्मिन् वाक्ये क्रियापदं किम्?

अ) यन्त्रस्य		ब) वयं		स) स्याम		द) अधीनाः

(iv) **'मार्गेषु दुर्घटनाः भवन्ति'** अस्मिन् वाक्ये कर्तृपदं किम्?

अ) दुर्घटनाः		ब) मार्गेषु		स) भवन्ति		द) वयं

## अपठितावबोधनम् -4

एकस्मिन् नगरे भिक्षुकद्वयं वसति स्म। तयोः एकः मूकः अन्यः च बधिरः। तौ प्रतिदिनं मार्गस्य पार्श्वे उपविश्य भिक्षाटनं कुरुतः स्म। एकस्मिन् दिने अनेके जनाः तेन मार्गेण सञ्चारं कुर्वन्ति स्म। तेषु बहवः बधिराय भिक्षाम् अयच्छन्। मूकः एतत् न असहत्। कुपितः भूत्वा सः तं धनिकम् उक्तवान्"भो महोदय! तस्मै किमपि मा ददातु। यतः सः बधिरः नास्ति" इति। एतत् श्रुत्वा बधिरः अपि क्रुद्धः अभवत्। तयोः मध्ये महान् कलहः अभवत्। कलहमग्नौ तौ एतत् विस्मृतवन्तौ यत् ताभ्यां मूकबधिरौ इव अभिनयः कृतः इति। तत्र सम्मिलिता: सर्वे जनाः जानन्ति स्म यत् तौ वास्तविकरूपेण न मूकबधिरौ, अपि तु दृढकायौ युवकौ, किन्तु अलसौ इति। अतः ते सर्वे कोपेन तौ ताडयित्वा ततः प्रेषितवन्तः।

**I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**

(i) तौ प्रतिदिनं मार्गपार्श्वे उपविश्य किं कुरुतः स्म?

(ii) तयोः मध्ये महान् कः अभवत्?

(iii) बहवः कस्मै भिक्षाम् अयच्छन्?

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**

(i) तत्र सम्मिलिताः सर्वे जनाः किं जानन्ति स्म?

(ii) कलहमग्नौ तौ किं विस्मृतवन्तौ?

(iii) कुपितः मूकः तं धनिकं किम् उक्तवान्?

**III. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।**

**IV. निर्देशानुसारं उत्तरत - (केवलं प्रश्नत्रयम्)**

(i) **'न मूकबधिरौ, अपि तु दृढकायौ युवकौ'** अस्मिन् वाक्ये **'युवकौ'** इति पदस्य विशेषणपदं किम्?

अ) मूकबधिरौ    ब) अपि    स) तु    द) दृढकायौ

(ii) **'कुपितः भूत्वा सः तं धनिकम् उक्तवान्'** अस्मिन् वाक्ये **'उक्तवान्'** इति क्रियापदस्य कर्तृपदं किम्?

अ) सः    ब) धनिकम्    स) तं    द) कुपितः

(iii) **'निकटे'** इति पदस्य किं पर्यायपदम् अनुच्छेदे प्रयुक्तम्?

अ) उपविश्य    ब) अलसौ    स) क्रुद्धः    द) पार्श्वे

(iv) **'यतः सः बधिरः नास्ति'** अस्मिन् वाक्ये क्रियापदं किम्?

अ) नास्ति    ब) उपविश्य    स) यतः    द) अस्ति

## अपठितावबोधनम् -5

षट् कारणानि श्रियं विनाशयन्ति। प्रथमं कारणमस्ति असत्यम्। यः नरः असत्यं वदति, तस्य कोऽपि जनः विश्वासं न करोति। उक्तञ्च-'सत्यं ब्रूयात्, प्रियं ब्रूयात्, न ब्रूयात् सत्यमप्रियम्। निष्ठुरता अस्ति द्वितीयं कारणम्। कदापि केनापि सह निष्ठुरता न उचिता। सदैव जगति सर्वैः सह करुणा, दया नम्रता च करणीयाः। तृतीयं कारणम् अस्ति कृतघ्नता। जीवने अनेके जनाः अस्मान् उपकुर्वन्ति। प्रायः जनाः उपकारिणं विस्मरन्ति, प्रत्युपकारं न कुर्वन्ति। एतादृशः स्वभावः कृतघ्नता इति उच्यते। आलस्यम् अपरः महान् दोषः,'आलस्यं हि मनुष्याणां शरीरस्थः महारिपुः'। अहङ्कारः मनुष्यस्य मतिं नाशयति। अहङ्कारी मनुष्यः सर्वदा आत्मप्रशंसाम् एव करोति। न कदापि कस्यचित् उपकारं करोति। व्यसनानि अपि श्रियं हरन्ति। ये मद्यपानं कुर्वन्ति तेषाम् आत्मिकबलं, बुद्धिबलं शारीरिकबलं च नश्यन्ति। अतः बुद्धिमान् एतान् दोषान् सर्वथा त्यजेत्।

**I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**

(i) कीदृशं सत्यं न ब्रूयात्?

(ii) मनुष्याणां शरीरस्थः महारिपुः कः?

(iii) अहङ्कारः मनुष्यस्य किं नाशयति?

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**

(i) अहङ्कारी मनुष्यः किं करोति?

(ii) तृतीयं कारणं किम् उच्यते?

(iii) कानि श्रियं हरन्ति?

**III. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।**

**IV. निर्देशानुसारं उत्तरत - (केवलं प्रश्नत्रयम्)**

(i) **'नाशयति'** इति क्रियापदस्य कर्तृपदं किम्?

अ) अहङ्कारः    ब) बलम्    स) जनाः    द) मनुष्यः

(ii) **'स्मरन्ति'** इति क्रियापदस्य किं विलोमपदं अत्र प्रयुक्तम्?

अ) उपकुर्वन्ति ब) अनुस्मरन्ति स) विस्मरन्ति द) कुर्वन्ति

(iii) **'षट्'** इति पदं कस्य विशेषणम्?

अ) कारणस्य ब) अहङ्कारस्य स) श्रियस्य द) तस्य

(iv) **'प्रथमं कारणमस्ति असत्यम्'** अस्मिन् वाक्ये क्रियापदं किम्?

अ) प्रथमं ब) अस्ति स) असत्यम् द) कारणम्

## अपठितावबोधनम् -6

सुबुद्धिः दुर्बुद्धिश्च द्वौ धनिकौ आस्ताम्। सुबुद्धेः विशालं भवनम् आसीत्? तस्य अनेके उद्योगाः चलन्ति स्म। अतएव सः सर्वदा प्रसन्नचित्तः ईश्वरं स्मरन् आनन्दे निमग्नः भवति स्म। दुर्बुद्धिः लोभी आसीत्। अधिकाधिकं धनसङ्ग्रहं कर्तुम् इच्छति स्म। सर्वदा असन्तुष्टः, क्रुद्धः, दुःखी च भवति स्म। एकदा दुर्बुद्धिः कार्यवशात् सुबुद्धेः गृहम् अगच्छत्। आनन्दमग्नं तं दृष्टवा अपृच्छत्-"भवतः आनन्दस्य शान्तेश्च किं रहस्यम्। सुबुद्धिः उवाच-"मित्र! मम चत्वारः अङ्गरक्षकाः सन्ति। प्रथमः तु सत्यं यत् माम् अपराधात् सर्वदा रक्षति। द्वितीयः स्नेहः, अहं सर्वान् कर्मचारिणः पुत्रवत् मन्ये। तृतीयः न्यायः यः माम् अन्यायात् रक्षति। चतुर्थः त्यागः मां दानाय प्रेरयन्ति। अतः एतेषां सहायतया अहं सर्वदा आनन्देन जीवामि लोकहितं च करोमि इति"। दुर्बुद्धिः श्रद्धया तस्य चरणयोः अपतत्।

**I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**

(i) सुबुद्धेः कति अङ्गरक्षकाः आसन्?

(ii) कः लोकहितं करोति?

(iii) दुर्बुद्धिः श्रद्धया कस्य चरणयोः अपतत्?

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**

(i) दुर्बुद्धिः सर्वदा कस्य सङ्ग्रहं कर्तुम् इच्छति स्म?

(ii) सुबुद्धिः सर्वान् कर्मचारिणः कथं मन्यते स्म?

(iii) आनन्दमग्नं सुबुद्धिं दृष्ट्वा दुर्बुद्धिः किम् अपृच्छत्?

**III. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।**

**IV. निर्देशानुसारं उत्तरत - (केवलं प्रश्नत्रयम्)**

(i) **'सर्वान्'** इति विशेषणस्य विशेष्यपदं किम्?

अ) पुत्रवत् ब) द्वितीयः स) स्नेहः द) कर्मचारिणः

(ii) **'चलन्ति स्म'** इति क्रियापदस्य कर्तृपदं किम्?

अ) उद्योगाः ब) तस्य स) अनेके द) सुबुद्धेः

(iii) **'न्यायात्'** इति पदस्य किं विलोमपदं अत्र प्रयुक्तम्?

अ) रहस्यात् ब) अपराधात् स) कार्यवशात् द) अन्यायात्

(iv) **'तस्य अनेके उद्योगाः चलन्ति स्म'** अस्मिन् वाक्ये कर्तृपदं किम्?

अ) तस्य ब) उद्योगाः स) अनेके द) चलन्ति स्म

## अपठितावबोधनम् -7

विद्या अमूल्यं अस्ति। धनं व्यये कृते व्ययं याति, परं विद्या व्यये कृते वर्धते। अतः विद्याधनं सर्वधनेषु प्रधानम् अस्ति। विद्या मानवस्य उपकारं करोति। विद्याधनस्य अनेके लाभाः सन्ति। विद्या मानवे उचितानुचितस्य विवेकं जनयति। विद्यया जनाः विनम्राः भवन्ति। अतएव कथ्यते-विद्या ददाति विनयम्। शिक्षितः जनः अन्येषां जनानाम् अपि उपकारं करोति। शिक्षितस्य जनस्य सर्वत्र सम्मानो भवति। अतः विद्यायाः अत्यधिकं महत्त्वं वर्त्तते। विद्या मनुष्यस्य मित्रम् अस्ति। संकटकाले विद्या मनुष्यस्य सहायतां करोति। सा न केवलं पुस्तकस्य ज्ञानस्य विकासं करोति,अपितु मनुष्यस्य चरित्रं, व्यवहारं, चिन्तनं च विकसितं करोति। विद्यां विना जीवनं अन्धकारमयं भवति। विद्या अज्ञानस्य तमः अपहरति। शिक्षितः जनः विदेशेऽपि सत्कारं लभते। अस्माभिः विद्या अवश्यमेव अर्जनीया।

**I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**

(i) अस्माभिः किम् अर्जनीया?

(ii) सर्वधनेषु किं प्रधानम्?

(iii) का व्यये कृते वर्धते?

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**

(i) विद्या किं ददाति?

(ii) विद्या कदा मनुष्यस्य सहायतां करोति?

(iii) विद्या मनुष्यस्य किं किं विकसितं करोति?

**III. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।**

**IV. निर्देशानुसारं उत्तरत - (केवलं प्रश्नत्रयम्)**

(i) **'विद्या ददाति विनयम्'** इत्यत्र क्रियापदं किम्?

अ) किमपि ब) विद्या स) विनयम् द) ददाति

(ii) **'जनाः विनम्राः'** इत्यत्र विशेषणपदं किम्?

अ) भवन्ति ब) किमपि स) जनाः द) विनम्राः

(iii) **'शिक्षितः'** इत्यस्य विलोमपदं लिखत।

अ) विद्वान् ब) दुर्जनः स) शिक्षारहितः द) अशिक्षितः

(iv) **'विद्याधनस्य अनेके लाभाः सन्ति'** अस्मिन वाक्ये कर्तृपदं किम्?

अ) लाभाः ब) अनेके स) विद्याधनस्य द) सन्ति

## अपठितावबोधनम् -8

एकदा शरीरस्य सर्वाणि इन्द्रियाणि- हस्तौ, पादौ, मुखं, नासिका, कर्णौ इत्यादीनि मिलित्वा अचिन्तयन्-"वयं सर्वे प्रतिदिनं परिश्रमं कुर्मः। एतद् उदरं सर्वं स्वीकरोति, स्वयं किमपि न करोति। अद्यप्रभृति कार्यं न करिष्यामः"। एवं चिन्तयित्वा सर्वाणि अङ्गानि कार्यम् अत्यजन्। पादौ स्थिरौ भूत्वा अतिष्ठताम्। हस्तौ निश्चलौ अभवताम्। मुखं अन्नकणम् अपि न प्रावेशयत् एवं द्वे दिने व्यतीते जाते। शनैः शनैः सर्वाणि अङ्गानि शिथिलानि अभवन्। कार्यशक्तिः क्षीणा अभवत्। कथमपि पुनः मिलित्वा विचारम् अकुर्वन्-" अहो! अस्माकं प्रमादः। भुक्तस्य अन्नस्य पाचनं तु उदरमेव करोति। एतद् एव अस्मभ्यं शक्तिं ददाति। अस्य कृपया एव वयं जीवामः। अतः अस्माभिः सर्वैः अनेन सह सहयोगः करणीयः"। नूनं संहतिः एव कार्यसाधिका।

**I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**

(i) शनैः शनैः सर्वाणि अङ्गानि कीदृशानि अभवन्?

(ii) कार्यसाधिका का भवति?

(iii) कस्य पाचनं उदरमेव करोति?

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**

(i) कानि अङ्गानि मिलित्वा कार्यं त्यक्तवन्तः?

(ii) कस्य कृपया अङ्गानि शक्तियुक्तानि भवन्ति?

(iii) सर्वाणि अङ्गानि मिलित्वा किम् अचिन्तयत्?

**III. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।**

**IV. निर्देशानुसारं उत्तरत - (केवलं प्रश्नत्रयम्)**

(i) **'करिष्यामः'** इति क्रियापदस्य कर्तृपदं किम्?

अ) अद्यप्रभृति ब) कार्यं स) वयमपि द) वयम्

(ii) **'भुक्तस्य'** इति विशेषणपदस्य विशेष्यपदं किम्?

अ) अस्य　　　　　　ब) अन्नस्य　　　　　　स) उदरस्य　　　　　　द) शरीरस्य

(iii) **'अस्य कृपया एव वयं जीवामः'** अस्मिन् वाक्ये कर्तृपदं किम्?

अ) कृपया　　　ब) वयं　　　स) जीवामः　　　द) अस्य

(iv) **'चलौ'** इति पदस्य किं विपर्ययपदम् अत्र प्रयुक्तम्?

अ) कर्णौ　　　ब) पादौ　　　स) निश्चलौ　　　द) स्थिरौ

## अपठितावबोधनम् -9

जगति परोपकारः एव धर्मः। परोपकार-प्रवृत्तो हि धर्मात्मा पुण्यात्मा च अस्ति। उत्तमाः पुरुषाः तु स्वार्थम् उपेक्ष्य अपि परहितसाधनतत्पराः भवन्ति। स्वोदरभरणरताः तु काककुक्कुराः एव सन्ति। वयं पश्यामः हि यत् प्रकृतिः अपि परहितसाधनपरा वर्तते। वृक्षा: परोपकाराय एव सुस्वादूनि फलानि फलन्ति। नद्यः परोपकाराय एव शीतलं जलं वहन्ति। गावः तु परोपकाराय एव प्रकृत्या मधुरं पयः दुहन्ति। सर्वत्र एव प्रकृत्या परोपकारार्थं स्वशरीरमर्पितं क्रियते। अत्रैव शरीरस्य साफल्यम् अस्ति। परोपकाराय एव पादपः तीव्रतमं सूर्यतापं स्वमूर्ध्नि सहमानः स्वाश्रितेभ्यः पथिकेभ्यः छायां विस्तार्य सुखं वितरति। यथा दिनकरः पद्माकरं विकासयति, निशाकरः कैरवकुलं विकासयति, मेघः जलं यच्छति। परोपकारः एव शरीरस्य भूषणमस्ति।

**I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**

(i) जगति कः धर्मः?

(ii) परोपकारः शरीरस्य कीदृशं भूषणम् अस्ति?

(iii) कः पद्माकरं विकासयति?

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**

(i) स्वोदरभरणरताः मनुष्याः कीदृशाः भवन्ति?

(ii) प्रकृतिः परोपकारार्थं किं करोति?

(iii) गावः परोपकाराय किं कुर्वन्ति?

**III. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।**

**IV. निर्देशानुसारं उत्तरत - (केवलं प्रश्नत्रयम्)**

(i) **'वहन्ति'** क्रियापदस्य कर्तृपदं किम्?

अ) परोपकारः　　　ब) धर्मः　　　स) नद्यः　　　द) दिनकरः

(ii) **'शीतलं जलं'** अनयोः पदयोः किं विशेष्यपदम् अस्ति?

अ) शीतलं　　　ब) जलम्　　　स) शीतलजलम्　　　द) नद्यः

(iii) **'दुष्टात्मा'** पदस्य विलोमपदं किम्?

अ) सूर्यतापं　　　ब) पुण्यात्मा　　　स) उत्तमाः　　　द) मनुष्याः

(iv) **'तरवः'** पदस्य समानार्थकपदं गद्यांशात् चित्वा लिखत।

अ) वृक्षाः　　　ब) नद्यः　　　स) पुरुषाः　　　द) गावः

## अपठितावबोधनम् -10

जीवनस्य मूल्यम् अर्थात् ते मानवीयगुणाः ये मानवजीवनम् उत्कर्षं प्रापयन्ति। तेषु प्रमुखाः दया-सत्य-अहिंसा-अस्तेय-अक्रोधादयः सन्ति। मानवजीवनस्य उत्थानाय एतेषां महती आवश्यकता भवति। मनुष्यः वास्तवः मनुष्यः तदैव भवति यदा सः एतैः गुणैः सुशोभितः भवति। सर्वाङ्गीणविकासाय पुस्तकीयज्ञानेन समं नैतिकमूल्यान्यपि छात्रैः गृहीतव्यानि। बाल्यावस्थायां मूल्यानां शिक्षा प्रदीयते चेत् व्यक्तित्वस्य सर्वाङ्गीणः विकासः भवति। मानवः स्वकीयं पुरुषार्थं करोति जीवनलक्ष्यं च प्राप्नोति।

भारतीयसंस्कृतेः आदिकालतः एव जीवनमूल्यानां प्राधान्यमस्ति। प्राचीनकालादेव भारतीयसंस्कृतेः मूल्यपरकगुणानां स्तुतिः भवति। एतैः गुणैरेव भारतं विश्वगुरुपदं प्राप्नोत्। सम्प्रत्यपि पुनः तत्पदं प्राप्तुं छात्रेषु बाल्यादेव एते संस्काराः स्थापनीयाः। विद्यालयेषु अध्ययनेन सह जीवनमूल्यशिक्षायाः आवश्यकता वर्तते। प्रार्थनासभायामपि एषा शिक्षा स्वीकर्तुं शक्यते।

**I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम् )**

(i) मानवः स्वकीयं पुरुषार्थं कृत्वा किं प्राप्नोति?

(ii) कस्य उत्थानाय दयादिगुणानां महती आवश्यकता भवति?

(iii) केषु बाल्यादेव एते संस्काराः स्थापनीयाः?

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम् )**

(i) मनुष्यः वास्तवः मनुष्यः कैः गुणैः भवति?

(ii) प्राचीनकालादेव भारतं विश्वगुरुपदं कथं प्राप्नोत्?

(iii) सर्वाङ्गीणविकासाय केन समं नैतिकमूल्यान्यपि छात्रैः गृहीतव्यानि?

**III. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत ।**

**IV. निर्देशानुसारं उत्तरत - (केवलं प्रश्नत्रयम्)**

(i) **'सर्वाङ्गीणः विकासः'** अत्र विशेषणपदं किम्?

अ) सर्वाङ्गीणः    ब) सुशोभितः    स) मनुष्यः    द) विकासः

(ii) **'भारतः विश्वगुरुपदं प्राप्नोत्'** अत्र **'प्राप्नोत्'** इति क्रियापदस्य कर्तृपदं किम्?

अ) भारतः    ब) विश्व    स) गुरुः    द) पदं

(iii) गद्यांशे **'सज्जितः'** इति पदस्य कृते पर्यायपदं किं प्रयुक्तम्?

अ) मनुष्यः    ब) सुशोभितः    स) सर्वाङ्गीणः    द) आवश्यकता

(iv) **'व्यक्तित्वस्य सर्वाङ्गीणः विकासः भवति'** अस्मिन् वाक्ये कर्तृपदं किम्?

अ) व्यक्तित्वस्य    ब) सर्वाङ्गीणः    स) भवति    द) विकासः

## अपठित-अवबोधनम्-उत्तरसंकेतः

### अपठितावबोधनम्-1

**I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम् )**

(i) सरला, सरसा    (ii) चत्वारः    (iii) महाभारतं

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम् )**

(i) वेदानां विषये वर्णितमस्ति-"धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुति:" ।

(ii) वाल्मीकि विरचितं रामायणं, व्यास-प्रणीतं महाभारतं, कविकुल- शिरोमणिकालिदासेन विलिखितम् अभिज्ञानशाकुन्तलं च संस्कृतभाषाया: गुणगौरवं महत्त्वं च प्रकटयन्ति ।

(iii) संस्कृतस्य महत्त्वविषये उक्तम्- 'भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा '।

**III. शीर्षकं -** संस्कृतभाषायाः महत्त्वम्

**IV. निर्देशानुसारं उत्तरत - (केवलं प्रश्नत्रयम् )**

(i) (स) वेदा: (ii) (ब) कुटुम्बकस्य (iii) (द) चत्वार : (iv) (द) अस्ति

## अपठितावबोधनम्-2

**I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम् )**

(i) बीरबलः (ii) मूर्खस्य (iii) बीरबलस्य पिता

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम् )**

(i) अकबरः बीरबलस्य चातुर्यम् दृष्ट्वा अहसत्।

(ii) अकबरस्य नवरत्नेषु एकं रत्नं बीरबलः आसीत्।

(iii) बीरबलः पितरम् अवदत्,"राजा भवन्तं द्रष्टुम् इच्छति, परं भवान् तस्य समक्षं तूष्णीं तिष्ठेत्"।

**III. शीर्षकं -** बीरबलस्य चातुर्यम्

**IV. निर्देशानुसारं उत्तरत - (केवलं प्रश्नत्रयम् )**

(i) (ब) अकबरः (ii) (द) अहनि (iii) (द) आसीत् (iv) (अ) रत्नं

## अपठितावबोधनम्-3

**I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम् )**

(i) चलदूरभाषयन्त्रं (मोबाइल) (ii) जीवनस्य (iii) चलदूरभाषयन्त्रं

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम् )**

(i) ते एव बुद्धिमन्तः ये विज्ञानस्य सदुपयोगं कुर्वन्ति।

(ii) कक्षासु यन्त्रस्य ध्वनिना अव्यवस्था भवति।

(iii) सत्यम् अस्ति यत् आविष्कारः कदापि हानिकरः न, परन्तु तस्य दुष्प्रयोगेण जीवनस्य शान्तिः नश्यति।

**III. शीर्षकं -** विज्ञानस्य सदुपयोगं

**IV. निर्देशानुसारं उत्तरत - (केवलं प्रश्नत्रयम् )**

(i) (ब) अधिकतमा (ii) (स) अव्यवस्था (iii) (स) स्याम (iv) (अ) दुर्घटनाः

## अपठितावबोधनम्-4

**I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम् )**

(i) भिक्षाटनं (ii) कलहः (iii) बधिराय

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम् )**

(i) तत्र सम्मिलिता: सर्वे जनाः जानन्ति स्म यत् तौ वास्तविकरूपेण न मूकबधिरौ, अपि तु दृढकायौ युवकौ, किन्तु अलसौ इति।

(ii) कलहमग्नौ तौ एतत् विस्मृतवन्तौ यत् ताभ्यां मूकबधिरौ इव अभिनयः कृतः।

(iii) कुपितः मूकः तं धनिकं उक्तवान्-"भो महोदय! तस्मै किमपि मा ददातु। यतः सः बधिरः नास्ति"।

**III. शीर्षकं -** आलस्यं

**IV. निर्देशानुसारं उत्तरत - (केवलं प्रश्नत्रयम् )**

(i) (द) दृढकायौ (ii) (अ) सः (iii) (द) पार्श्वे (iv) (द) अस्ति

**अपठितावबोधनम्-5**

**I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम् )**

(i) अप्रियम् (ii) आलस्यं (iii) मतिं

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम् )**

(i) अहङ्कारी मनुष्यः सर्वदा आत्मप्रशंसाम् एव करोति।

(ii) तृतीयं कारणम् कृतघ्नता उच्यते।

(iii) व्यसनानि श्रियं हरन्ति।

**III. शीर्षकं -** मनुष्याणां षड्दोषाः

**IV. निर्देशानुसारं उत्तरत - (केवलं प्रश्नत्रयम् )**

(i) (अ) अहङ्कारः (ii) (स) विस्मरन्ति (iii) (अ) कारणस्य (iv) (ब) अस्ति

**अपठितावबोधनम्-6**

**I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम् )**

(i) चत्वारः (ii) सुबुद्धिः (iii) सुबुद्धेः

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम् )**

(i) दुर्बुद्धिः सर्वदा धनस्य सङ्ग्रहं कर्तुम् इच्छति स्म।

(ii) ) सुबुद्धिः सर्वान् कर्मचारिणः पुत्रवत् मन्यते स्म।

(iii) आनन्दमग्नं सुबुद्धिं दृष्ट्वा दुर्बुद्धिः अपृच्छत्-"भवतः आनन्दस्य शान्तेश्च किं रहस्यम्"।

**III. शीर्षकं -** सुबुद्धिः दुर्बुद्धिश्च

**IV. निर्देशानुसारं उत्तरत - (केवलं प्रश्नत्रयम् )**

(i) (द) कर्मचारिणः (ii) (अ) उद्योगाः (iii) (द) अन्यायात् (iv) (ब) उद्योगाः

**अपठितावबोधनम्-7**

**I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम् )**

(i) विद्या (ii) विद्याधनं (iii) विद्या

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम् )**

(i) विद्या ददाति विनयम्।

(ii) विद्या संकटकाले मनुष्यस्य सहायतां करोति।

(iii) विद्या मनुष्यस्य चरित्रं, व्यवहारं, चिन्तनं च विकसितं करोति।

**III. शीर्षकं -** विद्या

**IV. निर्देशानुसारं उत्तरत - (केवलं प्रश्नत्रयम् )**

(i) (द) ददाति (ii) (द) विनम्राः (iii) (द) अशिक्षितः (iv) (अ) लाभाः

**अपठितावबोधनम्-8**

**I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम् )**

(i) शिथिलानि (ii) संहतिः (iii) अन्नस्य

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**

(i) हस्तौ, पादौ, मुखं, नासिका, कर्णौ इत्यादीनि अङ्गानि मिलित्वा कार्यं त्यक्तवन्तः।

(ii) उदरस्य कृपया अङ्गानि शक्तियुक्तानि भवन्ति।

(iii) सर्वाणि अङ्गानि मिलित्वा अचिन्तयन्-"वयं सर्वे प्रतिदिनं परिश्रमं कुर्मः। एतद् उदरं सर्वं स्वीकरोति, स्वयं किमपि न करोति। अद्यप्रभृति कार्यं न करिष्यामः"।

**III. शीर्षकं -** संहतिः एव कार्यसाधिका

**IV. निर्देशानुसारं उत्तरत - (केवलं प्रश्नत्रयम्)**

(i) (द) वयम्  (ii) (ब) अन्नस्य  (iii) (ब) वयं  (iv) (स) निश्चलौ

## अपठितावबोधनम्-9

**I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**

(i) परोपकारः  (ii) सत्यं  (iii) दिनकरः

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**

(i) स्वोदरभरणरताः मनुष्याः काककुक्कुराः भवन्ति।

(ii) प्रकृतिः परोपकारार्थं स्वशरीरम् अपि अर्पयति।

(iii) गावः परोपकाराय एव प्रकृत्या मधुरं पयः दुहन्ति।

**III. शीर्षकं -** परोपकारः

**IV. निर्देशानुसारं उत्तरत - (केवलं प्रश्नत्रयम्)**

(i) (स) नद्यः  (ii) (ब) जलम्  (iii) (ब) पुण्यात्मा  (iv) (अ) वृक्षाः

## अपठितावबोधनम्-10

**I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**

(i) जीवनलक्ष्यं  (ii) मानवजीवनस्य  (iii) छात्रेषु

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**

(i) मनुष्यः वास्तवः मनुष्यः दया-सत्य-अहिंसा-अस्तेय-अक्रोधादयः गुणैः भवति।

(ii) प्राचीनकालादेव भारतं विश्वगुरुपदं भारतीयः संस्कृतेः मूल्यपरक गुणैः प्राप्नोत्।

(iii) सर्वाङ्गीणविकासाय पुस्तकीयज्ञानेन समं नैतिकमूल्यान्यपि छात्रैः गृहीतव्यानि।

**III. शीर्षकं -** जीवनस्य मूल्यम्

**IV. निर्देशानुसारं उत्तरत - (केवलं प्रश्नत्रयम्)**

(i) (अ) सर्वाङ्गीणः  (ii) (अ) भारतः  (iii) (ब) सुशोभितः  (iv) (द) विकासः

## रचनात्मक-कार्यम्

**१. भवतः नाम तनिष्कः । भवतः विद्यालये संस्कृतनाटकस्य मञ्चनम् अभवत् । तदर्थं मित्रं दीपकं प्रति लिखितं पत्रं मञ्जूषातः पदानां सहायतया पूरयित्वा उत्तरपुस्तिकायां लिखत-**

आदर्शविद्यालयः,

(i) ----------

दिनाङ्कः

प्रियमित्र (ii) ----------

(iii) ----------

अत्र सर्वगतं कुशलम्। आशासे त्वम् अपि कुशली। यथा त्वं जानासि गत सप्ताहे मम विद्यालये संस्कृत-उत्सवः सम्पन्नः। अस्मिन् उत्सवे संस्कृतपरिषदः (iv) ----------- पाठ्यपुस्तकस्य 'कवयामि वयामि यामि' इति नाटकस्य (v) ---------- अकुर्वन्। तस्मिन् नाटके मया 'भोजस्य' अभिनयः कृतः। कुविन्दस्य अभिनयं मम मित्रं प्राञ्जलः अकरोत्। तस्य मुखात् श्लोकगायनं (vi) ----------- सर्वेऽपि उपस्थिताः दर्शकाः भावविभोराः जाताः करतलध्वनिभिः च तस्य उत्साहवर्धनम् (vii) ---------- कार्यक्रमस्य अन्तेऽपि मुख्यातिथिमहोदयेन संस्कृतनाटकस्य भूरि भूरि (viii) ---------- कृता। वस्तुतः अयम् उत्सवः मनोरञ्जकं ज्ञानवर्धकं च आसीत्। तव विद्यालये संस्कृतोत्सवः कदा भविष्यति इति अवश्यं सूचय। मातृपितृचरणेषु (ix) ---------- प्रणामाः।

तव मित्रम्

(x) ----------

**मञ्जूषा**

| प्रशंसा, कृतवन्तः, श्रुत्वा, दिल्लीतः, मम, तनिष्कः, दीपक!, छात्राः, सस्नेहं नमः, मञ्चनम्। |
|---|

**१. प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत –**



**मञ्जूषा**

| तरन्ति, स्वच्छम्, ग्रीष्मकाले, तरणतालस्य, जनाः, बालाः, कुर्वन्ति, प्रसन्नाः, जलक्रीडाम्, जलम्, कन्दुकम्, सन्ति |
|---|

**२. भवान् सौरवः। स्वमित्रं शाश्वतं प्रति स्वयात्रावृत्तान्तविषये लिखितं पत्रं मञ्जूषायाः पदैः पूरयित्वा पुनः लिखतु।**

प्रयागराजतः

दिनाङ्कः __________

प्रिय मित्र (i) ----------!

सस्नेहं (ii) -----------

अत्र सर्व कुशलं तत्रास्तु। गतमासे अहं (iii) --------- शिमलां गतवान्। तत्र पर्वतानां (iv) ------------- दृष्ट्वा मम मनः अतीव (v) ---------- जातम्। तत्र (vi)--------- पर्यावरणं वर्तते। शिमला (vii) ------------ राजधानी अस्ति। अतः तत्र सर्वत्र विकासः दृश्यते। देशात् विदेशेभ्यः च पर्यटकाः भ्रमणाय (viii)---------आगच्छन्ति। अहमपि शिमलाभ्रमणं कृत्वा आत्मानं (ix) ----------मन्ये। भवान् अपि समयं प्राप्य एकवारं शिमलां गच्छेत्।

भवदीयं प्रियं मित्रम्
(x)-----------------।

**मञ्जूषा**

| |
|---|
| सौरवः, शिमलाम्, भ्रमणाय, प्रसन्नम्, धन्यम्, सौन्दर्यम्, शुद्धम्, हिमाचलप्रदेशस्य, नमोनमः, शाश्वत! |

**२. प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत।**



**मञ्जूषा**

| |
|---|
| सुन्दराणि, अनेकानि, चित्राणि, ऐतिहासिकस्थानानि, भवनानि, नौका, नद्याम्, ताजमहलम्, पर्वताः, सन्ति, मन्दिरम्, रक्तदुर्गम् |

**३. भवान् निपुणः। भवतः मित्रम् अथर्वः चलदूरभाषियन्त्रस्य प्रयोगम् अत्यधिकं करोति। अस्य दुष्परिणामान् ज्ञापयता लिखिते पत्रे रिक्तस्थानानि पूरयित्वा पत्रं च पुनः उत्तरपुस्तिकायां लिखतु।**


92, विज्ञान विहारः
नव दिल्लीतः दिनाङ्कः ____
प्रिय मित्र (i)_________!
सप्रेम नमोनमः।

अत्र कुशलं (ii) __________। अधुना अहम् (iii) ________ यत् भवान् अत्यधिकं चलदूरभाषियन्त्रे (iv) ________एव दृश्यते। एतत् न उचितम्। अनेन तु (v) _________ हानिः भवति। कक्षायाः पश्चात् अस्य (vi) __________ अति न्यूनः भवितव्यः। अस्य अतिप्रयोगः स्वास्थ्याय नोचितं वर्तते। (vii) __________ दृष्टि कृते तु इदं शत्रुः इव। अहं मन्ये अधुना (viii) __________अस्य प्रयोगम् आवश्यकतानुसारम् एव करिष्यसि, स्वाध्ययनं प्रति च सचेष्टः भविष्यसि।
(ix) ______________प्रति सादरं प्रणामाः।
भवदीयं (x) _______________
निपुणः

**मञ्जूषा**

| |
|---|
| सक्रियः, त्वम्, मातापितरौ, अनुभवामि, मित्रम्, प्रयोगः, तत्रास्तु, अथर्व, अमूल्यसमयस्य, नेत्राणाम्। |

**३. प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत :**



**मञ्जूषा**

| |
|---|
| पुस्तकानि, चतस्रः, पठन्ति, आसन्दिकायाम्, ध्यानेन, पुस्तकालयम्, सुसज्जितम्, वर्तते, द्वौ, संगणकम्, बालौ, पुस्तकालयाध्यक्षः, एका, शान्तम्। |

**४. भवती प्रभा अस्ति। स्वमातरं प्रति स्व स्वास्थ्यविषये लिखितम् इदं पत्रं मञ्जूषायाः सहायतया पुनः सम्पूर्ण लिखतु-**

विद्यालयपरिसरः
(i)__________
समादरणीयाः (ii) _________
सादरं प्रणामाः।

अत्र कुशलं तत्रास्तु। सम्प्रति मम (iii) _____________ परीक्षा सञ्चरति। अत्र छात्रावासे पठनस्य वातावरणं तु शोभनं वर्तते। अत्र अध्यापकाः अपि च अतीव कर्मठाः सन्ति। अतः पठनस्य कार्य (iv) __________ एव भवति, परन्तु अध्ययनकारणात् शयनस्य भोजनस्य च (v) ___________ एव न प्राप्यते। अतः अद्यत्वे मम (vi) ________सुष्ठु नास्ति। अहं (vii) _________ पीडिता अस्मि। परं काचिद् अपि (viii) ___________ नैव करणीया। आशासे अहं शीघ्रमेव पूर्णतया स्वस्था भविष्यामि। परीक्षायाः अनन्तरं (ix) _________ आगमिष्यामि। तदा वयं मिलित्वा भ्रमणाय वाराणसीनगरं गमिष्यामः। पित्रे (x) ___________।

भवत्याः पुत्री
प्रभा

**मञ्जूषा**

| |
|---|
| वार्षिकी, शिमलातः, ज्वरेण, मातृचरणाः, गृहम्, स्वास्थ्यम्, समुचितम्, नमः, समयः, चिन्ता। |

**४. प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत।**

**मञ्जूषा**

| |
|---|
| उद्यानम्, धावतः, जनौ, वातावरणम्, नगरस्य, महिला, वृक्षाः, साधारणम्, विशालभवनानि, बसस्थानम्, स्वच्छम्, प्रतीक्षाम्, तिष्ठन्ति, अवकरपात्रम्। |



**५. भवान् देवांशः । रामायणं पठनाय मित्रम् अक्षतं प्रोत्साहितं कर्तुं लिखिते पत्रे रिक्तस्थानानि पूरयित्वा पत्रं च पुनः उत्तरपुस्तिकायां लिखतु ।**

76, हरिमार्गम्
(i) ______
दिनाङ्कः _____
प्रिय मित्र (ii) ______!
नमोनमः ।
अत्र (iii) ______तत्रास्तु । गतसप्ताहे मम (iv) _______आसीत् । तस्मिन् अवसरे मम पिता मह्यम् 'रामायणम्' इति (v) ________ उपहाररूपेण दत्तवान् । अद्यत्वे अहं तत् पुस्तकं (vi) ______पठामि । अतः अधुना त्वां प्रति पुस्तकविषये लेखितुम् इच्छामि । रामायणं पुस्तकं वस्तुतः (vii) ________शिक्षयति । एतस्य पठनेन अस्माकं मनसि भ्रातृभावस्य, मित्रतायाः, पितरं प्रति च (viii) ______ अपि विकासः भविष्यति । अस्मिन् आधुनिके युगे तु अस्य ज्ञानस्य अत्यावश्यकता वर्तते । मम निवेदनम् अस्ति यद् भवान् अपि अस्य पुस्तकस्य (ix) ______करोतु अन्यान् च अपि प्रोत्साहितं करोतु । पितृभ्यां मम प्रणामाः ।
तव (x) ______
देवांशः

**मञ्जूषा**

| |
|---|
| पुस्तकम्, कुशलम्, अक्षत, सुन्दरनगरात्, जन्मदिवसः, मित्रम्, मनोयोगेन, जीवनपद्धतिं, भक्तिभावनायाः, अध्ययनम् । |

**५. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत :**



**मञ्जूषा**

| |
|---|
| नगरस्य, स्तः, भवनानि, बालौ, उड्डयन्ते, पादपान्, पर्यावरणम्, प्रसन्नौ, पक्षिणः, जलपात्रम्, शुद्धम्, भवेयुः, जागरूकाः, सर्वत्र । |

**६. मित्रं प्रति अधोलिखितं पत्रं मञ्जूषाप्रदत्तशब्दैः पूरयित्वा पुनः लिखत।**

(i) _______

प्रिय मित्र रमेश !

दिनाङ्क : _______

सप्रेम (ii) ______

(iii) ______अहं मित्रैः सह जन्तुशालां द्रष्टुं कोलकाता नगरम् अगच्छम्। (iv) _________ मया नैके पशवः पक्षिणः च दृष्टाः। सर्वे जन्तवः भयरहिताः (v) _________ भ्रमन्ति स्म। सिंहाः उच्चैः गर्जन्ति स्म। मयूराः केकारवं कृत्वा (vi) _______स्म। वस्तुतः मयूरं विना जन्तुशाला न (vii) _______। तत्र आम्रवृक्षेषु कोकिलाः (viii) ________कूजन्ति स्म। दिनान्ते वयं (ix) ________जाताः। पुनः वयं ततः प्रस्थिताः। गृहे सर्वेभ्यः मम प्रणामाञ्जलयः निवेदनीयाः।

तव (x) _________

सुकेशः

**मञ्जूषा**

| |
|---|
| अभिन्नहृदयः, शोभते, कोलकातानगरात्, परिश्रान्ताः, तत्र, मधुरस्वरेण, इतस्ततः, नृत्यन्ति, विगतदिवसे, नमो नमः |

**६. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत।**



**मञ्जूषा**

| |
|---|
| बालकः, पादकन्दुकेन, पुस्तकम्, पठति, द्वौ बालकौ, चित्रफलके, क्रीडतः, बालिका, निर्माणं, चित्रम्, यन्त्रेण, पश्यति। |

**७. मातरं प्रति लिखितम् अधः पत्रं मञ्जूषापदसहायतया पूरयित्वा पुनः लिखत।**

(i) _________

शिमलातः,

दिनाङ्कः ________

परमपूज्यमातः !

सादरं प्रणामाः।

अहं कुशलः अत्र तत्रापि कामये। भवत्याःपत्रम् प्राप्य मनसि सन्तोषः (ii)..........। मम भ्राता (iii).............. स्वस्थः इति हर्षस्य विषयः। सः मम अध्ययनस्य (iv)............ च विषये चिन्तितः आसीत्। अहं पञ्चवादने (v)…………… यथानिर्दिष्टं (vi)………….. करोमि (vii)……………… च पठामि। नववादने विद्यालयं (viii)………….. । चतुर्वादने (ix) .................. आगच्छामि। सप्तवादने गृहकार्यं करोमि। पितृमहाभागानां प्रणामाः कथनीयाः।

भवत्याः आज्ञापालकः (x) ...................।

प्रदीपः

**मञ्जूषा**

| |
|---|
| पुत्रः, विद्यालयात्, व्यायामं, स्वास्थ्यस्य, जातः, कावेरीछात्रावासः, इदानीम्, तदनन्तरं, उत्थाय, गच्छामि |

७. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत।



**मञ्जूषा**

| |
|---|
| भारतद्वारम्, सैनिकाः, गणतन्त्रदिवसः, पथसञ्चलनम्, ध्वजोत्तोलनम्, भवति, राष्ट्रियपर्वः, अवकाशः, जनसम्मर्दः, सैनिकाः |

८. मित्रं प्रति अधोलिखितं पत्रं मञ्जूषाप्रदत्तशब्दैः पूरयित्वा पुनः लिखत।

कावेरी छात्रावासात्

दिनाङ्कः ________

प्रिय मित्र माधव,

(i) ________।

अत्र कुशलं तत्रास्तु। अहं (ii) ______ सज्जायां व्यस्तः आसम्। अतः विलम्बेन तव पत्रस्य उत्तरं ददामि। अस्मिन् वर्षे मयापि गणतन्त्रदिवसस्य शोभायात्रायां भागः (iii)__________। अस्माकं विद्यालयस्य छात्राः राजपथे (iv) ________ प्रदर्शनम् अकुर्वन्। अहं गरबानृत्यस्य (v) ___________ आसम्। छात्राणां राष्ट्रगानस्य ओजस्वी ध्वनिः (vi) __________ गुञ्जितम् अकरोत्। स्वराष्ट्रस्य सैन्यबलानां पराक्रमप्रदर्शनानि, विचित्रवर्णानि परिदृश्यानि, (vii)__________च दृष्ट्वा अहं गौरवान्वितः अस्मि। (viii)__________ बाल्यावस्थायाः स्वप्नः तत्र पूर्णः जातः। (ix)________ वन्दनीयौ।

भवतः

(x)___________ महेशः।

**मञ्जूषा**

| |
|---|
| गृहीतः, पितरौ, नमस्ते, मम, मित्रम्, राजपथम्, लोकनृत्यस्य, लोकनृत्यानि, गणतन्त्रदिवससमारोहस्य, प्रमुखसञ्चालकः। |

८. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत।



**मञ्जूषा**

| |
|---|
| महाभारतम्, श्रीकृष्णः, अर्जुनाय, युद्धसमये, उपदेशान्, मोहात्, ददाति, कर्तव्यपालनम्, युद्धाय, सन्नद्धः |

**९. स्वमित्रं एकादश-कक्षायां संस्कृतं पठितुं प्रेरयितुं लिखिते पत्रे रिक्तस्थानानि पूरयित्वा पत्रं च पुनःउत्तरपुस्तिकायां लिखतु।**

छात्रावासः

(i) _________

दिनाङ्कः _______

प्रिय आदित्य,

(ii) __________।

अत्र कुशलं तत्रास्तु। तव (iii) _________ज्ञातं यत् त्वम् एकादश-कक्षायां संस्कृतम् भाषां पठितुम् इच्छसि। एतत् ज्ञात्वा अहम् अति प्रसन्नः (iv) __________ यतः संस्कृतं पठित्वा वयं स्वदेशस्य गौरवम् अनुभवितुं (v)_________। इयं देवभाषा विश्वस्य सर्वासु भाषासु प्राचीनतमा वैज्ञानिकी च अस्ति। विश्वस्य (vi) _________ भाषासु भारतीयभाषासु च (vii) _________ शब्दाः प्राप्यन्ते। किं त्वं जानासि यत् वेदाः, रामायणम्, महाभारतम्, उपनिषदः, पञ्चतन्त्रहितोपदेशादयः (viii) ________ संस्कृते एव लिखिताः सन्ति? अतः त्वं सर्वैः (ix) ______ सह संस्कृतम् अपि परिश्रमेण पठ। अवकाशेषु मम गृहम् आगच्छ।

मातापितृभ्यां मम प्रणामान् कथय।

तव(x) _________

वैभवः।

मञ्जूषा

| |
|---|
| अभवम्, नमोनमः, मित्रम्, शक्नुमः, विषयैः, देहरादूनतः, संस्कृतस्य, अनेकासु, पत्रेण, ग्रन्थाः। |

**९. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत।**



**मञ्जूषा**

| |
|---|
| शाकविक्रेता, कोलाहलः, समूहः, आकारयन्ति, कदली, आलुकम्, पलाण्डु, गृञ्जनम्, प्रयच्छन्ति, विक्रीणन्ति |

**१०.स्व-विद्यालयस्य वार्षिकोत्सवं वर्णयन्तः मित्रं प्रति लिखिते पत्रे मञ्जूषातः उचितपदैः रिक्तस्थानानि पूरयत।**

केन्द्रीय-विद्यालयः

(i)_________

दिनाङ्कः (ii)________

प्रिय मित्र (iii)________

(iv)_________

भवतः पत्रं प्राप्तम्। अहं स्वविद्यालयस्य (v)_______ विषये वर्णयामि। एकमासपूर्वमेव (vi)________ सर्वे अध्यापकाः (vii) ______च कार्येषु व्यस्ताः आसन्। उपायुक्तमहोदयः कार्यक्रमस्य (viii) ________विद्यालयम् अतीव प्राशंसत्। योग्येभ्यः छात्रेभ्यः च (ix)_________ अयच्छत्। पितृभ्याम् नमः।

भवतः (x)_______
सुरेशः।

**मञ्जूषा**

| |
|---|
| पुरस्कारान्, दिल्लीतः, सप्रेमनमः, छात्राः, सुहृद्, रमेश!, मुख्यातिथिः, 21.04.25,विद्यालयस्य, वार्षिकोत्सवस्य। |

**१०. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत।**



**मञ्जूषा**

| |
|---|
| बालः, पश्यतः, बालाः, वृक्षः, हरितः, पुष्पे, पादपाः, पत्राणि, पश्यन्ति |

**रचनात्मकं कार्यम्**

## उत्तरसंकेतः

1. **पत्रलेखनम्**

आदर्शविद्यालयः,
(i) **दिल्लीतः**
दिनाङ्कः ----------------
प्रियमित्र (ii) **दीपक !**
(iii) **सस्नेहं नमः।**

अत्र सर्वगतं कुशलम्। आशासे त्वम् अपि कुशली। यथा त्वम् जानासि गत सप्ताहे मम विद्यालये संस्कृत-उत्सवः सम्पन्नः। अस्मिन् उत्सवे संस्कृतपरिषदः (iv) **छात्राः** पाठ्यपुस्तकस्य 'कवयामि वयामि यामि' इति नाटकस्य (v) **मञ्चनम्** अकुर्वन्। तस्मिन् नाटके मया 'भोजस्य' अभिनयः कृतः। कुविन्दस्य अभिनयं मम मित्रं प्राञ्जलः अकरोत्। तस्य मुखात् श्लोकगायनं (vi) **श्रुत्वा** सर्वेऽपि उपस्थिताः दर्शकाः भावविभोराः जाताः करतलध्वनिभिः च तस्य उत्साहवर्धनम् (vii) **कृतवन्तः**। कार्यक्रमस्य अन्तेऽपि मुख्यातिथिमहोदयेन संस्कृतनाटकस्य भूरि भूरि (viii) **प्रशंसा** कृता। वस्तुतः अयम् उत्सवः मनोरञ्जकं ज्ञानवर्धकं च आसीत्। तव विद्यालये संस्कृतोत्सवः कदा भविष्यति इति अवश्यं सूचय। मातृपितृचरणेषु (ix) **मम** प्रणामाः।
तव मित्रम्
(x) **तनिष्कः**

1. **चित्रवर्णनम्**

१. बालकाः जले तरन्ति। २. जनाः जले कन्दुकेन क्रीडन्ति। ३. बालाः प्रसन्नचित्ताः सन्ति।
४. बालाः जलक्रीडां कुर्वन्ति। ५. जले नाविकः अपि अस्ति।

**2. पत्रलेखनम्**

(i) शाश्वत! (ii) नमोनमः (iii) भ्रमणाय (iv) सौन्दर्यम् (V) प्रसन्नम् (vi) शुद्धम् (vii) हिमाचलप्रदेशस्य (viii) शिमलाम् (ix) धन्यम् (x) सौरव

2. **चित्रवर्णनम्**

१. भारते बहवः सुन्दराणि दुर्गाणि सन्ति। २. अत्र अनेकानि चित्राणि दृश्यन्ति। ३.अस्मिन् चित्रे पर्वतः अपि अस्ति।
४.अस्मिन् चित्रे अनेकानि ऐतिहासिकस्थानानि सन्ति। ५. ताजमहलः आगरानगरे स्थितः अस्ति।

3. **पत्रलेखनम्**

i) अथर्व (ii) तत्रास्तु (iii) अनुभवामि (iv) सक्रियः (V) नेत्राणाम् (vi) प्रयोगः (vii) त्वम् (viii) अमूल्यसमयस्य (ix) मातापितरौ (x) मित्रम्।

3. **चित्रवर्णनम्**

१. बालाः पुस्तकानि पठन्ति। २. चतस्रः बालिका: पुस्तकालये सन्ति। ३. पुस्तकालयः सुसज्जितं अस्ति।
४. चतस्रः छात्राः आसन्दिकायां उपविष्टाः। ५. सर्वे ध्यानेन पुस्तकं पठन्ति।

4. **पत्रलेखनम्**

१. शिमलातः २. मातृचरणाः ३. वार्षिकी ४. समुचितम् ५. समयः ६. स्वास्थ्यम् ७. ज्वरेण ८. चिन्ता ९. गृहम् १०. नमः।

4. **चित्रवर्णनम्**

१. इदं नगरस्य चित्रं अस्ति। २. नगरस्य वातावरणं शोभनं वर्तते। ३. उद्याने बहवः महिलाः सन्ति।
४. अस्मिन् चित्रे बहूनि विशालभवनानि सन्ति। ५. एतत् नगरं स्वच्छम् अस्ति।

5. **पत्रलेखनम्**

१. सुन्दरनगरात् २. अक्षत ३. कुशलम् ४. जन्मदिवसः ५. पुस्तकम् ६. मनोयोगेन ७. जीवनपद्धतिं ८. भक्तिभावनायाः ९. अध्ययनम् १०. मित्रम्।

5. **चित्रवर्णनम्**

१. अस्मिन् चित्रे वर्षाकालस्य दृश्यम् अस्ति। २. आकाशः मेघैः आच्छादितः अस्ति। ३. गगने खगा: उड्डयन्ति।
४. बालकौ पुष्पे रोपयतः। ५. चित्रे बहवः वृक्षाः दृश्यन्ते।

6. **पत्रलेखनम्**

१. कोलकातानगरात् २. नमो नमः ३. विगतदिवसे ४. तत्र ५. इतस्ततः
६. नृत्यन्ति ७. शोभते ८. मधुरस्वरेण ९. परिश्रान्ताः १०. अभिन्नहृदयः।

6. **चित्रवर्णनम्**

१. अस्मिन् चित्रे एकम् उद्यानम् अस्ति। २. अत्र एका बालिका दोलोपरि अस्ति। ३. चित्रे एका बालिका दोलयति।
४. द्वौ बालकौ क्रीडतः। ५.एका बालिका चित्रफलके चित्रनिर्माणं करोति।

7. **पत्रलेखनम्**

(i) कावेरीछात्रावासः (ii) जातः (iii) इदानीम् (iv) स्वास्थ्यस्य (v) उत्थाय (vi) व्यायामं (vii) तदनन्तरं (viii) गच्छामि (ix) विद्यालयात् (x) पुत्रः

7. **चित्रवर्णनम्**

१. इदं चित्रं गणतन्त्रदिवसस्य अस्ति। २. चित्रे सैनिकाः पथसञ्चलनं कुर्वन्ति। ३. अस्मिन् चित्रे भारतद्वारम् अपि दृश्यति।
४. गणतन्त्रदिवसः एकः राष्ट्रियपर्व: अस्ति। ५. गणतन्त्रदिवसे भारतद्वारे (इंडिया गेट) ध्वजोत्तोलनं भवति।

8. **पत्रलेखनम्**

(i) नमस्कार (ii) गणतन्त्रदिवससमारोहस्य (iii) गृहीतः (iv) लोकनृत्यस्य (V) प्रमुखसञ्चालकः (vi) राजपथम् (vii) लोकनृत्यानि (viii)मम (ix) पितरौ (x) मित्रम्

8. **चित्रवर्णनम्**

१. इदं चित्रं महाभारतस्य अस्ति। २. श्रीकृष्णः अर्जुनाय उपदेशं ददाति। ३. अर्जुनः कर्तव्यपालनं करोति। ४. एतत् चित्रम् युद्धक्षेत्रस्य अस्ति। ५. सर्वे युद्धे सन्नद्धाः आसन्।

9. **पत्रलेखनम्**

(i) देहरादूनतः (ii) नमोनमः (iii) पत्रेण (iv) अभवम् (v) शक्नुमः (vi) अनेकासु (vii) संस्कृतस्य (viii) ग्रन्थाः (ix) विषयैः (x) मित्रम्।

9. **चित्रवर्णनम्**

१. इदम् आपणस्य चित्रं वर्तते। २. आपणे कोलाहलं भवति। ३. कदलीफलविक्रेतारः अपि सन्ति। ४. जनाः शाकानि विक्रीणन्ति। ५. विपण्यां आलूकानि अपि विक्रीयन्ते।

10. **पत्रलेखनम्**

(i) दिल्लीतः (ii) 21.04.2018 (iii) रमेश ! (iv) सप्रेमनमः (v) वार्षिकोत्सवस्य (vi) विद्यालयस्य (vii) छात्राः (viii) मुख्यातिथिः (ix) पुरस्कार: (x) सुहृद्।

10. **चित्रवर्णनम्**

१. बालाः उद्याने व्यायामं कुर्वन्ति। २. बहवः हरितपादपाः सन्ति। ३. उद्याने पुष्पाणि विकसन्ति। ४. जनाः उद्याने भ्रमणं कुर्वन्ति। ५. उद्यानस्य तडागे हंसौ अपि शिशुभिः सह जलविहारं कुर्वन्ति।

## अनुच्छेदलेखनम्

**निम्नलिखितं विषयम् अधिकृत्य मञ्जूषाप्रदत्तशब्दानां साहाय्येन न्यूनातिन्यूनं पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत-**

**“क्रीडा-महत्त्वम्"**

**मञ्जूषा**

| |
|---|
| महत्त्वपूर्णम्, सर्वेभ्यः, अनिवार्यम्, स्वास्थ्याय, जीवनम्, संयमः, स्थानम्, सफलाः, जनाः, क्रीडा। |

**"दिल्ली-विश्वपुस्तकमेलकम्”**

**मञ्जूषा**

| |
|---|
| प्रतिवर्षम्, प्रगतिमैदान इति स्थले, फरवरी-मार्चमासे, विविधानि पुस्तकानि, आपणिकाः, आयोज्यते, जनसम्मर्दः, विभिन्नाः प्रकोष्ठाः, पुस्तकप्रेमिणः, साहित्यिक-गोष्ठ्यः, भवन्ति, सांस्कृतिककार्यक्रमाः, अल्पमूल्येन। |

**‘व्यायामस्य महत्वम्’**

**मञ्जूषा**

| |
|---|
| भ्रमणम्, श्रान्तकरणम्, वर्धते, प्राणायामेन, पाचनशक्तिः, नित्यम्, भवति, रक्तसञ्चारः, स्वास्थ्यकरः, उत्थाय, मस्तिष्कम्, स्वस्थं, प्रातः, पावनकर्म। |

**‘अतिवृष्ट्या हानिः’**

**मञ्जूषा-**

| |
|---|
| नद्यः, कूलानि, नष्टानि, वृक्षाः, जलौघः, ग्रामेषु, नगरेषु, सर्वत्र, जनानां संरक्षणम्, जलं, महती, हानिः, जनाः, पशवः, म्रियन्ते,जले निमग्नाः , अन्नानि, कृषकाः, जायन्ते |

**'वृक्षाः अस्माकं मित्राणि'**

**मञ्जूषा**

| |
|---|
| वृक्षाः सत्पुरुषाः, परोपकारम्, छाया, फलानि पुष्पाणि, जनाः, पवनः, काष्ठम्, शीतलः, स्वास्थ्याय, आवश्यकम्, पथिकः, आनन्दम्, अनुभवन्ति, भूमेः संरक्षणम्, वर्षा, पक्षिभ्यः वासः। |

**'मम राष्ट्रियपर्वः '**

**मञ्जूषा**

| |
|---|
| 'मम राष्ट्रियपर्वः " गणतंत्रदिवसः, पराधीनतायाः मुक्तिः, संविधानरचना, समानाधिकारः समावसरः, प्रसन्नतायाः उल्लासस्य पर्व, देशभक्तिगानं, राष्ट्रस्य गौरवं प्रदर्शयन्ति, सैनिकाः, अभियन्तारः, वैज्ञानिकाः, गर्वभूताः सन्ति |

## संवादपूर्तिः कथापूर्तिः च

**रिक्तस्थानानि पूरयित्वा अधोलिखितसंवादं पुनः लिखत-**

**1.**

निशा - नमो नमः सखि! एवं धावन्ती कुत्र गन्तुं तत्परा असि ?

गरिमा - सखि! वस्तुतः अत्यन्तं त्वरायामस्मि, **1. ----------------------,** तत्रैव गमनीयम्।

निशा - सौन्दर्यप्रतियोगिताऽस्ति। सौन्दर्ये कीदृशी प्रतियोगिता? **2. ------------------------------**। विधातु: निर्णये कीदृशी प्रतियोगिता?

गरिमा - एतत्तु सर्वथा सत्यं परं विधात्रा प्रदत्तं रूपं कः कथं रक्षति गुणान्वितं च करोति इति अस्य कृते प्रतियोगिता आवश्यकी।

निशा - **3. ---------------------,** परं किं केवलं बाह्यरूपमेव महत्त्वपूर्णम्? किम् आन्तरिकगुणानां न

किमपि महत्त्वम्?

गरिमा - एवं नास्ति सखि! विजेतृनिर्धारणाय सौन्दर्यप्रतियोगितासु बाह्यसौन्दर्येण सह मानवीयगुणानामपि परीक्षणं भवति।

निशा - **4.** ---------------------------------- इति तु मम जिज्ञासा वर्धते?

गरिमा - प्रश्नोत्तरमाध्यमेन, प्रतिभागिनीनां व्यवहारेण च आन्तरिकगुणानां परीक्षणं भवति।

निशा - वस्तुतः एव दर्शनीया प्रतियोगिता। **5. ----------------------------------?**

गरिमा - आम् आम्। अवश्यमेव। आगच्छ मया सह। शीघ्रं चलावः। प्रतियोगितायाः समयस्तु सञ्जातः।

| |
|---|
| सखि ! त्वं सत्यं वदसि, किमहमपि त्वया सह प्रतियोगितां द्रष्टुं चलेयम्, कथमान्तरिकगुणा: परीक्ष्यन्ते एतत्तु विधात्रा प्रदत्तं रूपमेव। अद्य मम विद्यालये सौन्दर्यप्रतियोगिता अस्ति, |

**अथवा**

**अधोलिखितां कथां मञ्जूषायाः सहायतया पूरयित्वा पुनः लिखत-**

एकः टोपिकाविक्रेता आसीत्। सः एकदा (i) ...........विक्रेतुं ग्रामान्तरं गच्छन् आसीत् । (ii)............. सः श्रान्तः अभवत्, अतः (iii).......... अधः स्थित्वा शयनम् अकरोत्। तत्र बहवः वानराः आसन्। (iv) ................ तस्य टोपिकाः स्वीकृत्य वृक्षस्य उपरि अतिष्ठन्। (v)..........टोपिकाविक्रेता जागृतः अभवत् तदा सः टोपिकाः न दृष्ट्वा बहु (vi)................अभवत्। सः एकम् (vii) ......... अकरोत्। सः वानराणां पुरतः स्थित्वा स्वस्य टोपिकां दूरम् अक्षिपत्। (viii).................... वानराः अपि स्वहस्तेभ्यः टोपिकाः अधः (ix)................। चतुरः टोपिकाविक्रेता टोपिकाः एकत्रीकृत्य प्रसन्नः भूत्वा ततः (x)............। अतः कथ्यते- बलात् बुद्धिः श्रेष्ठा।

**मञ्जूषा –**

(अगच्छत्, अनुकरणशीलाः, वृक्षस्य, दुःखी, यदा, उपायम्, मार्गे, अक्षिपन्, टोपिकाः, ते)

**रिक्तस्थानानि पूरयित्वा अधोलिखितसंवादं पुनः लिखत-**

**2.**

दर्पण: - किमर्थं खिन्नाऽस्ति भवती?

मेधा - कस्त्वम्? **1.** --------------------------- ?

दर्पण: - आश्चर्यम्! भवती मां न जानाति ?

मेधा - मम मातापितासखिभिरपि अविज्ञातं तथ्यं त्वया अवगतम्। **2. ---------------------------।**

दर्पण: - भो! अहं दर्पणोऽस्मि | भवती मां तव प्रतिरूपमेव अवजानातु ।

मेधा - किमेवम्?

दर्पण: - आम्! **3.** --------------------परं ते न जानन्ति यदहं केवलं यथार्थरूपमेव दर्शयामि ।

मेधा - उचितं कथितं त्वया। जनाः स्वार्थस्य वशीभूय अस्मान् सततं भ्रामयितुं प्रयतन्ते।

दर्पण: - एतदर्थमेव जनाः तथ्यमवगन्तुं न समर्थाः ।

मेधा - सत्यमुक्तं त्वया। वयमपि मिथ्याप्रशंसया भ्रान्ताः भूत्वा तथ्यं विस्मृत्य अहङ्कारिण: भवामः। **4.** ---------------------------|

दर्पणः - एतदेव मम वास्तविकं प्रयोजनम्।

मेधा - धन्यवादा: बोधनाय। **5.** --------------------------- अधुना प्रतिदिनं द्रष्टुम् आगमिष्यामि ।

दर्पणः - (विहस्य) शुभास्ते सन्तु पन्थानः।

**मञ्जूषा –**

| |
|---|
| गच्छामि खिन्नतापहरणाय, प्रायः जनाः निजं सुन्दरतमं रूपं द्रष्टुमिच्छन्ति, कथं ज्ञातं त्वया , मम कृते तु एतदेव महदाश्चर्यम्, त्वमेव तथ्यं ज्ञापयित्वा अस्मभ्यम् आत्ममन्थनस्य अवसरं प्रयच्छसि |

**अथवा**

**अधोलिखितां कथां मञ्जूषायाः सहायतया पूरयित्वा पुनः लिखत-**

नगरात् दूरम् एकम् अरण्यमासीत् तस्मिन् (1) -------------- बहवः वृक्षाः पर्वताः पशुपक्षिणश्च आसन् | तत्र एकस्मिन् वृक्षे (2) -------- काका: एक: शुकश्च निवसति स्म। सः शुकः यद्यपि वृद्धः आसीत् तथापि युवानः (3) ------------ तं दृष्ट्वा प्रशंसन्तः प्रायः कथयन्ति 'हे तात! एतावन्तं (4) --------- दृष्ट्वा वयम् आत्मानं वृद्धाः मन्यामहे यतोहि भवान् अतीव क्रियाशीलः, विवेकी, प्रत्युत्पन्नमतिः चास्ति| तेषां वचनं श्रुत्वा शुकः तान् कथयति- भो! काका:! भवतां सम्मानम् अहं सादरं (5) ----------- किन्तु श्रूयतां मम वचनमिदम्- यदि यूयमपि स्वजीवनं सुखमयं कर्तुम् (6) ------------ , तर्हि कथनमात्रेण सुखं नैव मिलति| अपितु, (7) -------- आचरणेनैव सुखं लभ्यते। एवं प्रकारेण शुकः काकान् जीवनोपयोगिधर्मान् निरन्तरमेव शिक्षते स्म| एकवारम् तस्मिन्नेव अरण्ये एक: (8) ---------- आगतवान्। स: दृष्टवान् यदस्मिन् वृक्षे तु बहव: पक्षिणः निवसन्ति। यद्येते मम वशीभूताः भवेयुः, तर्हि मम जीवनं तु सुखेन गमिष्यति इति विचार्य स: व्यासः तस्मिन् दिने तु ततः अगच्छत् | किन्तु , अग्रिमे (9) ------------- एव विस्तृतं जालम् आनीय वृक्षस्य समक्षम् आगतः। वृक्षे बहवः काका: शुकैः सह परस्परम् आलपन्ति स्म | व्याधः शीघ्रमेव अन्नकणान् तत्र प्रसार्य किञ्चिद् दूरं गत्वा तिरोहितो भवति। अन्नकणान् दृष्ट्वा काका: (10) -------- भूत्वा अवदन्- 'अरे महत् सौभाग्यम् अद्य अस्माकम्। वयमद्य पर्याप्तम् अन्नं प्राप्त्वा धन्यम्मन्याः। अतः भोजनार्थं तु कुत्रापि गमनस्य आवश्यकता अग्रे न भविष्यति। यतोहि अनेनैव वयं तृप्ताः भविष्यामः ।"

**मञ्जूषा –**

| |
|---|
| दिने, व्याधः, बहवः, प्रसन्नाः, क्रियाशीलं, इच्छत, विवेकपूर्वकम्, अरण्ये, काकाः, स्वीकरोमि |

**रिक्तस्थानानि पूरयित्वा अधोलिखितसंवादं पुनः लिखत-**

**3.**

अङ्कुशः - अमित! अमित! आगच्छ। शीघ्रम् आगच्छ।
अमित: - (अमित: न शृणोति)
अङ्कुशः- अमित! भवान् कुत्र अस्ति? **1. ----------------------------**
अमित: - आगच्छामि। आगच्छामि।
अङ्कुशः- **2. ---------------------------** ।
अमित: - किम् इच्छति भवान् ?
अङ्कुशः- अहं किञ्चित् न इच्छामि, परं **3. ---------------------------?** कालं वृथा नयति ।
अमित: - मया कालः वृथा न नीतः ।
अङ्कुशः- अहर्निशम् अस्य प्रयोगं करोति तथापि कथयति- **4. ----------------------------**
अमित: - आम् । आम् । सत्यं कथयामि अहम्। परियोजनार्थं सामग्रीसञ्चयनं करोमि ।
अङ्कुशः- मृषा मा वद। सामग्रीसञ्चयनम् अर्धहोरापरिमितमेव कालम् अपेक्षते । **5. --------------------**
अमित: - अहं किञ्चिद् अन्यत् न पश्यामि ।
अङ्कुशः- अन्तर्जालस्य उचितप्रयोगः एव करणीयः, अतिप्रयोगं तु वर्जयेत् ।
अमित: - (शिरो नमयित्वा किञ्चिद् न वदति)

| |
|---|
| भवान् तत्र किञ्चिद् अन्यत् पश्यति , अवश्यमेव अन्तर्जाले कालं वृथा यापयति ,<br>भवान् दिवारात्रम् अन्तर्जाले किं करोति, किमर्थं न शीघ्रम् आगच्छति। , "कालं वृथा न नयामि ।" |

**अथवा**

**अधोलिखितां कथां मञ्जूषायाः सहायतया पूरयित्वा पुनः लिखत-**

एकः भिक्षुकः आसीत्। (1)……………… सः ग्रामं ग्रामं नगरं नगरं च सर्वत्र अटति स्म । एकदा सः कस्यचित् धनिकस्य गृहं प्राप्तवान्। (2)………….. बहिः स्थितः सः कञ्चित् अस्पष्टं शब्दं श्रुतवान् । पुनः समीपं गत्वा सः अशृणोत् यत् तस्य गृहस्य (3)…………… ईश्वरं प्रार्थयन् वदति स्म 'हे देव! मह्यं(4)…………… ददातु ।' भिक्षुकः 'अहो! अयं तु स्वयमेव

(5)…………….. इति चिन्तयित्वा अग्रे (6) …………..। अग्रे गत्वा सः अपश्यत् यद् (7)………… गृहे एकः व्यापारी प्रार्थयते स्म 'भगवति! मम (8)………… लाभः भवतु। भिक्षुकः चिन्तितवान् अरे! एते तु महत्तरां (9)………… याचन्ते। अहं तु केवलं भोजनं याचे। अहम् एव (10)…………….. यतः अहं सन्तुष्टः अस्मि इत्येव चिन्तयन् सः तद्गृहं विहाय अग्रे अगच्छत्।

**मञ्जूषा**

| |
|---|
| भिक्षाम्, व्यापारे, भाग्यवान्, अगच्छत्, गृहात्, स्वामी, अन्यस्मिन्, भिक्षाटनाय सन्तानम्, याचकः। |

**रिक्तस्थानानि पूरयित्वा अधोलिखितसंवादं पुनः लिखत-**

**4.**

राधा - मोहिनि ! किमर्थं चिन्तिता इव प्रतीयसे ?

मोहिनी - **1. -----------------------** तस्य कृते विशेषविद्यालयस्य आवश्यकता अस्ति |

राधा - किमर्थम् ! अस्माकं ग्रामे एव सर्वोदय: विद्यालयः वर्तते। **2. -----------------------** ।

मोहिनी - एतत् कथं सम्भवम्? **3. -----------------------** |

राधा - विशेषविद्यालय: ? न न, भगिनि ! सर्वकारस्य योजना अस्ति सर्वे विद्यार्थिनः सहैव अध्ययनं कुर्वन्तु।

मोहिनी - धन्यवादाः भगिनि! महतीं चिन्ताम् अपसारितवती भवती।

राधा - एवं नास्ति। **4. -----------------------** सर्वे विद्यार्थिनः सर्वेषाम् आवश्यकताम् अवबुध्य परस्परं साहाय्यं कुर्वन्तु।

मोहिनी - किमेतत् सत्यम्? **5. -----------------------**? (विद्यालयस्य.........चलति)

राधा - अथ किम्?

मोहिनी - अहं राकेशस्य शिक्षार्थं चिन्तिता अस्मि |

**मञ्जूषा**

| |
|---|
| समावेशिशिक्षायाः उद्देश्यमस्ति, परं मम पुत्रः अन्यथासमर्थः अस्ति, तत्रैव प्रवेशं कारयतु ,<br>एतादृशेभ्यः छात्रेभ्यः विशेषावधानस्य आवश्यकता भवति, किं राकेशः अपि सामान्यबालकैः सह पठितुं शक्नोति? |

**अधोलिखितां कथां मञ्जूषायाः सहायतया पूरयित्वा पुनः लिखत-**

पुरा बिहारप्रान्ते 'दरभंगा' इत्याख्यायां राजधान्यां भद्रबाहुनामकः राजा राज्यं करोति स्म। सः अतीव दयालुः, मधुरस्वभावः, न्यायप्रियः, (1)......................... राजा आसीत्। तस्य राजधान्यां कोऽपि जनः (2).........................पीडितो नैव आसीत्। अपितु, सर्वे एव जनाः राज्ञः उदारतायाः प्रजाहितैषितायाः सच्छीलस्य च गुणगानं कृत्वा प्रसीदन्ति। एकदा भद्रबाहुः (3)......................... सह मन्त्रणां करोति स्म। अतः राजसभायां सर्वत्र शान्तिरेव परिव्याप्ता आसीत्। अकस्मादेव एकः आपणिकः राजसभाम् आगत्य (4)......................... क्रन्दयति- 'त्राहि माम्, महाराज! त्राहि माम्।' तस्य करुणस्वरं श्रुत्वा सर्वेषां (5)......................... सर्वमेव विहाय तस्योपरि आपतिता। सः दर्शनेन तु कुलीनः, समृद्धश्च प्रतीयते। तथापि, तस्य करुणापूर्णं वचः सर्वेषां मनः (6)......................... । राजा तम् अपृच्छत्- 'अयि भोः। कथमेवं (7)......................... ? किं ते कष्टम्? कथमहं तव साहाय्यं कुर्याम्?' इति। राज्ञः प्रीतिपूर्णं वचनं श्रुत्वा सः अवदत्- '(8).........................! अहमेकः आपणिकः। मम आपणे सर्वाणि गृहोपयोगीनि (9)......................... मिलन्ति। तानि वस्तूनि विक्रीय अहं स्वजीविकाम् अर्जयामि। किन्तु, अत्र भवतां सेनापतिः प्रतिदिनं सैनिकान् प्रेषयित्वा यथेच्छं वस्तूनि गृह्णाति। अथ च वस्तूनां (10)......................... तु न कदापि ददाति। पुनश्च तस्य सेवकाः अपि 'राजदण्डं मिलिष्यति' इति कथयित्वा स्वगृहार्थमपि यथेच्छं बहूनि वस्तूनि गृह्णन्ति। अद्य मया किंचन्मात्रां विरोधः प्रकटितः। तदा तु सेनापतिः स्वयमेव मम आपणम् आगत्य कटुवचनैः मम अपमानं अकरोत्।

**मञ्जूषा**

| |
|---|
| उच्चैः-उच्चैः, दृष्टिः, प्रजापालकश्च, मूल्यम् विलपसि, दुःखेन, व्याकुलीकरोति, हे राजन्!, वस्तूनि, मन्त्रिभिः |

**रिक्तस्थानानि पूरयित्वा अधोलिखितसंवादं पुनः लिखत-**

**5.**

(सुमित: अमित: च उपवने भ्रमतः)

अमितः - सुमित! चिन्तितः दृश्यसे।

सुमितः - आम्। **1. ----------------------- ।**

अमितः - किमर्थम् ?

सुमितः - गणितपरीक्षायां मया न्यूनाः अङ्काः प्राप्ताः।

अमितः - तेन किम्?

सुमितः - **2. -----------------------।**

अमितः - जानामि अहम्।

सुमितः - परं मया तु **3. -----------------------**।

अमितः - तेन किम् ?

सुमितः - अग्रे किं करिष्यामि ?

अमितः - किं न जानासि केवलं दशमकक्षापर्यन्तम् एव अस्य विषयस्य पठनम् अनिवार्यम्।

सुमितः - अमित: तर्हि किमर्थं त्वं चिन्तामग्नः? **4. -----------------------।**

सुमितः - (किञ्चित् न वदति)

अमितः - भवान् चित्रकलायां निपुणः अस्ति।

सुमितः - (शिरः प्रचालयति)

अमितः - **5. -----------------------**। (संवदन्तौ गृहं प्रति गच्छतः)

| |
|---|
| चिन्तितोऽस्मि , गणितविषयः तु अनिवार्य-विषयोऽस्ति , अस्मिन् विषये सदैव काठिन्यम् अनुभूतम् ,चित्रकलां गृहीत्वा स्वयोग्यतां प्रदर्शय , चित्रकलाया: माहात्म्यं तु प्रतिदिनं वर्धते एव |

**अथवा**

**अधोलिखितां कथां मञ्जूषायाः सहायतया पूरयित्वा पुनः लिखत-**

एकस्मिन् वने एकः सिंहः राज्यं करोति स्म। सिंहः (1)............ अतीव मृदुलः, हास्यप्रियः, दयालुश्च आसीत्। सः सर्वदा प्रजानां (2)............ कर्तुं रुचिमान् भवति। प्रजाजनानां सर्वप्रकारेण कल्याणं भवेदिति धिया सिंहेन स्वराज्ये त्रयः (3)............... नियुक्ताः। ते त्रयः मन्त्रिणः आसन्- मृगः, वानरः (4)..............। एते त्रयः विविधबलैः विभूषिता आसन्। मृगस्य तु मनोबलम् अतुल्यम् आसीत्, (5)............. च शारीरिकं बलम् अनुपमम् आसीत्। एवमेव शशकस्य (6)................बुद्धिबलं सर्वान् अतिशेते। एवम्प्रकारेण एते त्रयः विविधबलमण्डिताः मन्त्रिणः राजकर्मणि सहयोगं प्रददति। राजाऽपि एतेषां त्रयाणां (7)...............विना न किमपि कार्यं कुरुते। एते मन्त्रिणः प्रजाजनानां हितसाधनाय (8)..........समुचितं प्रयत्नं कुर्वन्ति। अतः एव सर्वे प्रजाजनाः एतान् मन्त्रिपरिषद्सदस्यान् आद्रियन्ते। किन्तु, तस्मिन्नेव वने शृगालः, लोमशिका च मन्त्रिणां रिपुतुल्यौ ईर्ष्यालू निवसतः। एतौ द्वावेव (9)............... राजपदं प्राप्तुमिच्छतः। किन्तु, मन्त्रिणां राजभक्तिकारणात् कदापि साफल्यं प्राप्तुं समर्थौ न (10).................... ।

**मञ्जषा**

| |
|---|
| सहमतिं, हितकार्याणि, अभवताम्, मन्त्रिणः, वानरस्य, प्रतिदिनमेव, विलक्षणं, स्वभावेन, रिपू, शशकश्च |

**रिक्तस्थानानि पूरयित्वा अधोलिखितसंवादं पुनः लिखत-**

**6.**

जनकः - पुत्र केशव! (i) --------------------------------- ?

पुत्रः - हे जनक! अहं 'गीतां' पठामि।

जनकः- शोभनम्, 'गीता' इति बहु उत्तमः ग्रन्थः अस्ति। गीता महाभारतस्य भागः अस्ति

यस्यां सप्तशतं श्लोकाः सन्ति।

पुत्रः - आम्, (ii) ------------------------------------ ।

जनकः - सत्यम्। किं त्वं जानासि यत् महाभारतस्य लेखकः कः अस्ति ?

पुत्रः - आम्, जनक! (iii) ------------------------------------।

जनकः - उत्तमम्, संस्कृतस्य प्रसिद्धौ ग्रन्थौ कौ ?

पुत्रः - अहं मन्ये, (iv) ----------------------------------।

जनकः - सत्यम्, त्वं बहु जानासि। अहं बहुप्रसन्नः अस्मि।

पुत्रः - धन्यवादः पितः! (v) -----------------------------------।

**मञ्जूषा**

| |
|---|
| * अस्य लेखकः महर्षिः वेदव्यासः अस्ति। * त्वम् एतावद्-ध्यानेन किं पठसि? * अहं पठामि अतः जानामि। * एतौ प्रसिद्धौ ग्रन्थौ 'रामायणम्' 'महाभारतम्' च स्तः। * एतेषु श्लोकेषु श्रीकृष्णस्य ज्ञानवर्धकाः उपदेशाः सन्ति। |

**अथवा**

**अधोलिखितां कथां मञ्जूषायाः सहायतया पूरयित्वा पुनः लिखत-**

एकवारम् इतस्ततः परिभ्रमन् दयारामः ग्रामात् किञ्चिद्दूरमेकं विशालदुर्गम् अपश्यत्। (1)..................... दृष्ट्वा लोभवशात् तस्य मुखे जलधारा समुद्भूता। तस्य नेत्रे (2)......................सञ्जाते। सः शीघ्रमेव तत्र अगच्छत्। तत्र सः इतस्ततः अभ्रमत् (3)......................। किन्तु, कमपि एतादृशं पुरुषम् तत्र नापश्यत्, यः दुर्गस्य स्वामी, रक्षको वा भवेत्। तत्र केवलम् एकस्मिन् (4)......................प्रकोष्ठे बह्व्यः गावः बद्धाः आसन्। याः परस्परम् आलपन्त्यः तृणानि (5)......................। तत्रैव एकः (6)...................... गोमयम्, गोमूत्रञ्च ततः निवारयति स्म। तस्मिन्नेव प्रकोष्ठे बह्व्यः मक्षिकाः इतस्ततः उड्डीयन्ते। ताः कदाचित्तु गोपालकस्य (7).......................उपविश्य तं कण्डूयन्ति, कदाचिच्च गवां मस्तकेषु उपविश्य परस्परं क्रीडन्ति। एतत्सर्वं दृष्ट्वा दयारामः उच्चस्वरेण सगर्वम् अकथयत्- भोः गोपालक! त्वमत्र किं (8).......................? किमेताः तव गावः? शीघ्रं वद। गोपालकः भयमनुभवन् हस्तौ संयोज्य अवदत्- स्वामिन्! एताः गावस्तु मम न विद्यन्ते। अहं तु केवलं परिचर्यामेव करोमि। एताः (9)....................कुतश्चित् पथभ्रष्टाः भूत्वाऽत्र आगताः, क्रमेण वर्धिताश्च शनैः शनैः। अहं तु प्रातः सायमत्र आगत्य सम्मार्जयामि, गाः दुग्ध्वा दुग्धञ्च गृहं नयामि। अन्यन्नास्ति मे प्रयोजनमत्र। इदं श्रुत्वा (10).......................शिरसः संचालनेन तम् अकथयत्- 'अस्तु। अहमस्य दुर्गस्य स्वामी। अधुना अहमत्र आगतोऽस्मि, अतः त्वमत्र पुनः न कदापि आगच्छेः' इति कथयित्वा सः गोपालकं गन्तुमादिशत्। गोपालकः भयकम्पितमानसः सत्वरमेव ततः निर्गतः।

**मञ्जूषा**

| |
|---|
| नासिकोपरि, दयारामः, लोभान्धे, दुर्गं, विशाले, गोपालकः, करोषि, गावस्तु, चरन्ति स्म, अपश्यच्च |

**रिक्तस्थानानि पूरयित्वा अधोलिखितसंवादं पुनः लिखत-**

**7.**

**माता** – राघव! त्वं किं .........?

**राघवः** – अहं मम ..........गृहकार्यं करोमि।

**माता** – पुत्र! गृहकार्यानन्तरम् .......... गत्वा ततः दुग्धं ............ च आनय।

**राघवः** – अहं ........ पुस्तकं क्रेतुम् आपणं गमिष्यामि ....... दुग्धं शाकफलानि च आनेष्यामि।

**माता** – सायंकाले न, त्वं तु ....... गत्वा आनय।

**राघवः** – .......... किमर्थम्

**माता** – अद्य तव .......... आगमिष्यति, अतः भोजनं समयात् पूर्वमेव पक्ष्यामि।

**राघवः** – मातुल: आगमिष्यति चेत् अहम् इदानीम् एव गत्वा वस्तूनि ............ आगच्छामि।

**मञ्जूषा**

| |
|---|
| तदा, शाकफलानि , मातुलः, सायंकाले, पूर्वमेव, शीघ्रं, क्रीत्वा, करोषि, विद्यालयस्य, आपणं आपणंआपणआपणं |

**अथवा**

**अधोलिखितां कथां मञ्जूषायाः सहायतया पूरयित्वा पुनः लिखत-**

जयपुरनगरे एकः सुप्रतिष्ठितः राजकीयः विद्यालयः अस्ति। तत्र प्रत्येकं (1)......................यद्यपि चत्वारिंशत् छात्राः आसन्, तथापि अन्येऽपि बहवः (2)........................तस्मिन्नेव विद्यालये प्रविष्टुमिच्छन्ति स्म। यतोहि तत्र गुरुशिष्ययोः सम्बन्धः (3)........................वर्तते। शिष्याः गुरोः सेवायां प्राणान्नपि समर्पयितुम् (4)......................। (5)........................ छात्रहिताय स्वकीयं सर्वस्वम् अर्पयति। अस्मिन्नेव विद्यालये दशमकक्षायां चत्वारः मेधाविनः छात्राः आसन्। एते छात्राः (6)........................निर्धनाः आसन्। एतेषां नामानि क्रमशः- जयप्रकाशः, विजयसिंहः, अजयकुमारः, अजीतसिंहश्च आसन्। एते चत्वार एव छात्राः, न केवलं दशमकक्षायाः, अपितु (7)........................ गर्वभूताः, ध्वजवाहकाश्च आसन्। यतोहि, एतेषां (8)........................, अधिगमस्तरः, बुद्धि पेशलत्वञ्च अप्रतिममासीत्। एते सर्वे स्वज्ञानकौशलेन विद्यालयस्य कीर्तिमहर्निशं (9)........................ । प्रत्येक: छात्र: अन्येभ्यः पृथक्, किन्तु सर्वेषु श्रेष्ठश्च आसीत्। अतः तेषां मध्ये कः उत्तमः? इति न केनापि, न कदापि निर्णेतुं शक्यते। विद्यालयस्य वार्षिकोत्सवः अग्रिमे मासे निर्धारितोऽभवत्। परम्परानुसारं वार्षिकोत्सवे कोऽपि एकः छात्रः आदर्शच्छात्रत्वेन (10)........................ इति उद्घोषणीयम् आसीत्। एतदर्थं सर्वे एव चिन्तामग्नाः सञ्जाताः। प्राचार्योऽपि किङ्कर्तव्यविमूढः आसीत्।

**मञ्जूषा**

| |
|---|
| वर्धयन्ति, अतीव, भगवद्भक्ताविव, इच्छन्ति, सम्पूर्णविद्यालयस्य, गुरुरपि, ज्ञानस्तरः, कक्षायां, पुरस्कारयोग्यः, छात्राः |

**रिक्तस्थानानि पूरयित्वा अधोलिखितसंवादं पुनः लिखत-**

**8.**

**देवेशः** - अद्य स्वतन्त्रतादिवसः अस्माकं विद्यालयस्य प्राचार्य: (1) ---------------------- करिष्यति। छात्राश्च सांस्कृतिक कार्यक्रमान् प्रस्तोष्यन्ति। अन्ते च मोदकानि मिलिष्यन्ति ।

**डेविड :** -शुचे! जानासि त्वम्? अस्माकं ध्वजः कीदृश: ?

**शुचिः** - अस्माकं देशस्य (2) ---------------------- त्रिवर्णः इति ।

**सलीमः** - रुचे! अयं त्रिवर्णः कथम्?

**रुचिः** - अस्मिन् ध्वजे त्रयः वर्णाः सन्ति, अत: (3) ---------------------- किं त्वम् एतेषां वर्णानां नामानि जानासि ?

**सलीमः** - अरे! केशरवर्णः, श्वेतः, (4) ---------------------- च एते त्रयः वर्णाः।

**देवेशः** - अस्माकं ध्वजे एते त्रयः वर्णाः किं सूचयन्ति ?

**सलीमः** - शृणु, केशरवर्ण: (5) ---------------------- श्वेतः सत्यस्य, हरितश्च समृद्धेः सूचकाः सन्ति।

**शुचिः** - किम् एतेषां वर्णानाम् अन्यदपि महत्त्वम्?

**डेविड :** - आम्। कथं न? ध्वजस्य उपरि स्थितः केशरवर्णः त्यागस्य उत्साहस्य च सूचकः। मध्ये स्थितः श्वेतवर्ण: (6) ---------------------- शुचितायाः च द्योतकः । अधः स्थितः हरितवर्ण: वसुन्धराया: सुषमायाः उर्वरतायाश्च द्योतकः ।

**तेजिन्दरः-** शुचे ध्वजस्य मध्ये एकं नीलवर्णं चक्रं वर्तते ?

**शुचिः** - आम् आम् | इदम् (7) ---------------------- कथ्यते । एतत् प्रगतेः न्यायस्य च प्रवर्तकम्। (8) ---------------------- अशोकस्तम्भः अस्ति। तस्मात् एव एतत् गृहीतम्।

**प्रणवः** - अस्मिन् चक्रे ( 9 ) ---------------------- अराः सन्ति।

**मेरी** - भारतस्य संविधानसभायां 22 जुलाई 1947 तमे वर्षे समग्रतया अस्य ध्वजस्य स्वीकरणं जातम् ?

**तेजिन्दरः -** अस्माकं त्रिवर्णः ध्वजः स्वाधीनतायाः राष्ट्रगौरवस्य च प्रतीकः । अत एव स्वतन्त्रतादिवसे (10) ------------------- च अस्य ध्वजस्य उत्तोलनं समारोहपूर्वकं भवति।

जयतु त्रिवर्णः ध्वजः, जयतु भारतम्।

**मञ्जूषा**

| शौर्यस्य, हरितः, ध्वजः, चतुर्विंशतिः, त्रिवर्णः, अशोकचक्रे, सारनाथे, सात्त्विकतायाः, गणतन्त्रदिवसे, ध्वजारोहणं |
|---|

**अथवा**

**अधोलिखितां कथां मञ्जूषायाः सहायतया पूरयित्वा पुनः लिखत-**

कोलकातानगरे कस्यचिद् धनिकस्य गृहे एकः मूषकपरिवारः प्रच्छन्नरूपेण निवसति स्म। तत्र (1) ...................... मूषकदम्पती, चत्वारः पुत्राश्च (2)......................... । मूषकपुत्राः क्रमशः-'धीरः, अधीरः, आशुगः, चञ्चलश्चे'ति नामधेयाः आसन्। ते प्रातःकाले एव धनिकगृहात् यदा तदा (3).......................... गृहीत्वा गच्छन्ति। नगरे इतस्ततः भ्रमित्वा स्वादूनि व्यञ्जनानि च भक्षयित्वा ते रात्रावेव गृहं (4)..........................। किन्तु, मूषकदम्पती तत्रैव उषित्वा यत्किंचित् लभते, तदेव (5)..........................जीवनं सुखेन नयति स्म। एकदा प्रातःकाले उत्थाय चत्वारः (6)..........................नगरं प्रति गन्तुमुद्यताः अभवन्। तेषां पिता गमनात्पूर्वं तान् उपदिशति- ''पुत्राः! युष्माकं ज्येष्ठो भ्राता 'धीरः' यथा कथयिष्यति, तथैव आचरेयुः''। सर्वे पितुः उपदेशवचनम् न श्रुत्वाऽपि (7)..........................इति वदन्तः ततः दूरं धाविताः। अग्रे-अग्रे आशुगः, तदनु (8).......................... चञ्चलः, ततः अधीरः, अन्ते च स्थीयताम् स्थीयतामिति उच्चैः आकारयन् धीरः धावति। तेषु मूषकेषु त्रयस्तु यथारुचि यत्र-कुत्रापि गच्छन्ति। किन्तु, तेषां ज्येष्ठभ्राता धीरः बारम्बारं तान् प्रत्यायति- (9).......................... नेदं स्थानं गन्तुं योग्यम्, नेदं स्थानं सुरक्षितमिति। तथापि ते त्रय एव मूषकाः निषिद्धेऽपि स्थाने गमनार्थम् अधिकमुत्सहन्ते। (10)........................द्वादशवादनं सञ्जातम्। चत्वारो मूषकाः इतस्ततः व्यर्थं धावित्वा सम्प्रति श्रान्ताः सञ्जाताः। अतः ते एकस्य वृक्षस्य नीचैः आगत्य अतिष्ठन्, अकथयन् च- भ्रातरः! सम्प्रति अस्माकम् उदरेषु तीव्रम् आन्दोलनं प्रचलति। अतः शीघ्रमेव किमपि खादितव्यम्, अन्यथा मूर्च्छालाः भविष्यामः।

**मञ्जूषा**

| भोः भ्रातरः!, प्रातराशं, चञ्चलः, प्रत्यावर्तन्ते, 'आम्-आम्', परिवारे, खादित्वा, घटिकायां, आसन्, मूषकाः मूषकाः |
|---|

**उत्तरसंकेतः**

**अनुच्छेदलेखनम्**

अयं विकल्पः सर्वेभ्यः अस्ति। छात्राः मञ्जूषायां प्रदत्तानां शब्दानां विभक्तेः परिवर्तनं कृत्वा अपि वाक्यनिर्माण कर्तुं शक्नुवन्ति। अतः अङ्काः देयाः। अस्य मूल्याङ्कनाय अन्ये नियमाः चित्रवर्णनस्य अनुगुणं पालनीयाः।

**संवादपूर्तिः**

**1**

गरिमा - **1. अद्य मम विद्यालये सौन्दर्यप्रतियोगिता अस्ति,**
निशा - **2. एतत्तु विधात्रा प्रदत्तं रूपमेव।**
निशा - **3. सखि ! त्वं सत्यं वदसि,**
निशा - **4. कथमान्तरिकगुणाः परीक्ष्यन्ते**
निशा - **5. किमहमपि त्वया सह प्रतियोगितां द्रष्टुं चलेयम्?**

**अथवा**

**1 कथापूर्तिः**

(i) टोपिका (ii) मार्गे (iii) वृक्षस्य (iv) ते (v) यदा
(vi) दुःखी (vii) उपायम् (viii) अनुकरणशीलाः (ix) अक्षिपन् (x) अगच्छत्

**संवादपूर्तिः**

**2**

मेधा - **1. कथं ज्ञातं त्वया**?

मेधा - मम मातापितासखिभिरपि अविज्ञातं तथ्यं त्वया अवगतम्। **2. मम कृते तु एतदेव महदाश्चर्यम्** ।

दर्पण: - आम्! **3. प्रायः जनाः निजं सुन्दरतमं रूपं द्रष्टुमिच्छन्ति** परं ते न जानन्ति यदहं केवलं यथायथं रूपमेव **4. त्वमेव तथ्यं ज्ञापयित्वा अस्मभ्यम् आत्ममन्थनस्य अवसरं प्रयच्छसि**|

मेधा - धन्यवादा: बोधनाय। **5. गच्छामि खिन्नतापहरणाय।** अधुना प्रतिदिनं द्रष्टुम् आगमिष्यामि ।

**अथवा**

**2 कथापूर्तिः**

| | | | | |
|---|---|---|---|---|
| (1) अरण्ये | (2) बहवः | (3) काका: | (4) क्रियाशीलं | (5) स्वीकरोमि |
| (6) इच्छत | (7) विवेकपूर्वकम् | (8) व्याधः | (9) दिने | (10) प्रसन्नाः |

**संवादपूर्तिः**

**3.**

अङ्कुशः - अमित! भवान् कुत्र अस्ति? **1. किमर्थं न शीघ्रम् आगच्छति।**

अमित: - आगच्छामि। आगच्छामि।

अङ्कुशः - **2. अवश्यमेव अन्तर्जाले कालं वृथा यापयति** ।

अमित: - किम् इच्छति भवान् ?

अङ्कुशः - अहं किञ्चित् न इच्छामि, परं **3. भवान् दिवारात्रम् अन्तर्जाले किं करोति?** कालं वृथा नयति ।

अङ्कुशः - अहर्निशम् अस्य प्रयोगं करोति तथापि कथयति- **4. "कालं वृथा न नयामि ।"**

अङ्कुशः - मृषा मा वद। सामग्रीसञ्चयनम् .... अपेक्षते । **5. भवान् तत्र किञ्चिद् अन्यत् पश्यति ।**

**अथवा**

**3 कथापूर्तिः**

| | | | | |
|---|---|---|---|---|
| 1.भिक्षाटनाय | 2.गृहात् | 3.स्वामी | 4.सन्तानम् | 5.याचकः |
| 6.अगच्छत् | 7.अन्यस्मिन् | 8.व्यापारे | 9.भिक्षाम् | 10.भाग्यवान् |

**संवादपूर्तिः**

**4.**

मोहिनी - **1. परं मम पुत्रः अन्यथासमर्थः अस्ति।** तस्य कृते विशेषविद्यालयस्य आवश्यकता अस्ति |

राधा - किमर्थम् ! अस्माकं वसत्याम् एव सर्वोदय: विद्यालयः वर्तते । **2. तत्रैव प्रवेशं कारयतु** ।

मोहिनी - एतत् कथं सम्भवम्? **3. एतादृशेभ्यः छात्रेभ्यः विशेषावधानस्य आवश्यकता भवति** |

राधा - एवं नास्ति । **4. समावेशिशिक्षायाः उद्देश्यमस्ति** - सर्वे विद्यार्थिनः सर्वेषाम् .... परस्परं साहाय्यं कुर्वन्तु ।

मोहिनी - किमेतत् सत्यम्? **5. किं राकेशः अपि सामान्यबालकैः सह पठितुं शक्नोति**?

**अथवा**

**4 कथापूर्तिः**

| | | | | |
|---|---|---|---|---|
| (i) प्रजापालकश्च | (ii) दुःखेन | (iii) मन्त्रिभिः | (iv) उच्चैः-उच्चैः | (v) दृष्टिः |
| (vi) व्याकुलीकरोति | (vii) विलपसि | (viii) हे राजन्! | (ix) वस्तूनि | (x) मूल्यम् |

**संवादपूर्तिः**

**5.**

सुमितः - आम्। **1. चिन्तितोऽस्मि।**

सुमितः - **2. गणितविषयः तु अनिवार्य-विषयोऽस्ति।**

सुमितः - परं मया तु **3. अस्मिन् विषये सदैव काठिन्यम् अनुभूतम्।**

सुमित: - अमित: तर्हि किमर्थं त्वं चिन्तामग्नः? **4. चित्रकलां गृहीत्वा स्वयोग्यतां प्रदर्शय।**

अमित: - **5. चित्रकलाया: माहात्म्यं तु प्रतिदिनं वर्धते एव।** (संवदन्तौ गृहं प्रति गच्छतः)

**अथवा**

**5 कथापूर्तिः**

| | | | | |
|---|---|---|---|---|
| (i) स्वभावेन | (ii) हितकार्याणि | (iii) मन्त्रिणः | (iv) शशकश्च | (v) वानरस्य |
| (vi) विलक्षणं | (vii) सहमतिम् | (viii) प्रतिदिनमेव | (ix) रिपू | (x) अभवताम् |

**संवादपूर्तिः**

**6.**

जनकः - पुत्र केशव! **(i) त्वम् एतावद्ध्यानेन किं पठसि** ?

पुत्रः - आम्, **(ii) एतेषु श्लोकेषु श्रीकृष्णस्य ज्ञानवर्धकाः उपदेशाः सन्ति।** ।

पुत्रः - आम्, जनक! **(iii) अस्य लेखकः महर्षिः वेदव्यासः अस्ति।** ।

पुत्रः - अहं मन्ये, **(iv) एतौ प्रसिद्धौ ग्रन्थौ 'रामायणम्' 'महाभारतम्' च स्तः** ।

पुत्रः - धन्यवादः पितः! **(v) अहं पठामि अतः जानामि।**

**अथवा**

**6 कथापूर्तिः**

| | | | | |
|---|---|---|---|---|
| (i) दुर्गं | (ii) लोभान्धे | (iii) अपश्यच्च | (iv) विशाले | (v) चरन्ति स्म |
| (vi) गोपालकः | (vii) नासिकोपरि | (viii) करोषि | (ix) गावस्तु | (x) दयारामः |

**संवादपूर्तिः**

**7.**

| | | | | |
|---|---|---|---|---|
| 1. करोषि | 2. विद्यालयस्य | 3.आपणं | 4.शाकफलानि | 5. सायंकाले |
| 6. तदा | 7. पूर्वमेव | 8. शीघ्रं | 9. मातुलः | 10. क्रीत्वा |

**अथवा**

**7 कथापूर्तिः**

| | | | | |
|---|---|---|---|---|
| (i) कक्षायां | (ii) छात्राः | (iii) भगवद्भक्ताविव | (iv) इच्छन्ति | (v) गुरुरपि |
| (vi) अतीव | (vii) सम्पूर्णविद्यालयस्य | (viii) ज्ञानस्तरः | (ix) वर्धयन्ति | (x) पुरस्कारयोग्यः |

**संवादपूर्तिः**

**8.**

| | | | | |
|---|---|---|---|---|
| (1) ध्वजारोहणं | (2) ध्वजः | (3) त्रिवर्ण: | (4) हरितः | (5) शौर्यस्य |
| (6) सात्त्विकतायाः | (7) अशोकचक्रं | (8) सारनाथे | (9) चतुर्विंशतिः | (10) गणतन्त्रदिवसे |

**अथवा**

**8 कथापूर्तिः**

| | | | | |
|---|---|---|---|---|
| (i) परिवारे | (ii) आसन् | (iii) प्रातराशं | (iv) प्रत्यावर्तन्ते | (v) खादित्वा |
| (vi) मूषकाः | (vii) 'आम्-आम्' | (viii) चञ्चलः | (ix) भो भ्रातरः! | (x) घटिकायां |

# 'ग' भागः- अनुप्रयुक्तव्याकरणम्

## सन्धिः/ सन्धिच्छेदः

### सन्धयः

स्वरसन्धयः - वृद्धिः, यण्, पूर्वरूपम् , अयादिः

व्यञ्जनसन्धयः - परसवर्णः , तुगागमः, वर्गीयप्रथमवर्णस्य तृतीयवर्णे परिवर्तनम्

विसर्गसन्धयः - उत्त्वम्, रत्त्वम्, लोपः, स् ,श्,ष्

व्याकरण के संदर्भ में 'सन्धि' शब्द का अर्थ है वर्ण विकार। यह वर्ण विधि है। दो पदों या एक ही पद में दो वर्षों के परस्पर व्यवधानरहित सामीप्य अर्थात् संहिता में जो वर्ण विकार (परिवर्तन) होता है, उसे सन्धि कहते हैं, यथा विद्या + आलयः = विद्यालयः। यहाँ पर विद्य आ आ लय: में आ आ की अत्यन्त समीपता के कारण दो दीर्घ वर्णों के स्थान पर एक 'आ' वर्ण रूप दीर्घ एकादेश हो गया है। सन्धि के मुख्यतया तीन भेद होते हैं-

1. स्वर सन्धि (अच् सन्धि), 2. व्यंजन सन्धि (हल् सन्धि), एवं 3. विसर्ग सन्धि

### स्वर (अच्) सन्धिः

दो स्वर वर्णों की अत्यंत समीपता के कारण यथाप्राप्त वर्ण विकार को स्वर सन्धि कहते हैं।

**वृद्धिः सन्धिः-**

अ, आ का ए, ऐ से मेल होने पर ऐ तथा अ, आ का ओ, औ से मेल होने पर औ हो जाता है। इसे वृद्धि संधि कहते हैं। जैसे -

| | | | |
|---|---|---|---|
| अ + ए = ऐ | एक + एक: = एकैक: | अ + ओ = औ | वन + औषधि: = वनौषधि: |
| अ + ऐ = ऐ | मत + ऐक्य: = मतैक्य: | आ + ओ = औ | महा + औषधि: = महौषधि: |
| आ + ए = ऐ | सदा + एव = सदैव | अ + औ = औ | परम + औषध: = परमौषध: |
| आ + ऐ = ऐ | महा + ऐश्वर्य: = महैश्वर्य: | आ + औ = औ | महा + औषध: = महौषध: |

**यण् सन्धिः-**

**(क)** 'इ / ई' के आगे कोई विजातीय (असमान) स्वर होने पर 'इ / ई' को 'य्' हो जाता है।

**(ख)** 'उ / ऊ' के आगे किसी विजातीय स्वर के आने पर 'उ / ऊ' को 'व्' हो जाता है।

**(ग)** 'ऋ / ॠ' के आगे किसी विजातीय स्वर के आने पर 'ऋ / ॠ' को 'र्' हो जाता है।

**(घ)** 'लृ' के आगे किसी विजातीय स्वर के आने पर 'लृ' को 'ल्' हो जाता है। इन्हें यण्-संधि कहते हैं।

| | | | |
|---|---|---|---|
| **इ + अ = य् + अ** | यदि + अपि = यद्यपि | उ + अ = व् + अ | अनु + अय: = अन्वय: |
| इ + आ = य् + आ | इति + आदि = इत्यादि | उ + आ = व् + आ | सु + आगतम् = स्वागतम् |
| **ई + अ = य् + अ** | नदी + अर्पण: = नद्यर्पण: | **उ + ए = व् + ए** | अनु + एषण: = अन्वेषण: |
| ई + आ = य् + आ | देवी + आगमनम् = देव्यागमनम् | ऋ + आ = र् + आ | पितृ + आज्ञा = पित्राज्ञा |
| लृ + अ = ल् + अ | लृ + अकार: = लकार: | ऋ + अ = र् + अ | मातृ + अनुगमनम्=मात्रनुगमनम् |

**अयादि सन्धिः-**

ए, ऐ और ओ, औ से परे किसी भी स्वर के होने पर क्रमशः अय्, आय्, अव् और आव् हो जाता है। इसे अयादि संधि कहते हैं।

| | | | |
|---|---|---|---|
| ए + अ = अय् + अ | ने + अनम् = नयनम् | ओ + अ = अव् + अ | पो + अन: = पवन: |

| | | | |
|---|---|---|---|
| ऐ + अ = आय् + अ | गै + अक: = गायक: | औ + अ = आव् + अ | पौ + अक: = पावक: |
| ऐ + इ = आय् + इ | नै + इका = नायिका | औ + इ = आव् + इ | नौ + इक: = नाविक: |

**पूर्वरूप सन्धि** :

पूर्वरूप सन्धि को अयादि सन्धि का अपवाद कहा जा सकता है। पद के अन्त में स्थित ए, ओ के बाद यदि ह्रस्व 'अ' आए तो 'ए+अ' दोनों के स्थान पर पूर्वरूप सन्धि 'ए' एकादेश तथा 'ओ+अ' दोनों के स्थान पर 'ओ' एकादेश हो जाता है। अर्थात् ए-ओ के पश्चात् आने वाला 'अ' अपना रूप ए-ओ में ही (विलीन कर) छुपा देता है। उस विलीन 'अ' का रूप लिपि में अवग्रह चिह्न (S) द्वारा अंकित किया जाता है, जैसे- हरे अत्र में हरयत्र होना चाहिए था परन्तु 'अ' 'ए' में समा गया और रूप बना हरेऽत्र। यहाँ उच्चारण के समय 'हरेत्र' ही कहा जाता है (अवग्रह का उच्चारण नहीं होता)।

**उदाहरण-**

ते + अपि = तेऽपि     हरे + अव = हरेऽव

वृक्षे + अपि = वृक्षेऽपि     जले + अस्ति = जलेऽस्ति

गोपालो (गोपालः) + अहम् = गोपालोऽहम्     विष्णो + अव = विष्णोऽव

**व्यञ्जन-सन्धि:**

जब पूर्वपद का अन्तिम वर्ण व्यञ्जन हो तथा उत्तरपद का पूर्व वर्ण स्वर या व्यञ्जन हो तो व्यञ्जन के परिवर्तन / विकार को 'व्यञ्जन सन्धि' कहते हैं; यथा-जगत्+ ईश:=जगदीश:

1. **परसवर्ण:-** (अनुस्वारस्य ययि परसवर्णः) अनुस्वार के बाद कोई भी वर्गीय व्यञ्जन आए तो अनुस्वार के स्थान पर आगे वाले वर्ण के वर्ग का पञ्चम वर्ण हो जाता है। यह नियम पदान्त में कभी नहीं भी लगता है।

उदाहरण-

पदान्त में - संस्कृतं पठति।     संस्कृतम्पठति

अं+ कितः ('+ क्= ङ्क) = अङ्कितः     संकल्पः (+ क्= ङ्क) =सङ्कल्पः

कुं + ठितः ( + ठ = ण्ठ) = कुण्ठितः     अं+ चितः (+ च् = ञ्च) = अञ्चितः

**2. वर्गीयप्रथमवर्णस्य तृतीयवर्णे परिवर्तनम् -**

यदि वर्ग के प्रथम अक्षर के बाद कोई स्वर अथवा वर्ग का तृतीय, चतुर्थी, पञ्चम अथवा य र ल व ह आए तो पहले वर्ण का अपने वर्ग का तृतीय वर्ण आदेश होता है;

यथा- वाक् + ईशः = वागीशः     उत् + योगः= उद्योगः     सत् + गति: = सद्गति:

षट् + आनन: = षडानन:     दिक् + भ्रम: = दिग्भ्रम:     अच् + अन्त: = अजन्त:

सुप् + अन्त: = सुबन्त:     महत् + अर्थम् = महदर्थम्

**3.तुगागम (तुक् - आगम) सन्धिः**

संस्कृत साहित्य में 'आगम' व 'आदेश' का बड़ा महत्त्व होता है। प्रचलन के अनुसार 'आगमः मित्रवत्' अर्थात् आगम मित्र की तरह विना किसी वर्ण का लोप किए ही शब्दों के बीच में आ जाता है।

**(क) 'तुक्' आगम की विधि-**

शब्द के अंत में स्थित 'न्' के पश्चात् यदि 'श' हो, तो उन दोनों के बीच में विकल्प से 'तुक्' का आगम होता है अर्थात् 'तुक्' का 'त्' जुड़ जाता है। साथ ही 'श्' को 'छ्' और 'श्चुत्व-सन्धि' का नियम भी लगता है। जैसे-

गच्छन् + शेते = गच्छञ्च्छेते , गच्छच्छेते     तिष्ठन् + शब्दायते = तिष्ठञ्छब्दायते

**(ख)'छ्' से पहले 'च्' का आगम**

यदि ह्रस्व स्वर के बाद 'छ्' हो, तो 'तुक्' का आगम होता है। 'तुक्' का 'त्' शेष रहता है। श्चुत्व सन्धि से 'त्' को 'च् हो जाता है। जैसे-

परि + छिदः = परि + तुक् + छिदः = परिच्छिदः अनु + छेदः = अनु + तुक् + छेदः= अनुच्छेदः

## विसर्गसन्धिः

द्वयोः वर्णयोः मेलनेन यदि किमपि परिवर्तनं भवति तर्हि तत् सन्धिः कथ्यते। यदि एतत् परिवर्तनं विसर्गस्य स्थाने भवति तर्हि सः विसर्गसन्धिः उच्यते।

### I. विसर्गस्य उत्वम्

ह्रस्वात् 'अ'कारात् परम् यदि विसर्गः, तदनन्तरं यदि ह्रस्वः 'अ'कारः / वर्गीयतृतीय-चतुर्थ-पञ्चमवर्णाः / अथवा य् र् ल् व् वर्णाः - एतेषु कोऽपि वर्णः आगच्छति तर्हि विसर्गस्य स्थाने 'उ'कारः आगच्छेत्।

| | | | | |
|---|---|---|---|---|
| अः | + | अ | = | विसर्गस्य स्थाने 'उ'<br>अकारस्य स्थाने 'ऽ' च |
| अः | | ग् / ज् / ड् / द् / ब् | = | विसर्गस्य स्थाने 'उ' |
| अः | + | घ् / झ् / ढ् / ध् / भ् | = | विसर्गस्य स्थाने 'उ' |
| अः | + | ङ् / ञ् / ण् / न् / म् | = | विसर्गस्य स्थाने 'उ' |
| अः | + | य् / र् / ल् / व् / ह् | = | विसर्गस्य स्थाने 'उ' |

1. सः + अवसत् = सः + अवसत्
स उ + अवसत् ( विसर्गस्य स्थाने उ )
सो + ऽवसत् (अ + उ =ओ > स + उ = सो एवं अकारस्य स्थाने ऽ )
सोऽवसत्

द्वितीयपदस्य 'अ'कारः अवग्रहः [ऽ] अभवत्।

2. बालः + धावति = बाल उ + धावति (अ + उ = ओ > बाल + उ = बालो )
बालो + धावति
बालो धावति

### उदाहरणानि

1. अन्यः + अपि = अन्योऽपि
2. क : + अत्र = कोऽत्र
3. रामः + गतः = रामो गतः
4. ततः + जम्बूकः = ततो जम्बूकः
5. ग्रन्थः + दर्पणः = ग्रन्थो डम्बरः
6. क्रुद्धः + दर्पेण = क्रुद्धो दर्पेण
7. अतः + बालिका = अतो बालिका
8. कृष्णः + घनश्यामः = कृष्णो घनश्यामः
9. अजः + झषः = अजो झषः
10. कः + ढक्काम् = को ढक्काम्
11. दशरथः + नामकः = दशरथो नामकः
12. ततः + मरणम् = ततो मरणम्
13. वृक्षः + वर्धते = वृक्षो वर्धते
14. सिंहः + गर्जति = सिंहो गर्जति
15. छात्रः + हसति = छात्रो हसति

**II.विसर्गस्य सत्वम् , शत्वम्, षत्वम् च ।**

1. विसर्गात् परं यदि स् / त् / थ् वर्ण: आगच्छति तर्हि विसर्गस्य स्थाने 'स्' भवति ।
2. विसर्गात् परं यदि श् / च् / छ् वर्ण: आगच्छति तर्हि विसर्गस्य स्थाने 'श्' भवति ।
3. विसर्गात् परं यदि ष् / ट् / ठ् वर्ण: आगच्छति तर्हि विसर्गस्य स्थाने 'ष्' भवति ।

| | | | | |
|---|---|---|---|---|
| विसर्ग: | + | स् / त् / थ् | = | विसर्गस्य स्थाने 'स्' |
| विसर्ग: | + | श् / च् / छ् | = | विसर्गस्य स्थाने 'श्' |
| विसर्ग: | + | ष् / ट् / ठ् | = | विसर्गस्य स्थाने 'ष्' |

**उदाहरणानि**

1. कृष्ण: + तदा = कृष्ण: + तदा
   कृष्ण स् + तदा
   कृष्णस्तदा

2. इत: + तत: = इत: + तत:
   इतस् + तत:
   इतस्तत:

3. क: + चन = क: + चन
   कश् + चन
   कश्चन

4. हरि: + शेते = हरि: + शेते
   हरिश् + शेते
   हरिश्शेते

5. धनु: + टङ्कार: = धनु: + टङ्कार:
   धनुष् + टङ्कार:
   धनुष्टङ्कार:

6. गज: + षष्ठ: = गज: + षष्ठ:
   गजष् + षष्ठ:
   गजष्षष्ठ:

**III. विसर्गस्य रत्वम्**

अ / आ भिन्नस्वरात् परं यदि विसर्ग:, तदनन्तरं स्वरा: / वर्गतृतीय / चतुर्थ / पञ्चमवर्णा: / अथवा य् र् ल् व् वर्णा: आगच्छन्ति तर्हि विसर्गस्य स्थाने 'र्' आगच्छति ।

| | | | | | |
|---|---|---|---|---|---|
| अ / आ भिन्नस्वर: | : | + | स्वरा: | = | विसर्गस्य स्थाने 'र्' |
| अ / आ भिन्नस्वर: | : | + | ग् / ज् / ड् / द् / ब् | = | विसर्गस्य स्थाने 'र्' |
| अ / आ भिन्नस्वर: | : | + | घ् / झ् / ढ् / ध् / भ् | = | विसर्गस्य स्थाने 'र्' |
| अ / आ भिन्नस्वर: | : | + | ङ् / ञ् / ण् / न् / म् | = | विसर्गस्य स्थाने 'र्' |
| अ / आ भिन्नस्वर: | : | + | य् / र् / ल् / व् | = | विसर्गस्य स्थाने 'र्' |

**उदाहरणानि**

१] नि: + बल: = निर् + बल: = निर्बल:

२] नि: + आशा = निर् + आशा = निराशा

३] पितु:  +  इच्छा  =  पितुर्  +  इच्छा  =  पितुरिच्छा

४] मुनि:  +  अयम्  =  मुनिर्  +  अयम्  =  मुनिरयम्

५] देवी:  +  उवाच  =  देवीर्  +  उवाच  =  देवीरुवाच

**IV.विसर्गलोप:**

अ]  'आ' कारात् परम् यदि विसर्ग:, तदनन्तरं  स्वरा: / वर्गतृतीय / चतुर्थ / पञ्चमवर्णा: / अथवा य् र् ल् व् ह्  वर्णा:  आगच्छन्ति तर्हि विसर्गस्य लोप: भवति ।

आ]  एवम् 'अ' कारात् परं यदि विसर्ग: तदनन्तरं 'अ'भिन्नस्वरा: चेत्  विसर्गलोप: ।

इ]  एष: / स:  पदस्य अनन्तरं 'अ'भिन्नवर्ण: भवेत् विसर्गलोप: ।

| | | | | | |
|---|---|---|---|---|---|
| आकारोत्तरम् | : | + | स्वरा: | = | विसर्गस्य लोप: |
| आकारोत्तरम् | : | + | ग् / ज् / ड् / द् / ब् | = | विसर्गस्य लोप: |
| आकारोत्तरम् | : | + | घ् / झ् / ढ् / ध् / भ् | = | विसर्गस्य लोप: |
| आकारोत्तरम् | : | + | ङ् / ञ् / ण् / न् / म् | = | विसर्गस्य लोप: |
| आकारोत्तरम् | : | + | य् / र् / ल् / व् / ह् | = | विसर्गस्य लोप: |
| आकारोत्तरम् | : | + | अ भिन्नस्वरा: | = | विसर्गस्य लोप: |
| एष | : | + | अ भिन्नवर्ण: | = | विसर्गस्य लोप: |
| स | : | + | अ भिन्नवर्ण: | = | विसर्गस्य लोप: |

**उदाहरणानि**

१] बाला:  +  अत्र  =  बाला  अत्र

२] वृद्धा:  +  यान्ति  =  वृद्धा यान्ति

३] सूर्य:  +  उदेति  =  सूर्य उदेति

४] राम:  +  आगच्छति  =  राम  आगच्छति

५] एष:  +  विष्णु:  =  एष विष्णु

६] स:  +  करोति  =  स  करोति

**अभ्यास प्रश्ना:**

**1.- अस्माकं सन्निधिं कुर्यात्**

(क) सत्+निधिम्  (ख) सन्+निधिम्  (ग) सन्नि+धिम्  (घ) सात् +धिम्

**2.- क्षयमायाति सम् +चयात्**

(क) सन्चयात्  (ख) सञ्चयात्  (ग) संचयात्  (घ) संचियात्

**3.-अतिदूरं किञ्चिद् दुर्गम् वनं प्रविष्ट:भवेत्**

(क) किम् +चित्  (ख)  कान्+चित्  (ग)  किम्+चित्  (घ)  कंचित्

**4.- षट्+एते पाठका: गुणा:**

(क)  षखेते  (ख)  षटेते  (ग)  षदेते  (घ)  षडेते

**5.- षड् ऋतव: एव मे नाभय:**

(क) षट्+ऋतव:  (ख)  षद् ऋतव:  (ग)  षत् ऋतव:  (घ)  षस् ऋतव:

**6.- स: चेत्+निरर्थकम् नीत:**

(क) चेदिरर्थकम्　(ख) चेन्निरर्थकम्　(ग)चेनिरर्थकम्　(घ)चेपिरनिरर्थकम्

**7.- क्रोधाद्भवति सम्मोह:**

( क) क्रोधाध्+भवति　(ख) क्रोधान् +भवति　(ग) क्रोधात्+भवति　(घ) क्रोधान् +भवति

**8.- वार्ष्णेय बलात्+इव नियोजित:**

(क) बलानिव　(ख) बलाधिव　(ग) बलानिव　(घ) बलादिव

**9.- प्रत्येक अयनस्य अवधि:षण्मासा**:

(क) षट्+मासा:　(ख) षद्+ मासा:　(ग) षण+मासा:　(घ) षस्+मासा:

**10.- धिग्युष्मान् ! अहमेव शिरोमणि:**

(क) धिख् युष्मान्　(ख) धिक् +युष्मान्　(ग) धिक् युष्मान　(घ) धिद् युष्मान

**11.- कृष्ण प्रमाथि बलवद् दृढम्**

(क) बलवात् +दृढम्　(ख) बलवान् +दृढम्　(ग) बलवन् +दृढम्　(घ) बलवत्+दृढम्

**12.- एतद् राजभवनं परित्ज्य वनम् गच्छाम:**

(क) एताद् +राजभवनम्　(ख) एतान्+ राजभवनम्　(ग) एतन् +राजभवनम्　(घ) ऐतन् +राजभवनम्

**13.- तदेतद् राजभवनम् गच्छाम:**

(क) तत्+एतद्　(ख) ताद् +एतद्　(ग) तात्+ऐतद्　(घ) न कोSपि

**14.-वाक् +मयम्**

(क) वाक्मयम्　(ख) वाङ्मयम्　(ग) वान्मयम्　(घ) वांगमयम्

**15.- दिग्गज:**

(क) दिन् +गज:　(ख) दिद्+गज:　(ग) दिक् +गज:　(घ) दिक+गज:

**16.-भवन्मनोरथ:**

(क) भबद् मनोरथ　(ख) भवद् +मनोरथ:　(ग) भावद् +मनोरथ:　(घ) भवत्+मनोरथ:

**17.- काकादन्य:**

(क) काकान्+ अन्य:　(ख) काकाथ+अन्य:　(ग) काकाध+अन्य:　(घ) काकात्+अन्य:

**18.- केचित्+दग्धा:**

(क)केचिद् दग्धा:　(ख) कोचिद् दग्धा:　(ग) केचिस् दग्धा:　(घ) केचिध् दग्धा:

## उत्तरकुञ्जिका

**व्यञ्जनसन्धे: अभ्यासप्रश्नानां उत्तराणि:>**

| | | |
|---|---|---|
| 1. (क) सत्+निधिम् | 7. (ग) क्रोधात्+भवति | 13. (क) तत्+एतद् |
| 2. (ख) सञ्चयात् | 8. (घ)बलादिव | 14. (ख) वाङ्मयम् |
| 3. (ग)किम्+चित् | 9. (क) षट्+मासा: | 15. (ग)दिक् +गज: |
| 4. (घ) षडेते | 10. (ख) )धिक् +युष्मान् | 16 . (क) भवत्+मनोरथ: |
| 5. (क) षट्+ऋतव: | 11. (घ) बलवत्+दृढम् | 17. (घ) काकात्+अन्य: |
| 6. (ख) चेन्निरर्थकम् | 12. (ग) एतन् +राजभवनम् | 18. (क)केचिद् दग्धा: |

**1.**

**अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत- (केवलं प्रश्नचतुष्टयम्)**

(i) जीवाः **सर्वेऽत्र** मोदन्ताम्।

(ii) प्रजहि **हि+एनं** ज्ञानविज्ञाननाशनम्।

(iii) **कश्चिद्** उद्दण्ड: बालकः उवाच।

(iv) **क्रोध एषः** रजोगुणसमुद्भवः।

(v) कथमिव पश्येयं **चक्षुः+हीनः।**

**2.**

**अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत- (केवलं प्रश्नचतुष्टयम्)**

**i )** सर्वदा **सन्निधिं** क्रियात् ।

(1) सत+निधिम् (ख) सत्+निधिम्

(ग)सद् +निधिम् (घ) सन् +निधिम्

**ii )** आदीयमानं धनं **निधनैकनिष्ठं** भवति ।

(क) निधनै + एकनिष्ठम् (ख) निधना + एकनिष्ठम्

(ग) निधने + एकनिष्ठम् (घ) निधन + एकनिष्ठम्

**iii )** अहमेव अत्र **वृष्टेरभिनन्दनं** करोमि ।

(क) वृष्टिः +अभिनन्दम् (ख) वृष्टेः+अभिनन्दम्

(ग) वृष्टे + अभिनन्दम् (घ) वृष्टौ +अभिनन्दम्

**iv )** कस्मिंश्चित् नगरे **चन्द्रो नाम** भूपतिःप्रतिवसति स्म ।

(क) चन्द्र + नाम (ख) चन्द्रो + नाम (ग) चन्द्रः+नाम (घ) चन्द्रस् + नाम

**v)** स:तु परिवारस्य **नयनम्** अस्ति |

(क) न + अनं (ख) ने+ अनम् (ग)नो + अनम् (घ) ना + अनम्

## पाठ्यपुस्तकस्थानि उदाहरणानि

| | | |
|---|---|---|
| सन्निधिम्= सत्+निधिम्, | कोशोऽयम्= कोशः+अयम् , | सञ्चयात्= सम्+चयात् |
| कोऽपि = कः+अपि, | व्ययतो वृद्धिमायाति = व्ययतः + वृद्धिमायाति, | |
| चन्दनरसो न= चन्दनरसः+ न, | चैव= च+एव, | पदच्छेदस्तु=पद + छेदः+ तु |
| षडेते = षट्+एते, | वाङ्मयम् = वाक्+मयम् , | तप उच्यते= तपः+उच्यते, |
| पाठका गुणाः= पाठकाः +गुणाः, | शिष्यः+ स्वमेधया =शिष्यस्स्वमेधया | सरस्तीरम् = सरः+तीरम्, |
| को भवितुमर्हति= कः+भवितुमर्हति | जागरूकोऽहम् = जागरूकः+अहम्, | काको न = काकः+न, |
| हंसो हंसः =हंसः+ हंसः, | कुक्कुटोऽपि = कुक्कुटः+अपि, | एकैकपक्षे = एक+एकपक्षे, |
| को भेदः = कः+भेदः , | एकोऽपि = एकः+अपि , | हानिस्ततोऽधिका= हानिः+ततः+अधिका, |
| चेन्निरर्थकम् = चेत्+निरर्थकम्, | सृष्टिरेषा= सृष्टिः+ एषा, | सर्वेऽत्र=सर्वे+अत्र |
| काकात्+अन्यः=काकादन्यः, | आदर्शः+ एव = आदर्श एव, | वृष्टेः+अभिनन्दम्=वृष्टेरभिनन्दनम्, |
| नर्तनात् + अन्यत् = नर्तनादन्यत्, | यदि +अहम् = यद्यहम्, | वस्तुतः+अहम्=वस्तुतोऽहम्, |
| विधात्रा+एव = विधात्रैव , | धिक्+युष्मान् =धिग्युष्मान्, | सर्वैः+एव=सर्वैरेव, |

प्रकृतिः + एव = प्रकृतिरेव, मिलित्वा+एव = मिलित्वैव, देशान्तरेभ्योऽपि=देशान्तरेभ्यः+अपि
गात्रेष्वपि=गात्रेषु+अपि, चक्षुर्हीनः= चक्षुः+ हीनः, चक्षुर्दानम्=चक्षुः+दानम्,
योऽन्यथा = यः+ अन्यथा, पापतरस्ततः=पापतरः+ ततः, चक्षुषोऽस्य=चक्षुषः+अस्य,
ततो महीपालः=ततः+ महीपालः, प्रत्यारोपणाय= प्रति+आरोपणाय, शक्रोऽहम् = शक्रः+ अहम्, तत्+
उच्यताम्= तदुच्यताम्, रतः+असौ=रतोऽसौ, सन्तुष्टः+अभवत्=सन्तुष्टोऽभवत्
जनाः+तम्=जनास्तम्, दानवीराः + सौभाग्यशालिनः = दानवीरास्सौभाग्यशालिनः,
ततः+महीपालः=ततो महीपालः चक्षुः+शनैः+अक्षतम्=चक्षुश्शनैरक्षतम्, आगतः+अस्मि=आगतोऽस्मि,
भवत्+मनोरथः=भवन्मनोरथः, सन्तुष्टः+अभवत्= सन्तुष्टोऽभवत्, निधन+एकनिष्ठम्=निधनैकनिष्ठम्,
चन्द्रो नाम = चन्द्रः+नाम , एको मेषः = एकः+मेषः, तदेतद् = तत्+एतद् ,
एतद् राजभवनम्=एतत्+राजभवनम्, मदोद्धताः=मद+उद्धताः, तच्छ्रुत्वा = तत्+श्रुत्वा,
यशो नृणाम्== यशः+नृणाम्, केचिद्दग्धाः=केचित्+दग्धाः, यथोचितम्=यथा+उचितम्,
पुत्राः+वानरक्रीडारताः= पुत्रा वानरक्रीडारताः, अहं+तु = अहन्तु, मेषः+वह्निना= मेषो वह्निना,
सह+एषः= सहैषः, सः+मेषः = स मेषः, रिपवः+सम्भाष्यन्ते= रिपवस्सम्भाष्यन्ते,
बलादिव = बलात्+इव, इहैव = इह+एव, सङ्गस्तेषु=सङ्गः+तेषु
क्रोधाद्भवति = क्रोधात्+भवति, इन्द्रियाण्यादौ= इन्द्रियाणि+आदौ, स सुखी = सः+ सुखी,
ध्यायतः+ विषयान्= ध्यायतो विषयान् , अत्रैव= अत्र+एव, किञ्चिद् दुर्गमवनम्=किञ्चित्+दुर्गमवनम्,
कश्चित् = कः+ चित्, तच्छिक्षया= तत्+शिक्षया, नैव= न+एव
अतोऽहम्=अतः+अहम्, वध्योऽसि= वध्यः+असि, प्रत्यवदत् = प्रति+अवदत्
नैतदस्त्रम्= न+एतत्+अस्त्रम्, ब्रह्मशिरो यत्र = ब्रह्मशिरः+ यत्र, पर्जन्यस्तद्= पर्जन्यः+तत्,
एतन्महाभुज =एतत्+महाभुज, स पापकर्मा=सः पापकर्मा, अग्निः+इव= अग्निरिव,
कीदृशः+अनर्थः = कीदृशोऽनर्थः, वञ्चितः+न = वञ्चितो न, कश्चित्+अपि = कश्चिदपि,
पितुः+उपदेशेन = पितुरुपदेशेन, स्तब्धः+ जातः = स्तब्धो जातः, भीमसेनः+ एकाकी = भीमसेन एकाकी,
इत्युक्तिस्तः =इति+उक्तिः, तदेवाहुः= तत्+एव+आहुः, विद्वांस एव=विद्वांसः+एव
भवेद्येन= भवेत्+येन, स विवेक इतीरितः= सः+विवेकः+इति ईरितः, अप्यकातरः= अपि+अकातरः,
परैर्न= परैः+ न, यः+ इच्छति + आत्मनः, कदा+अपि = कदाऽपि,
तपस्तेपे = तपः + तेपे , भवेद् यदि = भवेत्+यदि, योऽभ्युदीरयेत्= यः+अभि+उदीरयेत्
लोकेऽस्मिन् = लोके + अस्मिन्, शक्यो भवेत् = शक्यः + भवेत् ।

## उत्तरसंकेतः

### सन्धिः/ सन्धिच्छेदः

**1**

**अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत- (केवलं प्रश्नचतुष्टयम्)**

(i) सर्वे+अत्र (ii) ह्येनम् (iii) कः + चित् (iv) क्रोधः + एषः (v) चक्षुर्हीनः

**2.**

**अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत- (केवलं प्रश्नचतुष्टयम्)**

(i) (ख) सत्+निधिम् (ii) (घ) निधन + एकनिष्ठम् (iii) (ख) वृष्टेः+अभिनन्दम्
(iv) (ग) चन्द्रः+नाम (v) (ख)ने + अनम्

## समास: विग्रहो वा

### समासः

- तत्पुरुषः - विभक्तिः ,नञ् , उपपदः
- द्वन्द्वः
- अव्ययीभावः (अनु, उप, सह, निर् , प्रति ,यथा)

### समास:

'समसनम्' इति समासः। समास शब्द का अर्थ है - संक्षेपण। अर्थात् दो या दो से अधिक पदों में प्रयुक्त विभक्तियों, समुच्चय बोधक 'च' आदि को हटाकर एक पद बनाना। यथा- गायने कुशला = गायनकुशला। इसी तरह **राज्ञः पुरुषः = राजपुरुषः** पदों में विभक्ति-लोप, **सीता च रामश्च = सीतारामौ** में समुच्चय बोधक = च लोप हुआ है। इसी प्रकार **विद्या एव धनं यस्य सः = विद्याधनः** पद में कुछ पदों का लोप कर संक्षेपण क्रिया द्वारा गायनकुशला, **राजपुरुषः, सीतारामौ तथा विद्याधनः** पद बनाए गए है! कहीं-कहीं पदों के बीच की विभक्ति का लोप नहीं भी होता है। यथा **खेचरः, युधिष्ठिरः, वनेचरः** आदि। ऐसे समासों को अलुक्समास कहते हैं ।
पदों की प्रधानता के आधार पर समास के मुख्यतः चार भेद होते हैं।

(1) अव्ययीभाव (2) तत्पुरुष (3) द्वंद्व (4) बहुव्रीहि। तत्पुरुष के दो उपभेद भी हैं कर्मधारय एवं द्विगु। इस प्रकार सामान्य रूप से समास के छः भेद है

**1. अव्ययीभाव**

पूर्वपदप्रधानोव्ययीभाव:। अर्थात् अव्ययीभावसमासे पदद्वयं भवति। प्रथमं पदमव्ययं तथा उत्तरपदं सुबन्तं भवति। समासे सति पदद्वयमपि अव्ययं भवति।
(इस समास में पहला पद अव्यय होने के साथ ही साथ प्रधान भी होता है। समास होने पर समस्त पद अव्यय बन जाता है तथा नपुंसकलिङ्ग में प्रयुक्त होता है,)
यथा -

| **समस्तं पदम्** | – | **विग्रहवाक्यम्** | **समस्तं पदम्** | – | **विग्रहवाक्यम्** |
|---|---|---|---|---|---|
| यथाशक्ति | = | शक्तिम् अनतिक्रम्य | निर्विघ्नम् | = | विघ्नानाम् अभावः |
| उपगङ्गम् | = | गङ्गायाः समीपम् | अनुरूपम् | = | रूपस्य योग्यम् |
| प्रत्येकम् | = | एकम् एकम् प्रति | प्रतिगृहम् | = | गृहं गृहम् प्रति |
| निर्मक्षिकम् | = | मक्षिकाणाम् अभाव: | | | |

**2. तत्पुरुष समास:**

यस्मिन् समासे उत्तरपदं प्रधानं भवति स: तत्पुरूषसमास: । अत्र पदद्वयं भवति। प्रथमं पदं विविधासु विभक्तिषु भवति । अर्थात् अत्र द्वितीयांतमारभ्य सप्तम्यन्तं यावत् पूर्वपदै: सह सुबन्त: समस्यते । इस समास में प्राय: उत्तर पद की प्रधानता होती है। इसके दोनों पदों में अलग-अलग विभक्तियाँ होती हैं। कहीं- कहीं पर दोनों पदों में समान

विभक्ति भी होती है। ऐसी स्थिति में पूर्वपद की विभक्ति का लोप करके समस्त पद बनाया जाता है। इसमे द्वितीया से सप्तमी तक की विभक्ति का लोप करके समस्त पद बनाया जाता है।

**उदाहरण—**

**द्वितीया तत्पुरुष**:- श्रित: ,अतीत:, पतित:, गत: प्राप्त:, आपन्न: इत्यादिभि: सह द्वितीयान्तं पूर्वपदं समस्यते।

| **समस्तं पदम्** | – | **विग्रहवाक्यम्** | **समस्तं पदम्** | – | **विग्रहवाक्यम्** |
|---|---|---|---|---|---|
| शरणम् आगतः | - | शरणागत: | सुखं प्राप्तः | - | सुखप्राप्त: |

## तृतीया तत्पुरुष:

तृतीयान्त-अर्थ-कृत्-गुणवचनेन अर्थशब्देन, हीन-छिन्न-भिन्न-रहित-शून्य-युक्त-रचित-दग्ध-हृत-विद्ध-दंष्ट्र-आवृत-प्रणीत्-आच्छन्न-सदृश-सम-पूर्व-कलह-मिश्रित-सहितादिभिश्च तृतीयान्तं पूर्वपदं समस्यते। अर्थात् अत्रापि पदद्वयं भवति, पूर्वपदं तृतीयान्तं भवति परम् उत्तरपदं प्रधानं भवति।

| **समस्तं पदम्** | – | **विग्रहवाक्यम्** | **समस्तं पदम्** | – | **विग्रहवाक्यम्** |
|---|---|---|---|---|---|
| पित्रा युक्त | - | पितृयुक्त: | सर्पण दष्टः | - | सर्पदष्ट: |
| शरेण विद्धः | - | शरविद्ध: | अग्निना दग्धः | - | अग्निदग्ध: |
| धनेन हीनः | - | धनहीन: | विद्यया हीनः | - | विद्याहीन: |

## चतुर्थी तत्पुरुष:

तादर्थ्यार्थे बलि-हित-सुख-रहितादिसुबन्तपदै: सह चतुर्थ्यन्तपदस्य समास: चतुर्थीतत्पुरूषसमास: भवति।

| **समस्तं पदम्** | – | **विग्रहवाक्यम्** | **समस्तं पदम्** | – | **विग्रहवाक्यम्** |
|---|---|---|---|---|---|
| भूताय बलिः | - | भूतबलि: | दानाय पात्रम् | - | दानपात्रम् |
| यूपाय दारु | - | यूपदारु | स्नानाय इदम् | - | स्नानार्थम् |

## पञ्चमी तत्पुरुष:

पञ्चमी भयेन। अर्थात् भयादिसुबन्तपदै: सह पञ्चम्यन्तपदस्य समसनं पञ्चमी तत्पुरुषसमास: भवति।

| **समस्तं पदम्** | – | **विग्रहवाक्यम्** | **समस्तं पदम्** | – | **विग्रहवाक्यम्** |
|---|---|---|---|---|---|
| चौरात्भयम् | - | चौरभयम् | रोगात्मुक्तः | - | रोगमुक्त: |
| अश्वात्पतितः | - | अश्वपतित: | स्वर्गात्पतितः | - | स्वर्गपतित: |

## षष्ठी तत्पुरुष:

स्वस्वामिभावादिवाचकेन षष्ठ्यन्तपदेन सह सुबन्तपदं समस्यते । अर्थात् अत्र समर्थ: पदविधि: इति नियमेन सुबन्तेन सह षष्ठ्यन्तपदस्य समास: भवति।

| **समस्तं पदम्** | – | **विग्रहवाक्यम्** | **समस्तं पदम्** | – | **विग्रहवाक्यम्** |
|---|---|---|---|---|---|
| राज्ञः पुरुषः | - | राजपुरुष: | सुखस्य भोगः | - | सुखभोग: |
| नराणां पतिः | - | नरपति: | देवस्य पूजा | - | देवपूजा |

**सप्तमी तत्पुरुष:**

सप्तमी शौण्डै:। अर्थात् शौण्ड-धूर्त्त-कित्व-प्रवीण-संवीत-पटु-पण्डित-कुषल-निपुण-सिद्ध-शुष्कपक्वादिभि: सुबन्तै: सह सप्तम्यन्तं पदं समस्यते यत्र तत् सप्तमीतत्पुरूष:।

| समस्तं पदम् | – | विग्रहवाक्यम् | समस्तं पदम् | – | विग्रहवाक्यम् |
|---|---|---|---|---|---|
| शस्त्रे प्रवीणः | - | शास्त्रप्रवीण: | कार्ये कुशलः | - | कार्यकुशल: |
| जले मग्नः | - | जलमग्न: | सभायां पण्डितः | - | सभापण्डित: |

**नञ् तत्पुरुष:**

यत्र निषेधार्थबोधाय न,अन, अ, पदानां प्रयोग: भवति तत्र नञ् समास: भवति। यदि पूर्ववर्ण: व्यंजनवर्ण: भवति तर्हि अ एवं स्वरवर्ण: भवति तर्हि अन इत्यस्य प्रयोग: भवति। कदाचित् न इत्यस्यापि प्रयोग: भवति।

| समस्तं पदम् | – | विग्रहवाक्यम् | समस्तं पदम् | – | विग्रहवाक्यम् |
|---|---|---|---|---|---|
| न धार्मिकः | - | अधार्मिक: | न सुखम् | - | असुखम् |
| न आदिः | - | अनादि: | न सत्यम् | - | असत्यम् |

**उपपदसमास:**

अस्मिन् समासे उत्तरपदं क्रिया निर्मितं भवति , क्रियाया: लघुरूपं प्रयज्यते ।

| समस्तं पदम् | – | विग्रहवाक्यम् | समस्तं पदम् | – | विग्रहवाक्यम् |
|---|---|---|---|---|---|
| स्वर्णं करोति इति | - | स्वर्णकार: | जलं ददाति इति | - | जलद: |
| न गच्छति इति | - | नग: | पाठं करोति इति | - | पाठक: |
| नीरे जायते इति | - | नीरजम् | धुरं धारयति इति | - | धुरंधर: |

**3.द्वंद्व समास:**

अनेकं सुबन्तं ‘च’  अर्थे वर्तमाने वा समस्यते , स द्वंद्व: ।

जिस समस्त पद में दोनों पदों की प्रधानता होती है वहाँ द्वंद्व  समास होता है। इसके विग्रह में 'च' का प्रयोग होता है, जैसे लवश्च कुशश्च = लवकुशौ। यहाँ जितनी प्रधानता 'लव' की है उतनी ही प्रधानता 'कुश' की भी है।  द्वंद्व समास के दो रूप माने गए है - (1) इतरेतर द्वंद्व (2) समाहार द्वंद्व

**i) इतरेतर द्वंद्व जिस समस्त पद में दोनों पदों का अर्थं अलग-अलग होता है, उसे इतरेतर द्वंद्व कहते है।**

| समस्तं पदम् | – | विग्रहवाक्यम् | समस्तं पदम् | – | विग्रहवाक्यम् |
|---|---|---|---|---|---|
| पार्वती च परमेश्वरश्च | - | पार्वतीपरमेश्वरौ | रामश्च कृष्णश्च | - | रामकृष्णौ |
| धर्मश्च अर्थश्च कामश्च मोक्षश्च | - | धर्मार्थकाममोक्षाः | सीता च रामश्च | - | सीतारामौ |

**2) समाहार द्वंद्वः— अत्र समूहस्य प्रधानता भवति , बहूनां वस्तूनां समाहारः भवति।**

| **समस्तं पदम् – विग्रहवाक्यम्** | **समस्तं पदम् – विग्रहवाक्यम्** |
|---|---|
| आहारश्च निद्रा च भयं च इति, एतेषां समाहार = आहारनिद्राभयम् | पाणी च पादौ च = पाणिपादम् |
| यवाश्च चणकाश्च = यवचणकम् | पुत्रश्च पौत्रश्च = पुत्रपौत्रम् पीतम् |
| अम्बरम् यस्य सः - पीताम्बरः (कृष्णः) | चत्वारि मुखानि यस्य सः - चतुर्मुखः (ब्रह्मा) |

**1.**

**अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत - (केवलं प्रश्नचतुष्टयम्)**

(i) हिमाद्रितुङ्गशृङ्गैः सुशोभिता **सूर्योदयभूमिः** इयम्।

(क) सूर्यस्य भूमिः (ख) सूर्योदयस्य भूमिः (ग) सूर्योदयेन भूमिः (घ) सूर्योदयः भूमिः

(ii) वानराणां **यूथपः** सर्वान्वानरान्अवदत्।

(क) यूथस्य पतिः (ख) यूथं पिबति इति (ग) यूथं पाति इति (घ) यूथस्य पः

(iii) सर्वेषामपि महत्त्वं विद्यते **समयम् अनतिक्रम्य।**

(क) समयम् यथा (ख) यथासमयम् (ग) समयानुसारम् (घ) यथासमयः

(iv) सः **सकरुणम्** उच्चैः अक्रन्दत्।

(क) करुणया सह (ख) सह करुणम् (ग) करुणा सह (घ) सा करुणा

(v) ततः प्रविशतः **व्यासनारदौ** |

(क) व्यासः नारदः (ख) व्यासौ नारदौ च (ग) व्यासः नारदौ च (घ) व्यासः च नारदः च

**2.**

**अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत - (केवलं प्रश्नचतुष्टयम्)**

**i )** **राजादेशं** श्रुत्वा सर्वे भयत्रस्ताः ।

(क) राज्ञः आदेशं (ख) राज्ञा आदेशः (ग) राज्ञे आदेशः (घ) राजा आदेशं

**ii )** तच्छुत्त्वा परद्रव्ये **अनासक्ता** सा न्यवेदयत ।

(क) आसक्ता न भविष्यति (ख) न आसक्ता (ग ) आसक्ता न (घ) आसक्ता न भवति

**iii )** **अहर्निशं** महानसं प्रविश्य यत् पश्यति तद् वक्ष्यति ।

(क) अहश्च निशा च (ख) अहश्च निशा (ग) अहश्च निशा अपि (घ) अहश्च निशा एव

**iv )** अस्य सर्वं **क्रियाकलापं** पश्यामि ।

(क) क्रिया कलापः (ख) क्रियाणां कलापः (ग) क्रियस्य कलापः (घ) कार्यं कलापः

**v)** अत्र **नतोन्नते** विषमे मार्गे क्रीडथ।

(क) नते च उन्नते च (ख) नते उन्नते अपि (ग) नतः उन्नत एव (घ) नतः सह उन्नतः

## पाठ्यपुस्तकस्थानि उदाहरणानि

अक्षरव्यक्तिः [अक्षराणां व्यक्तिः, ष०त०]
अर्थविज्ञानम् [अर्थस्य विज्ञानम्, ष०त०]
ब्रह्माण्डम् [ब्रह्मणः अण्डम्, ष०त० पु०]
लोकयात्रा [लोकस्य यात्रा, ष०त०पु०]
व्रणविरोपणे [व्रणस्य विरोपणे, ष०त०पु०]
पदच्छेदः [पदानां छेदः, ष०त०]
चञ्चुदेशे [चञ्चोः देशे (स्थाने), ष०त०पु०]
राजादेशम् [राज्ञः आदेशः तम्, ष०त०पु०]
पदच्छेदः [पदानां छेदः, ष०त०]
अपूर्वः [न पूर्वः, नञ् त०पु०]
प्रियहितम् [प्रियं च हितं च, द्वन्द्वः]
सत्त्वहितैषिता [सत्त्वानां हितैषिता ष०त.पु.]
आशान्वितः [आशया अन्वितः, तृ०त०पु०]
अनृतम् [न ऋतम्, नञ् त०पु०]
अमेध्यम् [न मेध्यम्, नञ् त०पु०]
अशुद्धम् [न शुद्धम्, नञ् त०पु०]
काकचेष्टा [काकस्य चेष्टा, ष०त०पु०]
केकारवम् [केकायाः रवः तम्, ष०त०पु०]
चञ्चुदेशे [चञ्चोः देशे (स्थाने), ष०त०पु०]
मेषयूथम् [मेषाणां यूथः तम्, ष०त०]
सेतुनिर्माणम् [सेतोः निर्माणम्, ष०त०पु०]
शालिचूर्णम् [शालेः चूर्णम्, ष०त०पु०]
वैद्योक्तविधिना [वैद्येन उक्तः तृ०त०पु०; वैद्योक्तः च असौ विधिः तेन, कर्मधा०]
शास्त्रपारङ्गतः [ शास्त्राणाम् शास्त्रेषु पारङ्गतः ष०/स०त०पु०]
जनकल्याणकर्मसु [जनानां कल्याणम्, जनकल्याणस्य कर्मसु, ष०त०पु०]
अनुद्वेगकरम् [न उद्वेगकरम्, नञ् त०पु०, उद्वेगं करोति इति उद्वेगकरः, उप०त०पु०]
चारुवर्तुलचन्द्रिकाशोभितानाम् [चारुभिः वर्तुलाभिः चन्द्रिकाभिः शोभितानाम् तृ०त०पु०]
नीरक्षीरविवेके [नीरञ्च क्षीरञ्च नीरक्षीरे (द्वन्द्वः) तयोः विवेकः, ष०त०पु०]
जिह्वालोलुपतया [जिह्वायाः लोलुपता तया, ष०त०पु०]
ज्ञानाञ्जनशलाकया [ज्ञानम् एव अञ्जनम्, कर्मधा० तस्य शलाका तया, ष०त०पु०
ज्वालमालाकुलाः [ज्वालानां माला ष०त०पु०, ताभिः आकुलाः, तृ०त०पु०]

### उत्तरसंकेतः

### समासः विग्रहो वा

**1.**

(i) (ख) सूर्योदयस्य भूमिः
(ii) (ग) यूथं पाति इति
(iii) (ख) यथासमयम्
(iv) (क) करुणया सह
(v) (घ) व्यासः च नारदः च

**2.**

(i) (क) राज्ञः आदेशं
(ii) (ख) न आसक्ता
(iii) (क) अहश्च निशा च
(iv) (ख) क्रियाणां कलापः
(v) (क) नते च उन्नते च

## प्रकृति-प्रत्ययौ संयोगः विभागः

**<u>प्रत्ययाः</u>**

- **<u>कृत्प्रत्ययौ</u> - तव्यत् , अनीयर्**
- **<u>तद्धिताः</u> – मतुप्, ठक् ,त्व ,तल्**
- **<u>स्त्रीप्रत्ययौ</u> – टाप् , ङीप्**

**1.**

**अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत- (केवलं प्रश्नचतुष्टयम्)**

(i) रामेण पाठः **<u>लेखितव्यम्</u>** l

(क) लिख् + तव्यत् (ख)लिख् + टाप्
(ग) लिख् + ङीप् (घ) लिख् + इक्

(ii) विद्वांस एव **<u>चक्षुष्मन्तः</u>** प्रकीर्तिताः।

(क) चक्षुस्+मत् (ख) चक्षुः+मतुप्
(ग) चक्षुर+मतुप् (घ) चक्षुस्+मतुप्

(iii) ईटा हि यस्यास्ति **<u>पुर+ङीप्</u>** प्रधाना।

(क) पुरा (ख) पुरः
(ग) पुरी (घ) पूर्णा

(iv) असिन् अवसरे **<u>समाज्+ठक्</u>** कार्यं क्रियते।

(क) सामाजिकम् (ख) सामाजिकः
(ग) सामाजिकी (घ) सामाजिका

(v) **<u>अवक्रता</u>** यथा चित्ते तथा वाचि भवेत्।

(क) अवक्र+टाप् (ख) अवक्र+तल्
(ग) अवक्र+ङीप् (घ) अवक्र+त्व

**2.**

**अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत- (केवलं प्रश्नचतुष्टयम्)**

(i) **<u>रमणीया</u>** हि सृष्टिरेषा।

(क) रमण+इया (ख) रमणी+या (ग) रमणीय +टाप् (घ) रमण+ईया

(ii) **<u>राजहंसी</u>** – भर्तः! काकात् अन्यः को भवितुमर्हति ?।

(क) राजहंस + ई (ख) राजहंस + ईप् (ग) राजहंस + ईन् (घ) राजहंस + ङीप्

(iii) परद्रव्ये **<u>अनासक्ता</u>** सा न्यवेदयत ।

(क) अनासक्त+आ (ख) अनासक्त+डाप् (ग) अनासक्त + टाप् (घ) अनासक्त+ ङीप्

(iv) अहं **भाग्यवान्** अस्ति ।

(क) भाग्य + मान्　　(ख) भाग्य + मतुप्　　(ग) भाग्य + टाप्　　(घ) भाग्य + वान्

(v) सर्वैः जलं **रक्षणीयम् ।**

(क) रक्ष् + तव्यत्　　(ख)रक्ष् + टाप्　　(ग) रक्ष् + अनीयर्　　(घ) रक्ष् + तल्

## उदाहरणानि

### तव्यत् (तव्य ) तथा अनीयर् (अनीय)

चाहिए या योग्य के अर्थों में धातु में तव्यत् (तव्य) तथा अनीयर् (अनीय) प्रत्ययों का योग किया जाता है।

**उदाहरण-**

गम् + तव्यत् = गंतव्यम्　　दा + तव्यत् = दातव्यम्

पठ् + तव्यत् = पठितव्यम्　　हस् + तव्यत् =हसितव्यम्

रक्ष + तव्यत्= रक्षितव्यम्　　जि + तव्यत् = जेतव्यम्

गम् + अनीयर् = गमनीयम्　　पठ् + अनीयर् = पठनीयम्

हस् + अनीयर् = हसनीयम्　　रक्ष + अनीयर् = रक्षणीयम्

जि + अनीयर् = जयनीयम्　　दा + अनीयर् = दानीयम्

### मतुप् (मत्)

'वाला' अर्थात् 'इसके पास है', इस अर्थ में स्वरान्त शब्दों से 'मतुप्' प्रत्यय का योग किया जाता है। 'उप्' का लोप होकर शब्दों से केवल 'मत्' जुड़ता है।

**उदाहरण-**

शक्ति + मतुप् = शक्तिमत् (शक्तिमान्), शक्तिवाला　　श्री + मतुप्= श्रीमत् (श्रीमान्), श्रीवाला

धी + मतुप्=धीमत् (धीमान्), बुद्धिवाला　　बुद्धि + मतुप्= बुद्धिमत् (बुद्धिमान्), बुद्धिवाला

मधु + मतुप्= मधुमत् (मधुमान्), मधुवाला　　इक्षु + + मतुप्= इक्षुमत् (इक्षुमान्), गन्नेवाला

कीर्ति + मतुप्= कीर्तिमत् (कीर्तिमान्), कीर्तिवाला

**वतुप् (वत्)-** अर्थ में अकारान्त तथा अनेक हलन्त शब्दों से 'वतुप्' (वत्) प्रत्यय होता है ।'शब्दान्त' या 'उपधा' में अ/आ या होने पर मतुप् के स्थान पर 'वतुप्' प्रत्यय लगता है।

**उदाहरण-**

धन + वतुप्= धनवत् (धनवान्), धनवाला　　बल + वतुप्= बलवत् (बलवान्), बलवाला

रूप + वतुप् = रूपवत् (रूपवान्), रूपवाला　　विद्या + वतुप्= विद्यावत् (विद्यावान्), विद्यावाला

गुण + वतुप्= गुणवत् (गुणवान्), गुणवाला

मतुप्, वतुप् प्रत्ययों से युक्त शब्दों के रूप पुँल्लिङ्ग में 'भवत्', स्त्रीलिङ्ग में 'नदी' तथा नपुंसकलिङ्ग में 'जगत्' शब्द के समान चलते हैं।

## ठक् (इक)

शब्दों से भाव अर्थ में 'ठक्' प्रत्यय का विधान किया जाता है। ठक् का 'इक' हो जाता है तथा शब्द के आदि स्वर की वृद्धि होती है।

उदाहरण-

वाच् + ठक्= वाचिक | शरीर + ठक् = शारीरिक | धर्म + ठक् = धार्मिक

कर्म + ठक् = कार्मिक | नगर + ठक्= नागरिक | भूत + ठक् = भौतिक

अध्यात्म + ठक् = आध्यात्मिक

## त्व तथा तल्

भाववाचक संज्ञा बनाने के लिए शब्दों से 'त्व' और 'तल्' (ता) प्रत्ययों का योग किया जाता है।

उदाहरण-

| शब्दः | त्व-प्रत्ययः | तल्-प्रत्ययः |
|---|---|---|
| मूर्ख | मूर्खत्वम् | मूर्खता |
| विद्वस् | विद्वत्वम् | विद्वत्ता |
| पवित्र | पवित्रत्वम् | पवित्रता |
| पशु | पशुत्वम् | पशुता |
| महत् | महत्त्वम् | महत्ता |
| लघु | लघुत्वम् | लघुता |
| गुरु | गुरुत्वम् | गुरुता |
| मित्र | मित्रत्वम् | मित्रता |

'त्व' प्रत्ययान्त शब्द नपुंसकलिङ्ग में होते हैं। इनके रूप 'फल' शब्द की तरह चलते हैं।

'ता' प्रत्ययान्त शब्द स्त्रीलिङ्ग में होते हैं। इनके रूप 'रमा' शब्द की तरह चलते हैं।

## स्त्रीप्रत्यय

पुँल्लिङ्ग शब्दों में जिन प्रत्ययों को लगाकर स्त्रीलिङ्ग या स्त्रीवाचक शब्द बनाए जाते हैं, उन्हें स्त्री प्रत्यय कहते हैं।

### 1. टाप् (आ)

अकारान्त पुँल्लिङ्ग शब्दों से स्त्रीलिङ्ग शब्द बनाने के लिए टाप् 'आ' प्रत्यय लगाया जाता है।

**उदाहरण-**

अश्व + टाप् (आ) = अश्वा | सुत + टाप् (आ)= सुता | सरल + टाप् (आ)= सरला

यदि पुल्लिङग शब्द के अन्त में 'अक' हो तो 'आ' प्रत्यय लगने पर 'इका' हो जाता है।

**उदाहरण-**

बालक + आ= बालिका | मूषक + आ= मूषिका | शिक्षक + आ= शिक्षिका

साधक + आ= साधिका		गायक + आ= गायिका		नायक + आ= नायिका

**2. ङीप् (ई)**

ऋकारान्त एवं नकारान्त पुंल्लिङ्ग शब्दों को स्त्रीलिङ्ग शब्द में बदलने के लिए 'ई' प्रत्यय लगाया जाता है।

**उदाहरण-**

कर्तृ + ई=कर्त्री		दातृ + ई=दात्री		धातृ + ई=धात्री

तपस्विन् + ई=तपस्विनी		गुणिन् + ई=गुणिनी

अकारान्त पुँल्लिङ्ग शब्दों तथा कतिपय जातिवाचक शब्दों में भी 'ई' प्रत्यय लगाकर स्त्रीलिङ्ग शब्द बनाया जाता है।

**उदाहरण-**

हंस +ई =हंसी		नद + ई= नदी		देव + ई=देवी

भयङ्कर+ई=भयङ्करी		गोप + ई=गोपी		महिष + ई=महिषी

ब्राह्मण + ई= ब्राह्मणी		मृग + ई=मृगी

**उत्तरसंकेतः**

**प्रकृति-प्रत्ययौ संयोगः विभागः**

**1.**

**प्रत्ययाः (केवलं प्रश्नचतुष्टयम्)**

(i) (क) लिख् + तव्यत्		(ii) (घ) चक्षुस्+ मतुप्		(ii) (ग) पुरी

(iv) (क) सामाजिकम्		(v) (ख) अवक्र+तल्

**2.**

**प्रत्ययाः (केवलं प्रश्नचतुष्टयम्)**

(i) (ग) रमणीय +टाप्		(ii) राजहंस + ङीप्		(ii) अनासक्त + टाप्

(iv) (ख) भाग्य + मतुप्		(v) (ग) रक्ष् + अनीयर्

**वाच्यानुसारम् उचितपदैः रिक्तस्थानपूर्तिः**

**1.**

**वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत -**

आदित्यः - वैभव! इदानीं त्वया किं क्रियते ?

वैभवः - आदित्य! अधुना तु मया (i) ---------- क्रियते। का वार्ता ?

आदित्यः- नास्ति विशेषः। (ii) ---------- क्रीडितुं बहिः गम्यते, त्वमपि आगच्छ।

वैभवः - न। श्वः मम परीक्षा भविष्यति अतः अद्य (iii) ---------- सम्पूर्णदिने पठामि।

आदित्यः- अस्तु, किन्तु त्वं किं पठसि ?

वैभवः - गणितविषयस्य परीक्षा भविष्यति अतः मया गणितविषयः(iv) ----------।

**मञ्जूषा** | अस्माभिः, पठ्यते, अध्ययनम्, अहम्

**2.**

**वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत -**

गायत्री- सन्ध्ये ! किं.................. ओदनं पचसि ?

सन्ध्या - आम् ! मया ओदनः ---------।

गायत्री - तदनन्तरं त्वं किं करिष्यसि ?

सन्ध्या – तदनन्तरम्.....................गीता पठिष्यते।

गायत्री - ह्यः अहमपि गीताम् -----------|

**मञ्जूषा** | पच्यते, मया, त्वम्, अपठम्,

## वाच्य-परिवर्तनम्

अभिव्यक्ति या कथन के प्रकटीकरण की विधा को वाच्य कहते हैं। संस्कृत में वाच्य तीन तरह के होते हैं-

**1. कर्तृवाच्य-** इस वाच्य में कर्ता प्रधान होता है तथा क्रिया कर्ता के अनुसार प्रयुक्त होती है। इसके कर्ता में प्रथमा विभक्ति तथा कर्म में द्वितीया विभक्ति का प्रयोग होता है।

यथा - रामः गृहं गच्छति।

इस वाक्य में 'राम' कर्ता और 'गृहम्' कर्म है। इसकी क्रिया 'गच्छति' कर्ता 'राम' के अनुसार एकवचन की है।

बालिका पाठम् पठितवती।

इस वाक्य में 'बालिका' कर्ता तथा 'पाठम्' कर्म तथा 'पठितवती' क्रिया है।

सैनिकः देशं रक्षति।

इस वाक्य में 'सैनिकः' कर्ता 'देशम्' कर्म तथा 'रक्षति' क्रिया है।

**2. कर्मवाच्य-** कर्मवाच्य में कर्म की प्रधानता होती है, अतः कर्म में प्रथमा तथा कर्ता में तृतीया विभक्ति का प्रयोग होता है। यहाँ क्रिया का प्रयोग कर्म के अनुसार होता है। जिस लिङ्ग, पुरुष तथा वचन में कर्म होता है, उसी लिङ्ग, पुरुष तथा वचन में क्रिया का प्रयोग होता है।

यथा -रामेण गृहं गम्यते। विद्यार्थिना पाठः पठ्यते। मया चित्रे दृश्येते।

इन वाक्यों में क्रमशः गृहम्, पाठः तथा चित्रे कर्म हैं। अतः प्रथम दो वाक्यों में कर्म के एकवचन के अनुसार क्रिया भी एकवचन में तथा तीसरे में चित्रे में द्विवचन के कारण क्रिया भी द्विवचन में प्रयुक्त है।

**3. भाववाच्य-** भाववाच्य के कर्ता में तृतीया विभक्ति का प्रयोग होता है। भाववाच्य में क्रिया का अर्थ या भाव ही प्रधान होता है, क्रिया प्रथम पुरुष एकवचन में ही प्रयुक्त होती है। भले ही कर्ता एकवचन में हो या बहुवचन में।

यथा - (मया / त्वया / युवाभ्याम् / आवाभ्यां / अस्माभिः /तैः) सुप्यते/ आस्यते।

वाच्य परिवर्तन के नियम - कर्तृवाच्य में वर्तमानकाल की क्रियाओं को

यदि कर्मवाच्य में परिवर्तित किया जाता है तो होता है, तो क्रियाओं में इस प्रकार परिवर्तन होता है।

उदाहरण-

| कर्तृवाच्य की क्रिया | कर्मवाच्य / भाववाच्य की क्रिया |
|---|---|
| पठति | पठ्यते |
| लिखति | लिख्यते |
| खादति | खाद्यते |
| भवति | भूयते |
| धावति | धाव्यते |
| हसति | हस्यते |
| करोति | क्रियते |
| क्रीणाति | क्रीयते |
| नयति | नीयते |
| गच्छति | गम्यते |
| उत्पतति | उत्पत्यते |
| रोदिति | रुद्यते |

**उत्तरसंकेत:**

**वाच्यानुसारम् उचितपदैः रिक्तस्थानपूर्तिः**

**1.वाच्यम् (केवलं प्रश्नत्रयम्)**

(i) अध्ययनम्  (ii) अस्माभिः  (iii) अहम्  (iv) पठ्यते

**2. वाच्यम् (केवलं प्रश्नत्रयम्)**

(i) त्वम्  (ii) पच्यते  (iii) मया  (iv) अपठम्

**समयः / कालबोधकशब्दलेखनम्**

**1.**

**कालबोधकशब्दैः अधोलिखित-दिनचर्यां पूरयत- (केवल प्रश्नत्रयम्)**

(i) सौम्या प्रात: ------- 4:00 वादने उत्तिष्ठति।

(ii) ततः सा --------- 05:15 वादने योगाभ्यासं करोति।

(iii) तदनन्तरं सा ---------- 7:45 वादने विद्यालयं गच्छति।

(iv) ----------- 2:30 वादने आगत्य सा पुनः भोजनं करोति।

**2.**

**कालबोधकशब्दैः अधोलिखित-दिनचर्यां पूरयत- (केवल प्रश्नत्रयम्)**

(i) अहं नित्यं रात्रौ (8:30) ............ भोजनं करोमि।

(ii) तदनन्तरं (8:45) ............ भ्रमणाय गच्छामि।

(iii) तदा (9:30) ............ मनोरञ्जनाय दूरदर्शनं पश्यामि।

(iv) दूरदर्शनं दृष्ट्वा (10:00) ............ पठनं करोमि।

**3**

**कालबोधकशब्दैः अधोलिखित-दिनचर्यां पूरयत- (केवल प्रश्नत्रयम्)**

(i) 10:15 .............अल्पाहारं करोमि |

(ii) 12:30 ....................भोजनं खादामि |

(iii) 4:00 .................. भ्रमणाय गच्छामि |

(iv) 8:45 .................... पठामि |

**उत्तरसंकेतः**

**समयः / कालबोधकशब्दलेखनम्**

**1.**

**समयः (केवलं प्रश्नत्रयम्)**

(i) चतुर्वादने (ii) सपाद-पञ्चवादने (iii) पादोन-अष्टवादने (iv) सार्ध-द्विवादने

**2.**

**कालबोधकशब्दाः**

(1) अहं नित्यं रात्रौ (8:30) सार्ध-अष्टवादने भोजनं करोमि।

(ii) तदन्तरं (8:45) पादोन-नववादने भ्रमणाय गच्छामि।

(iii) तदा (9:30) सार्ध-नववादने मनोरञ्जनाय दूरदर्शनं पश्यामि।

(iv) दूरदर्शनं दृष्ट्वा (10:00) दशवादने पठनं करोमि।

**3.**

**कालबोधकशब्दैः अधोलिखित-दिनचर्यां पूरयत- (केवल प्रश्नत्रयम्)**

(i) सार्ध नव (ii) सपाद सप्त (iii) अष्ट (iv) पादोन दश

## अव्ययपदैः रिक्तस्थानपूर्तिः

संस्कृत के वे शब्द जो सर्वदा एक जैसे ही रहते हैं (जिनमें विभक्ति, वचन तथा लिङ्ग के आधार पर कोई परवर्तन नहीं होता है।) उन्हें अव्यय कहते हैं-

**सदृशं त्रिषु लिङ्गेषु, सर्वासु च विभक्तिषु ।**
**वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ।।**

| **अव्यय** | **अर्थ** | **अव्यय** | **अर्थ** |
|---|---|---|---|
| अचिरम् | शीघ्र ही | यावत् | जब तक |
| तावत् | तब तक | सहसा | अचानक |
| श्वः | आने वाला कल | शनैः शनैः | धीरे-धीरे |
| अत्र | यहाँ | इदानीम् | इस समय |
| अत्यन्तम् | बहुत | अथ | आरम्भ या इसके बाद |
| अलम् | निषेधार्थक (योगे तृतीया वि.) पर्याप्त, समर्थ (योगे चतुर्थी विभक्ति) | | |

**अव्ययपदानां प्रयोगः-**

अहं **श्वः** वाराणसीं गमिष्यामि।

**सहसा** निर्णयः न करणीयः ।

**यद्यपि अद्य** अवकाशः अस्ति **तथापि** अहं कार्यमुक्तः नास्मि।

**अत्र** आगच्छ।

कुक्कुरः **इतस्ततः** भ्रमति।

**अधुना** गल्पं **न** करणीयम्।

कक्षायां **तूष्णीम्** तिष्ठ।

**अद्य प्रभृति** अहं धूमपानं **न** करिष्यामि।

**शीघ्रं** कार्यं समापय **अन्यथा** विलम्बः भविष्यति।

**यदा** अहं गमिष्यामि **तदा** सः **अत्र** आगमिष्यति।

**ह्यः** मम गृहे उत्सवः आसीत्।

**इदानीम्** अहं संस्कृत पठामि।

**अथ** रामायणकथा आरभ्यते ।

अहं **कुत्रापि न** गमिष्यामि।

**यत्र-यत्र** धूमः **तत्र-तत्र** अग्निः।

**नक्तम्** दधि **न** भुञ्जीत ।

तौ **परस्परम्** आलपतः।

**वृथा** कलहम् **मा** कुरु।

अहं त्वाम् **भूयोभूयः** नमामि।

सः **मुहुर्मुहुः** किम् पश्यति ?

यहाँ यह भी ध्यातव्य है कि यकार एवं तकार वाले, जैसे कि यद्यपि तथापि, यथा-तथा, यदि-तर्हि, यत्र-तत्र, यावत्-तावत्, यदा-तदा इत्यादि अव्ययों का वाक्यों में प्रयोग प्रायशः एक साथ ही करना चाहिए, अन्यथा वाक्य अपूर्ण ही रहता है।

**1.**

**मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत - (केवलं प्रश्नचतुष्टयम्)**

(i) प्राणत्राणाय अश्वाः ----------- अधावन्।

(ii) यूयं सर्वे ------- मम प्रियाः ।

(iii) अभ्यासेन तु कौन्तेय वैराग्येण ---------- गृह्यते।

(iv) अर्जुन! त्वम्--------मुञ्च ब्रह्मास्त्रम् एतत् निवारयितुम्।

(v) ----------विषादं त्यक्त्वा उद्यमः क्रियताम्।

**मञ्जूषा** इदानीम्, अपि, इतस्ततः, एव, च

**2.**

**मञ्जूषायां प्रदत्तै: उचितैः अव्ययपदै: अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत - (केवलं प्रश्नचतुष्टयम्)**

(i) ते सभायां ------------------------ मा वदेयुः।

(ii) यदि त्वं मां मुक्त्वा यासि ------------------------ वेलाप्यवेला स्यात्।

(iii) यूयम् ------------------------ प्रयासं कुरुत।

(iv) मार्गेषु ------------------------ अवकरं न क्षिपेयुः।

(v ) मोहन: --------------------- ग्रामम् गमिष्यति |

मञ्जूषा

| तदा, इतस्ततः, श्वः, वृथा, अपि |
|---|

**उत्तरसंकेत:**

**अव्ययपदै: रिक्तस्थानपूर्ति:**

**1.**

(i) इतस्ततः (i) एव (ii) च (iv) अपि (v) इदानीम्

**2.**

(i) वृथा (ii) तदा (iii) अपि (iv) इतस्ततः (v ) श्व:

**अशुद्धिसंशोधनम्**

**1**

***अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत- (प्रश्नत्रयम्)**

(i) प्रबुद्धौ **ते** दम्पती आश्चर्येण अतिष्ठताम्।

(क) सा (ख) तौ (ग) ताः (घ) तानि

(ii) कुमार्गम् आश्रितस्य मम **कीदृश:** इयं क्लेशपरम्परा।

(क) कीदृशम् (ख) कीदृश्यः (ग) कीदृशाः (घ) कीदृशी

(iii) त्वं नर्तनात् अन्यत् किम् अपरं **जानाति**?

(क) जानन्ति (ख) जानन्ति (ग) जानामि (घ) जानासि

(iv) राजा वैद्यान् आहूय **पृच्छतु**।

(क) अपृच्छत् (ख) प्रक्ष्यन्ति (ग) अपृच्छ: (घ) अपृच्छन्

**2**

**अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत।**

(i) पवनं वेगेन वहति।

(a) पवन (b) पावनम् (c) पवन: (d) पवनेन

(ii) अहं आम्रं खादति।

(a) खादामि (b) खादतः (c) खादसि (d) खादामः

(iii) मोहनः गृहं तत्रास्ति |

(a) मोहनम् (b) मोहनात् (c) मोहने (d) मोहनस्य

(iv) भवान् श्वः कुत्र गच्छति ?

(a) गमिष्यति (b) अगच्छत् (c) गच्छतु (d) गमिष्यति

**3**

**अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितं पदं चित्वा वाक्यानि पुनः लिखत-**

**(i)** अभीष्टवस्तूनि प्राप्य याचकाः सन्तुष्टाः आसीत्।

(क)आसीत् (ख) अस्ति (ग) आसन् (घ) स्यात्

**(ii)** दानशालासु विचरन् राजा अचिन्तयन् ।

(क) अचिन्तयम् (ख) चिन्तय (ग) अचिन्तयन् (घ) अचिन्तयत्

**(iii)** राज्ञा पुत्रवत् प्रजाः पालयति स्म।

(क) राजा (ख) राज्ञा (ग)पुत्रः (घ) राज्ञे

**(iv)** राजा याचकेन दानं ददाति स्म।

(क) याचकेभ्यः (ख) याचकस्य (ग) याचके (घ) याचकान्

## उत्तरसंकेतः

### अशुद्धिसंशोधनम्

**1.**

(i) (ख) तौ (i) (ख) कीदृशी (iii) (घ) जानासि (iv) (क) अपृच्छत्

**2.**

(i) (c) पवन: (ii) (a) खादामि (iii) (d) मोहनस्य (iv) (a) गमिष्यति

**3.**

(i) (ग) आसन् (ii) (घ) अचिन्तयत् (iii) (क) राजा (iv) (क) याचकेभ्यः

## भागः 'घ' पठितावबोधनम्

### गद्यांश -1

अथ एकदा भगवान् बोधिसत्त्वः बहुजन्मार्जितपुण्यफलैः शिवीनां राजा अभवत्। स बाल्यात् एव वृद्धोपसेवी, विनयशीलः, शास्त्रपारङ्गत: च आसीत्। जनकल्याणकर्मसु रतः असौ पुत्रवत् प्रजाः पालयति स्म। कारुण्य-औदार्यादिसद्गुणोपेतः स नगरस्य समन्ततः धन-धान्यसमृद्धाः दानशालाः अकारयत्। तत्र अर्थिनां समूहः अन्न-पान वसन-रजत-सुवर्णादिकानि अभीष्टानि वस्तूनि प्राप्य सन्तुष्टः अभवत्। राज्ञः दानशीलताम् आकर्ण्य देशान्तरेभ्योऽपि जनाः तं देशम् आयान्ति स्म।अथ कदाचित् दानशालासु विचरन् स राजा बहुधनलाभेन सन्तुष्टानाम् अर्थिनां विरलसंख्यां विलोक्य अचिन्तयत् 'मम अर्थिनः तु धनलाभमात्रेण सन्तोषं भजन्ते। नूनं ते दानवीराः सौभाग्यशालिनः यान् याचकाः शरीरस्य अङ्गानि अपि याचन्ते।'

**अ. एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)** **½×2=1**

(i) भगवान बोधिसत्त्वः कथं शिवीनां राजा अभवत्?

(ii) के सौभाग्यशालिनः यान याचकाः शरीरस्य अङ्गानि याचन्ते ?

(iii) राज्ञः दानशीलताम् आकर्ण्य देशान्तरेभ्योऽपि के तं देशम् आयान्ति स्म?

**आ. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्)** **1x2=2**

(i) बोधिसत्त्वः बालयात् एव कीदृशः आसीत्?

(ii) शिवेः राज्ये याचकाः किं लब्ध्वा सन्तुष्टाः अभवन् ?

(iii) अर्थिनां विरलसंख्या विलोक्य राजा किम् अचिन्तयत्?

**इ. निर्देशानुसारम् उत्तरत - (केवलं प्रश्नद्वयम्)** **1x2=2**

(i) 'अर्थिनः' इत्यस्य क्रियापदं किं प्रयुक्तम् ?

(ii) 'बोधिसत्त्वः शिवीनां राजा अभवत्' अत्र कर्तृपदम् किम्?

(iii) 'स बाल्यात एव वृद्धोपसेवी, विनयशीलः ... आसीत्। अत्र 'शैशवात्' अस्मिन अर्थे किं पदं प्रयुक्तम्?

### गद्यांश -2

राजा उवाच भगवन् ! भवन्मनोरथं पूरयित्वा आत्मानम् अनुगृहीतं कर्तुम् इच्छामि। आदिश्यतां किं करवाणि? विप्रः अकथयत् यदि भवान् प्रीतः, तदा त्वत्तः एकस्य चक्षुषः दानम् इच्छामि येन मम लोकयात्रा निर्बाधा भवेत्। तत् श्रुत्वा राजा अचिन्तयत्- "लोके चक्षुर्दानं दुष्करमेव। नूनम् ईदृशं दानम् इच्छन् अयं याचकः केनापि प्रेरितः स्यात् ! अथवा भवतु नाम किं बहु चिन्तनेन?" इति विचार्य राजा अभाषत "भो मित्र! किमेकेन चक्षुषा, अहं भवते चक्षुर्द्वयमेव प्रयच्छामि इति।" राज्ञः नेत्रदानार्थ निश्चयं ज्ञात्वा अमात्याः विषण्णाः भूत्वा अवदन्-महाराज! अलम् एतावता दुस्साहसेन, प्रभूतं धनमेव दीयताम् ।

**अ. एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)** **½×2=1**

(i) भवन्मनोरथं पूरयित्वा आत्मानम् किं कर्तुम् इच्छामि?

(ii) नूनम् ईदृशं दानम् इच्छन् अयं कः केनापि प्रेरितः स्यात् ?

(iii) येन मम का निर्बाधा भवेत् ?

**आ. पूर्णवाक्येन उत्तरत- ( केवलं प्रश्नद्वयम्)** **1x2=2**

(i) राज्ञः नेत्रदानार्थ निश्चयं ज्ञात्वा अमात्याः विषण्णाः भूत्वा किम् अवदन्?

(ii) विप्रः राजानम् किम् अकथयत्?

(iii) लोके कीदृशम् दानम् दुष्करमेव ?

**इ. निर्देशानुसारम् उत्तरत - (केवलं प्रश्नद्वयम्)** **1x2=2**

(i) राज्ञः नेत्रदानार्थ निश्चयं ज्ञात्वा अमात्याः विषण्णाः भूत्वा अवदत् । अत्र विषण्णाः पदस्य अर्थ किम्?

(ii) 'राज्ञः' पदे का विभक्तिः ?

(iii) 'तत् श्रुत्वा राजा अचिन्तयत्। अस्मिन् वाक्ये क्रियापदं किम्?

## गद्यांश -3

कस्मिंश्चित् नगरे चन्द्रो नाम भूपतिः प्रतिवसति स्म। तस्य पुत्राः वानरक्रीडारताः वानरयूथं नित्यमेव विविधैः भोज्य पदार्थे: पुष्टि नयन्ति स्म। तस्मिन् राजगृहे बालवाहनयोग्यं मेषयूथम् आसीत्। तेषां मेषाणां मध्ये एको मेषः जिह्वालोलुपतया अहर्निशं महानसं प्रविश्य यत् पश्यति तद् भक्षयति। ते च सूपकाराः यत्किञ्चित् काष्ठं, मृण्मयं भाजनं कांस्यताम्रपात्रं वा पश्यन्ति तेन तम् आशु ताडयन्ति स्म।मेषस्य सूपकाराणां च कलहम् अवेक्ष्य नीतिविदाम् अग्रणीः वानरयूथपतिः अचिन्तयत् 'एतेषां कलहो न वानराणां हिताय।' एवं विचार्य स यूथपः सर्वान् कपीन् आहूय रहसि अवदत्—सूपकाराणां मेषेण सह एषः कलहः नूनं भवतां विनाशकारणं भविष्यति।

**अ. एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)** **½×2=1**

(i) राजपुत्राः प्रासादे कैः सह क्रीडन्ति स्म ?

(ii) राजगृहे कीदृशं मेषयूथम् आसीत् ?

iii) के पाकशालां प्रविष्टं मेषं ताडयन्ति स्म?

**आ. पूर्णवाक्येन उत्तरत- ( केवलं प्रश्नद्वयम्)** **1x2=2**

(i) जिह्वालोलुपतया मेष: अहर्निशं किं करोति स्म?

(ii) सूपकारा: मेषं कै: वस्तुभिः ताडयन्ति स्म ?

(iii) मेषस्य सूपकाराणां च कलहम् अवेक्ष्य वानरयूथपतिः किम् अचिन्तयत् ?

**इ. निर्देशानुसारम् उत्तरत - (केवलं प्रश्नद्वयम्)** **1x2=2**

(i) 'कस्मिंश्चित् नगरे चन्द्रो नाम भूपतिः प्रतिवसति स्म। अत्र क्रियापदं किम्?

(ii) 'एवं विचार्य .. सर्वान् कपीन् आहूय रहसि अवदत्। अत्र 'कपीन्' पदस्य किं विशेषणपदं प्रयुक्तम्?

(iii ) गद्यान्शे "राजा" शब्दस्य कृते किं पर्यायपदं प्रयुक्तम् ?

## गद्यांश -4

तस्य वचनम् अश्रद्धेयं मत्वा मदोद्धताः कपयः प्रहस्य अवदन्- 'भो! किमिदम् उच्यते? न वयं स्वर्गसमानोपभोगान् विहाय अटव्यां क्षार-तिक्त-कषाय-कटु-रूक्षफलानि भक्षयिष्यामः।' तच्छ्रुत्वा साश्रुनयनो यूथपतिः सगद्गदम् उक्तवान् 'रसनास्वादलुब्धाः यूयम् अस्य सुखस्य कुपरिणामं न जानीथ। अहं तु वनं गच्छामि।' अथ अन्यस्मिन् अहनि स मेषो यावत् महानसं प्रविशति तावत् सूपकारेण अर्धज्वलितकाष्ठेन ताडितः। ऊर्णाप्रचुरः मेषः वह्निना जाज्वल्यमानशरीरः निकटस्थाम् अश्वशालां प्रविशति दाहवेदनया च भूमौ लुठति। तस्य क्षितौ प्रलुठतः तृणेषु वह्निज्वालाः समुत्थिताः। ज्वालमालाकुलाः अश्वाः प्राणत्राणाय इतस्ततः अधावन्। तेषु केचिद् दग्धाः केचिद् अर्धदग्धाः केचन च पञ्चत्वं गताः।

**अ. एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)** **½×2=1**

(i) केन जाज्वल्यमान शरीरः मेषः अश्वशालां प्रविशति?

(ii) किमर्थम् अश्वाः इतस्ततः अधावन्?

(iii) मेषस्य क्षितौ प्रलुठतः तृणेषु काः समुत्थिताः?

**आ. पूर्णवाक्येन उत्तरत- ( केवलं प्रश्नद्वयम्)** **1x2=2**

(i) मदोद्धताः कपयः वानरयूथपतिं किम् अवदन् ?

(ii) मेषः वह्निना जाज्वल्यमाना शरीरेण कुत्र प्रविशति?

(iii) साश्रुनयनो भूत्वा यूथपतिः किम् उक्तवान्?

**इ. निर्देशानुसारम् उत्तरत - (केवलं प्रश्नद्वयम्)** **1x2=2**

(i) 'मदोद्धताः कपयः प्रहस्य अवदन्' । अस्मिन् वाक्ये किं कर्तृपदं प्रयुक्तम्?

(iii) ज्वालमालाकुलाः पदस्य विशेष्यपदं गद्यांशात् चित्वा लिखत ?

(iii) 'मेषः महानसं प्रविश्य यत् पश्यति तद् भक्षयति।' अत्र 'निर्गत्य' पदस्य कि विलोमपदं प्रयुक्तम् ?

## गद्यांश -5

अस्ति कर्मपुरनाम्नि नगरे प्रच्छन्नभाग्य-नामधेयः कश्चित् कुमारः। बाल्ये वयसि विद्यापराङ्मुखः स केनचित् दुष्टबुद्धिनाम्ना चौरेण सह चौर्यकर्मणि निरतः सञ्जातः। एकदा स दुष्टबुद्धिना सार्धं कस्यचित् श्रेष्ठिनः गेहे धनहरणार्थं ग्रामान्तरं प्रस्थितः। अथ व्रजन्तौ तौ गर्तसङ्कुले मार्गे क्रीडतः कांश्चित् बालकान् प्रेक्ष्य अवदताम्-भो भो बालकाः। कथमत्र नतोन्नते विषमे मार्गे क्रीडथ? यदि कश्चित् गर्ते पतेत् तर्हि स विकलाङ्गो भूत्वा चिरं क्लेशम् अनुभवेत्। तच्छ्रुत्वा तेषु कश्चित् उद्दण्डः बालकः उवाच-अयि भो ! यद्येवं तर्हि कथं भवन्तौ सुपथं परित्यज्य अनेन कुपथेन गन्तुं प्रवृत्तौ? अपि इदं श्रेयस्करम्?

**अ. एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)** **½×2=1**

(i) प्रच्छन्नभाग्यः कुत्र निवसति स्म?

(ii) मार्गः कीदृशः आसीत् ?

(iii) सः कदा विद्यापराङ्मुखः अभवत् ?

**आ. पूर्णवाक्येन उत्तरत- ( केवलं प्रश्नद्वयम्)** **1x2=2**

(i) प्रच्छन्नभाग्यः मार्गे क्रीडतः बालकान् प्रेक्ष्य किमवदत् ?

(ii) उद्दण्डः बालकः किमवदत् ?

(iii) सः केन सह चौर्यकर्मणि निरतः सञ्जातः ?

**इ. निर्देशानुसारम् उत्तरत - (केवलं प्रश्नद्वयम्)** **1x2=2**

(i) 'कस्यचित् श्रेष्ठिनः गेहे धनहरणार्थं ग्रामान्तरं प्रस्थितः। अत्र क्रियापदं किं प्रयुक्तम् ?

(ii) 'उद्दण्डः बालकः' अत्र विशेषणपदं किम् ?

(iii) 'सन्मार्गम्' इति पदस्य किं पर्यायपदं गंद्याशे प्रयुक्तम् ?

## गद्यांश -6

अहो! कुमार्गम् आश्रितस्य मम कीदृशी इयं क्लेशपरम्परा। गुरूपदेशेन इव अनेन बालवचसा मम चक्षुषी समुन्मीलिते। अद्य आरभ्य पापमार्गं त्यजामि इति विचिन्त्य मित्रं दुष्टबुद्धिम् अवदत् 'सखे ! यदि मां मित्रस्थाने परिगणयसि, तर्हि साधुजनगर्हितम् इमं पन्थानं त्यजतु भवान्।' दुष्टबुद्धिः तु तस्य सद्वचनानि तिरस्कृत्य ग्रामाभिमुखं प्राचलत्। प्रच्छन्नभाग्यः तु समुपजातविवेकः स्वगृहं प्रतिनिवृत्तः । गृहे तस्य भार्या सपदि समागतं पतिं दृष्ट्वा अपृच्छत्- आर्य! किं सर्वगतं कुशलं वर्तते ? अयथाकालं समागतोऽसि ? सम्प्रति धर्ममतिः सः पश्चात्तापेन दग्धमानसः

सर्वं वृत्तान्तं निवेद्य सकरुणम् उच्चैः अक्रन्दत्। बुद्धिमती सा अवदत्-अलं चिन्तया। आपदां तरणिः धैर्यम्। इदानीं विषादं त्यक्त्वा उद्यमः क्रियताम्।

**अ. एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)** **½×2=1**

(i) प्रच्छन्नभाग्यः कं पापमार्गं त्यक्तुम् अकथयत् ?

(ii) प्रच्छन्न भाग्यस्य पत्नी कीदृशी आसीत् ?

(iii) आपदां तरणिः किम् अस्ति ?

**आ. पूर्णवाक्येन उत्तरत- ( केवलं प्रश्नद्वयम्)** **1x2=2**

(i) प्रच्छन्न भाग्यः स्वमित्रं किमवदत्?

(ii) तस्य भार्या सपदि समागतं पतिं दृष्टवा किमपृच्छत्?

(iii) दुष्टबुद्धिः तस्य सद्वचनानि तिरस्कृत्य कुत्र अगच्छत्?

**इ. निर्देशानुसारम् उत्तरत - (केवलं प्रश्नद्वयम्)** **1x2=2**

(i) 'गृहे तस्य भार्या सपदि समागतं पतिं दृष्ट्वा अपृच्छत् । अत्र 'शीघ्रम्' इति पदस्य पर्यायपदं किं प्रयुक्तम् ?

(ii) 'दुष्टबुद्धिः तु तस्य सद्वचनानि तिरस्कृत्य ग्रामाभिमुखं प्राचलत् । अस्मिन् वाक्ये 'तस्य' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

(iii) 'अनेन बालवचसा मम चक्षुषी समुन्मीलिते' अत्र क्रियापदं किं प्रयुक्तम् ?

## गद्यांश -7

कालोऽहम्। अहं खलु कालः। विश्वस्य आत्माहम्। कलयामि गणयामि जगतः आयुः प्रमाणम्। सततं चक्रवत् परिवर्तमानः भूतं वर्तमानं भविष्यदपि च वीक्षमाणः अहमेव साक्षी जगतः उत्पत्तेः विकासस्य प्रलयस्य च। इदं जगत् तु पुनः पुनः जायते विलीयते च परमहं विद्यमानोऽस्य सर्वं क्रियाकलापं पश्यामि। अहो! किं जानीथ यूयम्, 'कियती प्राचीना इयं सृष्टिः!' नैव ! तर्हि शृणुत ध्यानेन। 'कृतयुगं त्रेतायुगं द्वापरयुगं कलियुगञ्चेति चत्वारि युगानि। चतुर्णां युगानां समूहः एव महायुगम्। एकसप्ततिमहायुगानाम् एकं मन्वन्तरम्। चतुर्दशमन्वन्तराणां समूहः कल्पः। एकः कल्प एव ब्रह्मणः एकं दिनं मन्यते। ब्रह्मणः आयुः शतं वर्षाणि।'

**अ. एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)** **½×2=1**

(i) कस्य आयुः शतं वर्षाणि ?

(ii) अस्मिन् गद्यांशे कः वक्ता ?

(iii) कालः कस्य आत्मा ?

**आ. पूर्णवाक्येन उत्तरत- ( केवलं प्रश्नद्वयम्)** **1x2=2**

(i) कालः किं किं वीक्षते ?

(ii) कालः केषां साक्षी अस्ति ?

(iii) महायुग केषां समूहः?

**इ. निर्देशानुसारम् उत्तरत - (केवलं प्रश्नद्वयम्)** **1x2=2**

(i) 'वीक्षमाणः अहमेव साक्षी जगतः उत्पत्तेः ।' अत्र 'पश्यन्' अस्मिन् अर्थे किं पदं प्रयुक्तम् ?

(ii) 'एकः कल्पः एव ब्रह्मणः एकं दिनं मन्यते। अस्मिन् वाक्ये क्रियापदं किम्?

(iii)' चतुर्णां युगानां समूहः एव महायुगम् । अत्र विशेष्यपदं किम् ?

## गद्यांश -8

विष्णोराज्ञया प्रवर्तमानस्य ब्रह्मणः द्वितीयपरार्धे श्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे प्रथमचरणे जम्बूद्वीपे भारतवर्षे भरतखण्डे आर्यावर्तैकदेशे यमुनातीरे दिल्लीमण्डले नलनाम संवत्सरे, सूर्योत्तरायणे, वसन्ततौ, चैत्रमासे, शुक्लपक्षे, प्रतिपदायां तिथौ, बुधवासरे, उत्तराभाद्रपदनक्षत्रे, शुक्लयोगे, किंस्तुघ्नकरणे केशवनामाहं मङ्गलकार्यं करिष्ये।

अये! कथम् इमं सङ्कल्पं श्रुत्वा विस्मिताः यूयम् ? अयं तु वर्तमानकालदेशपरिचायकः। प्राचीनतमा हि एषा गणना। अपि ज्ञायते मदीयायाः अस्याः गणनायाः आधारः ?

मम कलनस्य तु आधारः सूर्य एव। सूर्यस्य द्वे गती उत्तरायणं दक्षिणायनञ्च। प्रत्येकम् अयनस्य अवधिः षण्मासाः । भारतीयमासानां नामानि नक्षत्रनामभिः सम्बद्धानि। पूर्णिमायां यत् नक्षत्रं भवति तेनैव नाम्ना तस्य मासस्य नाम भवति। यथा चैत्रे मासे पूर्णिमा चित्रानक्षत्रयुता भवति।

**अ. एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)** **½×2=1**

(i) दिल्ली कस्याः नद्याः तीरे स्थिता ?

(ii) काल गणनायाः आधारः कः ?

(iii) किंस्तुघ्नकरणेनामाहं किम् कार्यं करिष्ये ?

**आ. पूर्णवाक्येन उत्तरत- ( केवलं प्रश्नद्वयम्)** **1x2=2**

(i) सङ्कल्पे देशवाचकाः (स्थानवाचकाः) के के शब्दा: आगताः?

(ii) सूर्यस्य के गती? तयो: नाम अपि लिखत ?

(iii) मासस्य नाम कथं भवति ?

**इ. निर्देशानुसारम् उत्तरत - (केवलं प्रश्नद्वयम्)** **1x2=2**

(i) 'सङ्कल्पं श्रुत्वा विस्मिताः यूयम्। अत्र विशेषणपदं किमस्ति ?

(ii) 'सूर्यस्य द्वे गती उत्तरायणं दक्षिणायनञ्च। अत्र कर्तृपदम् किम् प्रयुक्तम् ?

(iii) 'भास्करस्य' इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम् ?

## पठितावबोधनम्

## उत्तरसंकेतः

## गद्यांश -1

गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - 1/2 × 2 = 1

अ. एकपदेन उत्तरत।(केवलं प्रश्नद्वयम्)

(i) बहुजन्मार्जित पुण्यकलैः `(ii) दानवीराः(ते) (iii) जनाः

आ. पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्) 1*2 = 2

(i) बोधिसत्त्वः बाल्यात् एव वृद्धोपसेवी, 'विनयशीलः, शास्त्रपारङ्गतः च आसीत्।

(ii) शिवे राज्ये याचकाः अन्न-पान-वसन-रजत- सुवर्णादिकानि अभीष्टानि वस्तूनि प्राप्य सन्तुष्टाः अभवन्।

(iii) अर्थिनां विरलसंख्या विलोक्य राजा अचिन्तयत् 'मम अर्थिनः तु धनलाभमात्रेण सन्तोषं भजन्ते। नूनं ते दानवीराः सौभाग्यशालिनः यान् याचकाः अङ्गानि अपि याचन्ते।

इ. निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्) 1*2 = 2

(i) भजन्ते (ii) राजा (iii) बाल्यात्

**गद्यांश -2**

गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -

अ. एकपदेन उत्तरत ।(केवलं प्रश्नद्वयम्) 1/2 * 2 = 1

(i) अनुगृहीतं (ii) याचकः (iii) लोकयात्रा

आ. पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्) 1 * 2 = 2

(i) राज्ञः नेत्रदानार्थं निश्चयं ज्ञात्वा अमात्याः विषण्णाः भूत्वा अवदन् - महाराज! अलम् एतावता दुस्साहसेन, प्रभूतं धनमेव दीयताम् ।

(ii) विप्रः अकथयत्- यदि भवान् प्रीतः, तदा त्वत्तः एकस्य चक्षुषः दानम् इच्छामि येन मम लोकयात्रा निर्बाधा भवेत्।

(iii) लोके चक्षुर्दानं दुष्करमेव ।

इ. निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्) 1 * 2 = 2

(i) खिन्नाः (ii) षष्ठी (iii) अचिन्तयत्

**गद्यांश -3**

गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -

1. एकपदेन उत्तरत ।(केवलं प्रश्नद्वयम्) 1/2 * 2 = 1

(i) वानरक्रीडारताः (ii) बालवाहनयोग्यं (iii) सूपकाराः

आ. पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्) 1 * 2 = 2

(i) जिह्वालोलुपतया मेषः अहर्निशं महानसं प्रविश्य यत् पश्यति तद् भक्षयति स्म ।

(ii) सूपकाराः यत्किञ्चित् काष्ठ, मृण्मयं भाजनं कांस्यताम्रपत्रं वा पश्यन्ति तेन तम आशु ताडयन्ति स्म

(iii) मेषस्य सूपकाराणां च कलहम् अवेक्ष्य वानरयूथपतिः अचिन्तयत् 'एतेषां कलहो न वानराणां हिताय'।

इ. निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्) 1 * 2 = 2

(i) प्रतिवसति स्म । (ii) सर्वान् (iii) भूपतिः

**गद्यांश -4**

गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -

अ. एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्) 1/2 * 2 = 1

(i) वह्निना (ii) ज्वालामालाकुलाः (iii) वह्निज्वालाः

आ. पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्) 1 * 2 = 2

(i) मदोद्धताः कपयः वानरयूथपतिं अवदन् - 'भो! किमिदम् उच्यते ? न वयं स्वर्गसमानोपभोगान् विहाय अटव्यां क्षार-तिक्त-कषाय-कटु- रुक्षफलानि भक्षयिष्यामः ।'

(ii) मेषः वह्निना जाज्वल्यमानशरीरः निकटस्थाम् अश्वशालां प्रविशति ।

(iii) साश्रुनयनो भूत्वा यूथपतिः उक्तवान् -' रसनास्वादलुब्धा यूयम अस्य सुखस्य कुपरिणामं न जानीथ।

इ. निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्) 1 * 2 = 2

(i) कपयः (ii) अश्वाः (iii) प्रविश्य

**गद्यांश -5**

गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -

अ. एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्) 1/2 * 2 = 1

(i) कर्मपुरनाम्नि नगरे (ii) गर्तसङ्कुलः (iii) बाल्ये वयसि

आ. पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्) 1 * 2 = 2

(i) प्रच्छन्नभाग्यः मार्गे क्रीडतः बालकान् प्रेक्ष्य अवदताम् - भो भो बालकाः । कथमत्र नतोन्नते विषमे मार्गे क्रीडथ

(ii) उद्दण्डः बालक: उवाच – अयि भो । यद्येवं तर्हि कथं भवन्तौ सुपथं परित्यज्य अनेन कुपथेन गन्तुं प्रवृत्तौ

(iii) सः दुष्टबुद्धिनाम्ना चौरेण सह चौर्यकर्मणि निरतः सञ्जातः ।

इ. निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्) 1 * 2 = 2

(i) प्रस्थितः (ii) उद्दण्डः (iii)सुपथम्

**गद्यांश -6**

गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -

अ. एकपदेन उत्तरत ।(केवलं प्रश्नद्वयम्) 1/2 * 2 = 1

(i) दुष्टबुद्धिम् (ii) बुद्धिमता (iii) धैर्यम्

आ. पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्) 1 * 2 = 2

(iप्रच्छन्नभाग्यः स्वमित्रं अवदत् 'सखे!'यदि मां मित्रस्थाने परिगणयसि,तर्हि साधुजनगर्हितम् इमं पन्थानं त्यजतु भवान्

(ii) तस्य भार्या सपदि समागतं पतिं दृष्टवा अपृच्छत् – आर्य! किं सर्वगतं कुशलं वर्तते ? अयथाकालं समागतोऽसि

(iii) दुष्टबुद्धिः तस्य सद्वचनानि तिरस्कृत्य ग्रामाभिमुखं अगच्छत् ।

इ. निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्) 1 * 2 = 2

(i) सपदि (ii) प्रच्छन्नभाग्याय (iii) समुन्मीलिते

**गद्यांश -7**

गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -

अ. एकपदेन उत्तरत ।(केवलं प्रश्नद्वयम्) 1/2 * 2 = 1

(i) ब्रह्मणः (ii) कालः (iii) विश्वस्य

आ. पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्) 1 * 2 = 2

(i) कालः भूतं वर्तमानं भविष्यदपि च वीक्षमाणः।

(ii) साक्षी जगतः उत्पत्तेः विकासस्य प्रलयस्य च।

(iii) चतुर्णां युगानां समूहः एव महायुगम्।

इ. निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्) 1 * 2 = 2

(i) वीक्षमाणः (ii) मन्यते (iii) महायुगम्

**गद्यांश -8**

गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -

अ. एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) 1/2 * 2 = 1

(i) यमुनातीरे (ii) सूर्यः (iii) मङ्गलकार्यं

आ. पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्) 1 * 2 = 2

(i) सङ्कल्पे जम्बूद्वीपे भारतवर्षे भरतखण्डे आर्यावर्तैकदेशे स्थानवाचकाः शब्दाः सन्ति ।

(ii) सूर्यस्य द्वे गती उत्तरायणं दक्षिणायनञ्च ।

(iii) भारतीय मासानां नामानि नक्षत्रसम्बद्धानि । पूर्णिमायां यत् नक्षत्रं भवति तेनैव नाम्ना तस्य मासस्य नाम भवति ।

इ. निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्) 1 * 2 = 2

(i) विस्मिता: (ii) सूर्यस्य (iii) सूर्यस्य

## पठित-अवबोधनम्
## पद्यांश-खण्डः

**1.**

अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत |

**शारदा शारदाम्भोजवदना वदनाम्बुजे।**
**सर्वदा सर्वदाऽस्माकं सन्निधिं सन्निधिं क्रियात्।**

**I. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम् )** **1/2x2=1**

(i) कविः कस्या: प्रार्थनां करोति? (ii) शारदा कुत्र वसेत्? (iii) का सर्वदा अस्ति ?

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम् )** **1x2=2**

(i) कीदृशी सरस्वती अस्माकं सन्निधिं क्रियात्?
(ii) का अस्माकं सन्निधिं कुर्यात् ?
(iii) सर्वदा शारदा किं क्रियात् ?

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत - (केवलं प्रश्नद्वयम् )** **1x2=2**

(i) 'शारदा' इति कर्तृपदस्य किं क्रिया पदं पद्यांशे प्रयुक्तम्?
(ii) पद्यांशे 'सरस्वती' इति अर्थे किं पदं प्रयुक्तम्?
(iii) 'सर्वदा' इति पदस्य विशेष्यपदं किम् ?

**2.**

अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत | 5

**अपूर्व: कोऽपि कोशोऽयं विद्यते तव भारति! ।**
**व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात् ॥**

**I. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम् )** **1/2x2=1**

(i) भारत्या: कोश: कीदृशः वर्तते ? (ii)वृद्धि: कथमायाति ? (iii) सञ्चयात् किं आयाति ?

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम् )** **1x2=2**

(i) सरस्वत्या: कोश: कथं क्षयम् आयाति ?
(ii) व्ययत: किं आयाति ?
(iii) भारत्यां क: विद्यते ?

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत - (केवलं प्रश्नद्वयम् )** **1x2=2**

i.अस्मिन् श्लोके सम्बोधनपदं किम् ?
ii.'आयाति' इति क्रियापदस्य कर्तृपदं किम् ?
iii.'क्षयम्' इति पदस्य विपर्ययपदं किम् ?

**3.**

अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत | 5

**नास्ति विद्यासमं चक्षुः नास्ति सत्यसमं तपः ।**
**नास्ति रागसमं दु:खं नास्ति त्यागसमं सुखम् ॥**

**I. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम् )** **1/2x2=1**

(i) विद्यासमं किं नास्ति ? (ii)'दु:खं केन समं नास्ति ?' (iii)सुखं केन समं नास्ति ?'

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम् )** **1x2=2**

(i) तपः केन समम् अस्ति ? (ii) केन समं चक्षु: नास्ति ? (iii) त्यागसमं किं नास्ति ?

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत - (केवलं प्रश्नद्वयम् )** **1x2=2**

(i) "नास्ति सत्यसमं तपः" अत्र क्रियापदं किम् ?

(ii)‘ नास्ति त्यागसमं सुखम्” अत्र विशेष्यपदं किम् ?

(iii)‘नेत्रशब्दस्य कृते अत्र पर्यायपदं किं प्रयुक्तम् ?

**4.**

अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत | 5

**न तथा शीतलसलिलं न चन्दनरसो न शीतला छाया ।**
**प्रह्लादयति च पुरुषं, यथा मधुरभाषिणी वाणी ॥**

**I. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम् )** **1/2x2=1**

(i) शीतला का भवति ? (ii) मधुरभाषिणी का भवति ? (iii) सलिलं कीदृशं भवति ?

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम् )** **1x2=2**

(i) कीदृशं सलिलम् अपि पुरुषं न प्रह्लादयति ?

(ii) पुरुषं का आनन्दयति ?

(iii) कीदृशी छाया अपि पुरुषं न प्रह्लादयति ?

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत - (केवलं प्रश्नद्वयम् )** **1x2=2**

i.’आनन्दयति’ इत्यर्थे किं पदं प्रयुक्तम् ?

ii.'शीतला छाया' इति अनयोः पदयोः विशेषणपदं किम् ?

iii.‘'मधुरभाषिणी वाणी प्रह्लादयति ' अत्र क्रियापदं किम् ?

**5.**

अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत | 5

**शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा।**
**ऊहापोहार्थविज्ञानं तत्त्वज्ञानं च धीगुणाः ॥**

**I. एकपदेन उत्तरत –(केवलं प्रश्नद्वयम् )** **1/2x2=1**

(i) प्रथमः धीगुणः कः अस्ति ?

(ii) धियः तृतीयः गुणः कः अस्ति ?

(iii) श्रवणं धियः कतमः गुणः वर्तते ?

**II. पूर्णवाक्येन उत्तरत -– (केवलं प्रश्नद्वयम् )** **1x2=2**

(i) धीगुणाः कति सन्ति ?

(ii) श्लोके के विपर्ययद्वयं प्रयुक्तम् ?

(iii ) के के धियः गुणाः सन्ति ?

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत - (केवलं प्रश्नद्वयम् )** **1x2=2**

(i)'श्रोतुम् इच्छा' इति स्थाने किं पदं प्रयुक्तम् ?

(ii)” शुश्रूषा श्रवणम् इत्यादयः अष्ट गुणाः सन्ति “अत्र विशेष्यपदं किम् ?

(iii)‘अर्थानाम् विशुद्धम् ज्ञानम्’ इति स्थाने किं पदं प्रयुक्तम् ?

**6.**

अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत | 5

**माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः ।**
**धैर्यं लयसमर्थं च षडेते पाठका गुणाः ॥**

**I. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम् )** **1/2x2=1**

(i) पाठकस्य गुणाः कति सन्ति ?

(ii) माधुर्यादिकं कस्य गुणाः भवन्ति ?

(iii) तृतीयःगुणः कः अस्ति ?

**II. पूर्णवाक्येन उत्तरत -(केवलं प्रश्नद्वयम् )** **1x2=2**

(i) प्रथमः पाठकगुणः कः अस्ति ?

(ii) पाठकस्य गुणान् लिखत ?

(iii) द्वितीयपञ्चमगुणस्य नामं लिखत ?

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत - (केवलं प्रश्नद्वयम् )** **1x2=2**

(i) 'मधुरता' इत्यर्थे किम् पदम् श्लोके प्रयुक्तम् ?

(ii) ''वर्णानाम् स्पष्टतया उच्चारणम्' इति अर्थे किं पदं प्रयुक्तम् ?

(iii) " धैर्यं लयसमर्थं च एते पाठका गुणाः' अत्र विशेष्य पदं किम् ?

**7.**

**अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत | 5**

**आचार्यत्पादमादत्ते पादं शिष्यः स्वमेधया।**
**कालेन पादमादत्ते पादं सब्रह्मचारिभिः ॥**

**I. एकपदेन उत्तरत –(केवलं प्रश्नद्वयम् )** **1/2x2=1**

(i) कः स्वमेधया शिक्षां गृह्णाति ?

(ii) शिक्षायाः तृतीयः चतुर्थांशः कस्मात् गृह्यते ?

(iii) शिक्षायाःप्रथमः चतुर्थांशः कस्मात् गृह्यते ?

**II. पूर्णवाक्येन उत्तरत -(केवलं प्रश्नद्वयम् )** **1x2=2**

(i) आचार्यात् कियत् भागम् आदत्ते ?

(ii) केन तृतीय पादं गृह्णाति ?

(iii) शिष्य: कै: विद्यां प्राप्नोति ?

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत -(केवलं प्रश्नद्वयम् )** **1x2=2**

(i) 'निज' इत्यर्थे अत्र किं पदं प्रयुक्तम् ?

(ii) श्लोके कर्तृपदं किम् अस्ति ?

(iii) "कालेन पादम् आदत्ते " अत्र क्रियापदं किम् ?

**8.**

**अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत | 5**

**अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।**
**स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥**

**I. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम् )** **1/2x2=1**

(i) अनुद्वेगकरं किं भवेत् ?

(ii) 'स्वाध्यायः' किम् भवति ?

(iii) कीदृशम् तप उच्यते ?

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम् )** **1x2=2**

(i) वाक्यं कीदृशम् स्यात् ?

(ii) वाङ्मयं कः उच्यते ?

(iii) श्लोके "वाक्य" शब्दस्य कृते कति विशेषणपदानि प्रयुक्तानि ?

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत - (केवलं प्रश्नद्वयम् )** **1x2=2**

(i) श्लोके क्रियापदं किं प्रयुक्तम् ?

(ii) 'उद्वेगकरम्' इति विपर्ययरूपे किं पदं प्रयुक्तम् ?

(iii) 'सत्यं' कस्य विशेषणम् ?

**9.**

**अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत | 5**

**दास्यामीति प्रतिज्ञाय योऽन्यथा कुरुते मनः ।**
**कार्पण्यानिश्चितमतेः कः स्यात् पापतरस्ततः ॥**

**I. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम् )** **1/2x2=1**

(i) क: मन: अन्यथा करोति ?

(ii) प्रतिज्ञा कृत्वा किं अन्यथा कुरुते ?

(iii) कीदृश्या: मते: जन: पापतर: भवति ?

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम् )** **1x2=2**

(i) पापतरः किमर्थम् मनः अन्यथा कुरुते?

(ii) कार्पण्यः कः भवति ?

(iii) प्रतिज्ञाय कृत्वा किम् न कर्त्तव्यम् ?

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत - (केवलं प्रश्नद्वयम् )** **1x2=2**

(i) 'यो' इति कर्तृपदस्य क्रियापदं किम्?

(ii) 'उदारता' इति पदस्य विपरीतार्थक पदं किम्?

(iii) 'कृपणता' इत्यर्थे श्लोके किं पदं प्रयुक्तम्?

**10.**

**अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत | 5**

**शक्रोऽहमस्मि देवेन्द्रस्त्वत्समीपमुपागतः।**
**वरं वृणीष्व राजर्षे! यदिच्छसि तदुच्यताम्।।**

**I. एकपदेन उत्तरत –(केवलं प्रश्नद्वयम् )** **1/2x2=1**

(i) शक्रः कस्य समीपम् आगतः?

(ii) शक्रः कः आसीत्?

(iii) देवेन्द्रः कस्मै वरं दातुम् इच्छति?

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम् )** **1x2=2**

(i) शक्रः राज्ञः त्यागवृत्तिम् प्रशंसन् किम् अवदत् ?

(ii) कः नृपाय वरं दातुं इच्छति?

(iii) राज्ञः समीपम् कः आगतः?

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत - (केवलं प्रश्नद्वयम् )** **1x2=2**

(i) 'अस्मि' इति क्रियापदस्य कर्तृपदं किम्?

(ii) 'श्रापं' इत्यस्य पदस्य विलोमपदं किम् प्रयुक्तम् ?

(iii)शक्रस्य कृते विशेषणपदं किं प्रयुक्तम् ?

**11.**

**अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत | 5**

**काकस्य गात्रं यदि काञ्चनस्य, माणिक्यरत्नं यदि चञ्चुदेशे ।**
**एकैकपक्षे ग्रथितं मणीनां, तथापि काको न तु राजहंसः ॥**

**I. एकपदेन उत्तरत –(केवलं प्रश्नद्वयम् )** **1/2x2=1**

(i) मणयः कुत्र ग्रथिताः वर्णिताः अत्र? (ii) कः राजहसः भवितुम् न शक्नोति? (iii) काकस्य चञ्चुदेशे किं स्थापितं भवेत्?

**II. पूर्णवाक्येन उत्तरत -(केवलं प्रश्नद्वयम् )** **1x2=2**

(i) कस्य गात्रं काञ्चन भवेत् ? (ii) काकः कः भवितुं न शक्नोति ? (iii) मणिक्यरत्नं कुत्र भवेत् ?

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत - (केवलं प्रश्नद्वयम् )** **1x2=2**

(i) 'शरीरम्' इत्यर्थे अत्र किं पदं प्रयुक्तम् ?
(ii) काक: राजहंसः न भवति। अत्र क्रियापदं किम्?
(iii) 'यदि' इति पदस्य विलोमपदं किं प्रयुक्तम् ?

**12.**

**अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत | 5**

**हंसः श्वेतः बकः श्वेतः, को भेदः बकहंसयोः।**
**नीरक्षीरविवेके तु हंसो हंसः बको बकः ॥**

**I. एकपदेन उत्तरत –(केवलं प्रश्नद्वयम् )** **1/2x2=1**

(i) श्वेतः कः भवति ?
(ii) बकहंसयोः वर्णः कीदृशः भवति?
(iii) नीरक्षीरविवेकी कः मन्यते?

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम् )** **1x2=2**

(i) बकहंसयो: कः भेदः ?
(ii) कदा हंस: हंस: एव भवति ?
(iii) बकहंसयोः भेदः कदा ज्ञायते ?

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत - (केवलं प्रश्नद्वयम् )** **1x2=2**

(i) 'कृष्णः' इति पदस्य विलोमपदं किम्?
(ii) 'बकः' इति पदस्य विशेषणपदं किम् ?
(iii) 'मरालः' इति पदस्य पर्यायपदं श्लोकात् अवचित्य लिखत?

**13.**

**अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत | 5**

**अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः,**
**अनिच्छन्नपि वार्ष्णेय! बलादिव नियोजितः ॥**

**I. एकपदेन उत्तरत –(केवलं प्रश्नद्वयम् )** **1/2x2=1**

(i) अत्र श्रीकृष्णाय सम्बोधनपदम् किम्? (ii) पुरुषः किं चरति । ? (iii) बलादिव क: नियोजित: ?

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम् )** **1x2=2**

(i) अनिच्छन् पुरुषः किम् करोति?
(ii) पुरुषः एव बलादिव कीदृशः भवति ?
(iii)पापं क: चरति ?

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत - (केवलं प्रश्नद्वयम् )** **1x2=2**

(i) कृष्णस्य कृते श्लोके पर्यायपदं किं प्रयुक्तम् ?
(ii) "पापं चरति पूरुषः" अत्र क्रियापदं किं प्रयुक्तम् ?
(iii)" अयं" शब्द: कस्य विशेषणमस्ति ?

**14.**

**अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत | 5**

**काम एषः क्रोध एष रजोगुणसमुद्भवः।**
**महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥**

**I. एकपदेन उत्तरत –(केवलं प्रश्नद्वयम् )** **1/2x2=1**

(i) कामः कस्मात् उत्पन्नः? (ii) 'उत्पन्नः' इत्यर्थ अत्र किं पदं प्रयुक्तम्? (iii) महाशनः कः?

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम् )** **1x2=2**

(i) रजोगुणसमुद्भवः कौ स्तः ? (ii) कः एषः महापाप्मा भवति? (iii) वैरिणं कं विद्धि?

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत -(केवलं प्रश्नद्वयम् )** **1x2=2**

(i) "विद्धि एनम् इह वैरिणम् "अत्र क्रियापदं किम् ?

(ii) 'महाशनः' कस्य पदस्य विशेषणम्?

(iii) 'अरिः' इति पदस्य पर्यायपदं किमत्र प्रयुक्तम्?

## 15.

## अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत | 5

**शक्नोतीहैव यः सोढुं प्राक् शरीरविमोक्षणात्।**
**कामक्रोधोद्भवं वेगं, स युक्तः स सुखी नरः ॥**

**I. एकपदेन उत्तरत –(केवलं प्रश्नद्वयम् )** **1/2x2=1**

(i) वेगम् कस्मात् उद्भवति?

(ii) नरः कीदृशं वेगं सोढुं शक्नोति ?

(iii) यः क्रोधस्य वेगं जीवने सहते सः कीदृशः नरः?

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम् )** **1x2=2**

(i) सुखी कः भवति?

(ii) सः नरः कीदृशः भवति ?

(iii) कामक्रोधोद्भवं वेगं नरः कुत्र सहते ?

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत - (केवलं प्रश्नद्वयम् )** **1x2=2**

(i) 'सुखी नरः' इति अनयोः पदयोः विशेष्यपदम् किम्?

(ii) 'योगी' इत्यर्थे अत्र किं पदं प्रयुक्तम् ?

(iii) श्लोके क्रियापदं किम् ?

## 16.

## अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत | 5

**ध्यायतः विषयान् पुंसः संगस्तेषूपजायते।**
**सङ्गात्सञ्जायते कामः कामात्क्रोधोऽभिजायते ॥**

**I. एकपदेन उत्तरत –(केवलं प्रश्नद्वयम् )** **1/2x2=1**

(i) कान् ध्यायतः संगः उपजायते? (ii) कः विषयान् ध्यायति ? (iii)कामःकस्मात् सञ्जायते ?

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम् )** **1x2=2**

(i) कामात् किम् उपजायते? (ii) मानवस्य केषु सङ्गः उपजायते? (iii) कदा नरस्य विषयेषु संगः उपजायते?

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत -(केवलं प्रश्नद्वयम् )** **1x2=2**

(i) 'सङ्ङ्गात्सञ्जायते कामः' अत्र क्रियापदं किम्?

(ii) 'ध्यायतः' इति कस्य पदस्य विशेषणम् ?

(iii) "उपजायते" इति पदस्य किं पर्यायपदं श्लोके प्रयुक्तम् ?

## 17.

## अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत | 5

**क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः।**
**स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥**

**I. एकपदेन उत्तरत –(केवलं प्रश्नद्वयम् )** **1/2x2=1**

(i) क्रोधात् किम् उद्भवति? (ii) मनुष्यस्य विनाशस्य कारणम् किम्? (iii) स्मृतिभ्रंशाद् किं भवति ?

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम् )** **1x2=2**

(i)बुद्धिनाशात् किम् भवति ? (ii) कस्मात् संमोहः भवति ? (iii)स्मृतिविभ्रम: कस्मात् भवति ?

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत - (केवलं प्रश्नद्वयम् ) 1x2=2**

(i)'विनश्यति' इत्यर्थे अत्र किं पदं प्रयुक्तम् ?

(ii) “बुद्धिनाशात्प्रणश्यति” अत्र क्रियापदं किम्?

(iii) “क्रोधाद्भवति संमोह:” अत्र कर्तृपदं किम्? ?

**18.**

**अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत | 5**

**तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ।**
**पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम् ॥**

**I. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम् ) 1/2x2=1**

(i) 'भरतर्षभ' पदम् कस्य सम्बोधनम् ? (ii) ज्ञानस्य विज्ञानस्य च नाशकः कः वर्तते ?

(iii)कानि नियम्य पाप्मानं प्रजहि ?

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम् ) 1x2=2**

(i) आदौ कानि वशीकरणीयानि ? (ii) इदम् उपदेशं श्रीकृष्णः कस्मै यच्छति ?

(iii)इन्द्रियाणि किं कृत्वा पाप्मानं प्रजहि ?

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत -(केवलं प्रश्नद्वयम् ) 1x2=2**

(i) 'पाप्मानं' पदम् कस्य विशेषणम् ?

(ii) "पाप्मानं प्रजहि ह्येनं” अत्र क्रियापदं किम्?

(iii) श्लोके “अन्ते” शब्दस्य कृते किं विलोमपदं प्रयुक्तम्?

**19.**

**अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत | 5**

**चञ्चलं हि मनः कृष्ण! प्रमाथि बलवद्दृढ़म्।**
**तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥**

**I. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम् ) 1/2x2=1**

(i) मनः कीदृशम् अस्ति? (ii) अत्र सम्बोधनपदम् किम्? (iii) मनसः निग्रहः कस्य इव सुदुष्करः?

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम् ) 1x2=2**

(i) कस्य निग्रहं सुदुष्करम् मन्यते ?

(ii) किम् अतीव चञ्चलं वर्तते ?

(iii) मनः कथम् प्रमाथि?

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत - (केवलं प्रश्नद्वयम् ) 1x2=2**

(i) 'मनः' अस्य विशेष्यपदस्य विशेषणपदं किम्?

(ii) 'मथनशीलम्' इत्यर्थे श्लोके किं पदम् प्रयुक्तम्?

(iii) 'मन्ये' इति क्रियायाः कर्तृपदं किम्?

**20.**

**अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत | 5**

**असंशयं महाबाहो ! मनो दुर्निग्रहं चलम्।**
**अभ्यासेन तु कौन्तेय, वैराग्येण च गृह्यते ॥**

**I. एकपदेन उत्तरत –(केवलं प्रश्नद्वयम् ) 1/2x2=1**

(i) 'महाबाहो।' इति कथयित्वा कः सम्बोध्यते?

(ii) अभ्यासेन वैराग्येण च किं वशीक्रियते?

(iii) 'कौन्तेय' इति पदं कस्मै प्रयुक्तम् ?

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम् )** **1x2=2**

(i) मनः कथं गृह्यते ?

(ii) मनसः किं वशीकरणं भवति ?

(iii) मनः कीदृशम् अस्ति ?

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत -(केवलं प्रश्नद्वयम् )** **1x2=2**

(i) 'यस्य वशीकरणं कठिनम्' इत्यर्थे किं पदं पद्यांशे प्रयुक्तम् ?

(ii) 'मनः' अस्य विशेषणपदं श्लोकात् चित्वा लिखत।

(iii) 'गृह्यते' इति क्रियापदस्य किं कर्तृपदम् ?

## 21.

### अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत | 5

**पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्।**
**पिताऽस्य किं तपस्तेपे इयुक्तिस्तत्कृतज्ञता ॥**

**I. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम् )** **1/2x2=1**

(i) विद्याधनं कः यच्छति ?

(ii) पिता पुत्राय विद्याधनं कदा यच्छति?

(iii)किं धनं महत् अस्ति?

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम् )** **1x2=2**

(i)पिता कस्मै विद्याधनं यच्छति?

(ii)अत्र धनम् किम् अमन्यत् ?

(iii)पुत्र: पितरं प्रति किम् अनुभवेत् ?

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत - (केवलं प्रश्नद्वयम् )** **1x2=2**

(i) 'विद्याधनम्' श्लोके अस्य विशेषणपद किम् ?

(ii)श्लोके "कृतघ्नता" पदस्य विलोमपदं किं प्रयुक्तम् ?

(iii) 'तेपे' इति क्रियायाः कर्तृपदं किम्?

## 22.

### अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत | 5

**अवक्रता यथा चित्ते तथा वाचि भवेद् यदि ।**
**तदेवाहु महात्मानः समत्वमिति तथ्यतः ॥**

**I. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम् )** **1/2x2=1**

(i) चित्ते किम् भवेत्?

(ii) अवक्रता यथा चित्ते भवति तथा कस्यां भवेत्?

(iii) वाचि किं न भवेत् ?

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम् )** **1x2=2**

(i )समत्वम् किम् कथ्यते ?

(ii)के तदेव समत्वं कथयन्ति ?

(iii) चित्ते वाचि च अवक्रता किं उच्यते ?

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत - (केवलं प्रश्नद्वयम् )** **1x2=2**

(i)'भवेत्' इति क्रियापदस्य कर्तृपदम् किम्?

(ii) 'सरलता' इत्यर्थे श्लोके किं पदं प्रयुक्तम् ?

(iii) 'वक्रता' इति पदस्य विपरीतार्थकम् पदं किम्?

## 23.

**अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत | 5**

**त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्।**
**परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः ॥**

**I. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम् )** **1/2x2=1**

(i) विमूढधीः कीदृशी वाचं त्यजति?
(ii) कः परुषां वाचं वदति?
(iii) कीदृशीं वाणीं न त्यजेत्?

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम् )** **1x2=2**

(i)कः अपक्वम् फलं खादति?
(ii) कीदृशीं वाणीम् अभ्युदीरयेत्?
(iii) विमूढधीः पक्वं फलं त्यक्त्वा किं खादति?

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत - (केवलं प्रश्नद्वयम् )** **1x2=2**

(i) 'कठोराम्' अस्य पर्यायः श्लोकात् एव चित्वा लिखत।
(ii) 'पक्वम्' इति पदस्य विलोमपदं किम्?
(iii) "परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः" अत्र क्रियापदं किम्?

## 24.

**अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत | 5**

**विद्वांस एव लोकेऽस्मिन् चक्षुष्मन्तः प्रकीर्तिताः ।**
**अन्येषां वदने ये तु ते चक्षुर्नामनी मते ॥**

**I. एकपदेन उत्तरत –(केवलं प्रश्नद्वयम् )** **1/2x2=1**

(i) अत्र के चक्षुष्मन्तः?
(ii) विद्वांसः कुत्र चक्षुष्मन्तः प्रकीर्तिताः?
(iii) चक्षुषी कुत्र भवतः?

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम् )** **1x2=2**

(i)चक्षुर्नामनी के ?
(ii)के नेत्रहीना: इव भवन्ति ?
(iii) अस्मिन् संसारे के प्रकीर्तिताः?

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत –(केवलं प्रश्नद्वयम् )** **1x2=2**

(i) 'लोके अस्मिन्' इत्यनयोः पदयोः विशेषणपदं किम्?
(ii) 'कथिताः' इत्यर्थे अत्र किं पदं प्रयुक्तम्?
(iii) "विद्वांस एव लोकेऽस्मिन् चक्षुष्मन्तः प्रकीर्तिताः" अत्र कर्तृपदम् किम्?

## 25.

**अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत | 5**

**यत् प्रोक्तं येन केनापि तस्य तत्त्वार्थनिर्णयः ।**
**कर्तुं शक्यो भवेद्येन स विवेक इतीरितः ॥**

**I. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम् )** **1/2x2=1**

(i) तत्त्वार्थनिर्णय: क: करोति?
(ii) विवेक: कस्य निर्णयः कर्तुं समर्थः?
(iii)येन केनापि किं कृतम् ?

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम् )** **1x2=2**

(i) विवेकी क:?

(ii)विवेक:  किं करोति ?

(iii) विवेक: कस्य तत्त्वार्थनिर्णयं कर्तुं शक्नोति?

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत - (केवलं प्रश्नद्वयम् )** **1x2=2**

(i) 'विवेकः' अस्य क्रियापदम् किम्?

(ii) श्लोकात् अविवेकपदस्य विलोमपदं लिखत l

(iii) 'कथितम्' इत्यर्थे अत्र किं पदं प्रयुक्तम्?

## 26.

## अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत | 5

**वाक्पटु: धैर्यवान् मन्त्री सभायामप्यकातरः ।**
**स केनापि प्रकारेण परैर्न परिभूयते ॥**

**I. एकपदेन उत्तरत –(केवलं प्रश्नद्वयम् )** **1/2x2=1**

(i) कः परैः न परिभूयते?

(ii) अत्र 'सः' पदम् कस्मै प्रयुक्तम् ?

(iii) मन्त्रिणः प्रथमः गुणः कः?

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम् )** **1x2=2**

(i)मन्त्री कीदृशः भवेत् ?

(ii)वाक्पटु: कः कदापि न परिभूयते ?

(iii) धैर्यवान् मन्त्री सभायां कीदृशः भूत्वा तिष्ठति ?

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत –(केवलं प्रश्नद्वयम् )** **1x2=2**

(i) 'न कातरः' इति स्थाने किं पदं प्रयुक्तम् ?

(ii) श्लोके क्रियापदं किम् प्रयुक्तम् ?

(iii) "वाक्पटु: धैर्यवान् मन्त्री "अत्र विशेष्यपदं किम् ?

## 27.

## अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत | 5

**य इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च।**
**न कुर्यादहितं कर्म स परेभ्यः कदापि च ॥**

**I. एकपदेन उत्तरत –(केवलं प्रश्नद्वयम् )** **1/2x2=1**

(i) जनः आत्मनः किम् इच्छति?

(ii) मनुष्यः कति सुखानि इच्छति?

(iii) नरः केषाम् अहितम् न कुर्यात् ?

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम् )** **1x2=2**

(i)कः परेभ्यः अहितम् न कुर्यात्?

(ii) मनुष्यः किं किम् इच्छति?

(iii) नरः कस्य श्रेयः कति सुखानि च इच्छति?

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत - (केवलं प्रश्नद्वयम् )** **1x2=2**

(i) 'सुखानि' अस्य विशेषण पदम् किम्?

(ii) ''कल्याणम्' इत्यर्थे अत्र किम् पदम् प्रयुक्तम्?

(iii) 'कुर्यात्' इति क्रिया पदस्य कर्तृपदम् किम् ?

**28.**

**अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत | 5**

**आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।**
**तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः ॥**

**I. एकपदेन उत्तरत –(केवलं प्रश्नद्वयम् )** **1/2x2=1**

(i) कः प्रथमः धर्मः ?

(ii) "अस्माकं व्यवहारः उचितः भवेत्" इति केषां वचनम् अस्ति?

(iii) आचारः कीदृशः धर्मः?

**II. पूर्णवाक्येन उत्तरत -(केवलं प्रश्नद्वयम् )** **1x2=2**

(i)प्राणेभ्यः अपि विशेषतः कः रक्षणीयः?

(ii)सः केभ्यः अपि विशेषो भवति ?

(iii) विदुषां वचः किम्?

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत –(केवलं प्रश्नद्वयम् )** **1x2=2**

(i) 'दुराचारम्' इति पदस्य किं विपरीतार्थकं पदम्?

(ii) 'प्रथम धर्मः' इति अनयोः पदयोः विशेष्यपदं किम्?

(iii) द्वितीयपंक्तौ क्रियापदं किम् ?

**29.**

**अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत | 5**

**यः सप्तराज्येषु विभासमानः, तरङ्गिणी यत्र च लोहिताख्या।**
**'ईटा' हि यस्यास्ति पुरी प्रधाना, सुस्वागतं भो ! अरुणाचलेऽस्मिन् ।।**

**I. एकपदेन उत्तरत –(केवलं प्रश्नद्वयम् )** **1/2x2=1**

(i) नद्याः नाम किम् अस्ति ?

(ii) 'ईटा' कस्य प्रधाना पुरी अस्ति?

(iii) लोहिताख्या तरङ्गिनी कुत्र अस्ति?

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम् )** **1x2=2**

(i) सप्तराज्येषु कः विभासमानः?

(ii) अरुणाचलस्य कीदृशी पुरी 'ईटा' अस्ति ?

(iii) कस्मिन् प्रदेशे सुस्वागतम् भवति ?

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत - (केवलं प्रश्नद्वयम् )** **1x2=2**

(i) नदी' इति पदस्य पर्यायपदं श्लोकात् अवचित्य लिखत।

(ii ) पुरी' इति पदस्य विशेषणपदं किम् ?

(iii) ईटा' हि यस्यास्ति पुरी प्रधाना' अत्र क्रियापदम् किम् ?

## उत्तर- संकेतः

## पद्यांशः

**1.**

**1. एकपदेन उत्तरत** **½ * 2 = 1**

(i) शारदायाः। (ii) वदनाम्बुजे समीपम् (iii) शारदा

**II. पूर्णवाक्येन उत्तरत** **1*2 =2**

i.सर्वदा सरस्वती अस्माकं सन्निधिं क्रियात्।

ii.शारदा अस्माकं सन्निधिं क्रियात्।

iii.सर्वदा शारदा मुखकमले निवासं क्रियात्।

**III. निर्देशानुसारम्उचितम्उत्तरंचित्वालिखत (केवलंप्रश्नद्वयम्)** **1 * 2 = 2**

(i) क्रियात्　(ii) शारदा　(iii) वदनाम्बुजे

**2.**

**1. एकपदेन उत्तरत** **½ * 2 = 1**

(i) अपूर्वः।　(ii) व्ययत:　(iii)क्षयम्

**II. पूर्णवाक्येन उत्तरत** **1*2 =2**

(i) सरस्वत्याः कोशः सञ्चयात् क्षयम् आयाति।

(ii) व्ययत: वृद्धिमायाति ।

(iii) अपूर्व: कोष:भारत्यां विद्यते ।

**III. निर्देशानुसारम्उचितम्उत्तरंचित्वालिखत (केवलंप्रश्नद्वयम्)** **1 * 2 = 2**

(i) भारति ।　(ii) वृद्धिं /क्षयम् ।　(iii) वृद्धिम्।

**3**

**1. एकपदेन उत्तरत** **½ * 2 = 1**

(i) चक्षुः ।　(ii) रागेण।　(iii) त्यागेन।

**II. पूर्णवाक्येन उत्तरत** **1*2 =2**

(i) तपः सत्यसमम् अस्ति।

(ii) विद्या समं चक्षु: नास्ति।

(iii) त्यागसमं सुखं नास्ति l

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत (केवलंप्रश्नद्वयम्)** **1 * 2 = 2**

(i) अस्ति　(ii) सुखम्　(iii) चक्षु:

**4**

**1. एकपदेन उत्तरत** **½ * 2 = 1**

(i) छाया/वाणी　(ii) वाणी　(iii) शीतलं

**II. पूर्णवाक्येन उत्तरत।** **1*2 =2**

i.शीतलं सलिलम् अपि पुरुषं न प्रह्लादयति ।

ii. पुरुषं मधुरवाणी आनन्दयति।

iii शीतला छाया अपि पुरुषं न प्रह्लादयति।

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत (केवलंप्रश्नद्वयम्)** **1 * 2 = 2**

(i) प्रह्लादयति　(ii) शीतला　(iii) प्रह्लादयति

**5**

**1. एकपदेन उत्तरत** **½ * 2 = 1**

(i) शुश्रूषा　(ii) ग्रहणं।　(iii) द्वितीय:

**II. पूर्णवाक्येन उत्तरत।** **1*2 =2**

(i) धीगुणाः अष्ट सन्ति।

(ii) श्लोके ऊहः अपोहः इति विपर्ययद्वयं प्रयुक्तम्।

(iii) शुश्रूषा श्रवणं ग्रहणं धारणं ऊहः अपोहःअर्थविज्ञानं तत्त्वज्ञानं च धीगुणा: सन्ति l

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत** **1 * 2 = 2**

(i) शुश्रूषा　(ii) गुणा:　(iii) अर्थविज्ञानम्

**6**

**1. 1. एकपदेन उत्तरत** **½ * 2 = 1**

(i) षट् (ii) पाठकस्य। (iii) पदच्छेद:

**II. पूर्णवाक्येन उत्तरत** **1*2 =2**

i. पाठकगुणः माधुर्यम् अस्ति।

ii.माधुर्यमक्षरव्यक्तिः पदच्छेद: सुस्वरः धैर्यं लयसमर्थं च एते पाठका गुणाः।

iii.अक्षरव्यक्ति: धैर्यं च l

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत (केवलंप्रश्नद्वयम्)** **1 * 2 = 2**

(i) माधुर्यम् (ii) अक्षरव्यक्तिः (iii) गुणा:

**7**

**1. एकपदेन उत्तरत** **½ * 2 =1**

(i) शिष्य: (ii) कालेन (iii) आचार्यात्

**II. पूर्णवाक्येन उत्तरत** **1*2 =2**

(i) आचार्यात् पादम् आदत्ते।

(ii) कालेन तृतीयं पादं ग्रहणाति।

(iii) शिष्य: सब्रह्मचारिभि: विद्यां प्राप्नोति l

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत (केवलंप्रश्नद्वयम्)** **1 * 2 = 2**

(i) स्व (ii) शिष्य: (iii) आदत्ते

**8**

**1. 1. एकपदेन उत्तरत** **½ * 2 = 1**

(i) वाक्यम्। (ii) तपः। (iii) वाङ्मयम्

**II. पूर्णवाक्येन उत्तरत** **1*2 =2**

i. वाक्य अनुद्वेगकरं, सत्यं, प्रियं हितं च स्यात्।

ii. वाङ्मयं तप उच्यते।

iii.श्लोके वाक्यशब्दस्य कृते त्रीणि विशेषणपदानि प्रयुक्तानि l

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत** **1 * 2 = 2**

(i) उच्यते (ii) अनुद्वेगकरं (iii) वाक्यस्य

**9**

**1. एकपदेन उत्तरत** **½ * 2 = 1**

(i) पापतर: (ii) मन:। (iii) अनिश्चितमते:

**II. पूर्णवाक्येन उत्तरत** **1*2 =2**

(i) पापतरः कार्पण्यानिश्चितमतेः मनः अन्यथा कुरुते।

(ii) यः प्रतिज्ञाय कृत्वा दानं न करोति। सः कार्पण्यः भवति।

(iii) प्रतिज्ञाय कृत्वा मनः अन्यथा न कर्तव्यम्।

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत (केवलंप्रश्नद्वयम्)** **1 * 2 = 2**

(ii) कुरुते (ii) कार्पण्य: (iii) कार्पण्यम्

**10**

**1. एकपदेन उत्तरत** **½ * 2 = 1**

(i) राज्ञ: (ii) देवेन्द्रः। (iii) नृपाय

**II. पूर्णवाक्येन उत्तरत** **1*2 =2**

i. शक्रः राज्ञः त्यागवृत्तिं प्रशंसन् अवदत् - शक्रोऽहमस्मि देवेन्द्रः त्वत्समीपमुपागतः। वरं वृणीश्व राजर्षे। यदिच्छसि

ii.शक्रः नृपाय वरं दातुम् इच्छति।

iii.राज्ञ: समीपं शक्र: आगत: l

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत** **1 * 2 = 2**

(i) शक्र: (ii) वरम् (iii) देवेन्द्र:

**11**

**1. एकपदेन उत्तरत** **½ * 2= 1**

(i) एकैकपक्षे (ii) काक: (iii) माणिक्यरत्नम्

**II. पूर्णवाक्येन उत्तरत** **1*2 =2**

(i) काकस्य गात्रं काञ्चनस्य भवेत्।

(ii) काकः राजहंसः भवितुं न शक्नोति।

(iii) माणिक्यरत्नम् चञ्चुदेशे भवेत् l

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत (केवलंप्रश्नद्वयम्)** **1 * 2 = 2**

(i) गात्रम् (ii) भवति (iii) तथापि

**12**

**1. एकपदेन उत्तरत** **½ * 2 = 1**

(i) हंसः (ii) श्वेत: (iii) हंस:

**II. पूर्णवाक्येन उत्तरत** **1*2 =2**

i.हंस: श्वेतः बकः श्वेतः, नीरक्षीरविवेके हंसः, हंसः एव भवति ।

ii.नीरक्षीरविवेके हंसः, हंसः एव भवति ।

iii.बक हंसयो: भेद: नीरक्षीरविवेके ज्ञायते l

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत** **1 * 2 = 2**

(i) श्वेत: (ii) श्वेत: (iii) हंस:

**13**

**1. एकपदेन उत्तरत** **½ * 2= 1**

(i) वार्ष्णेय! (ii) पुरुषः पापं चरति।: (iii) पुरुष:

**II. पूर्णवाक्येन उत्तरत** **1*2 =2**

(i) अनिच्छन् अपि पुरुषः पापं करोति।

(ii) पुरुषः एव बलादिव नियुक्तः भवति।

(iii) पापं पुरुष: चरति l

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत (केवलंप्रश्नद्वयम्)** **1 * 2 = 2**

(i) वार्ष्णेय! (ii) चरति (iii) पुरुषस्य

**14**

**1. एकपदेन उत्तरत** **½ * 2 = 1**

(i) रजोगुणात् (ii) समुद्भव: (iii)काम: क्रोध: च

**II. पूर्णवाक्येन उत्तरत** **1*2 =2**

i. रजोगुणसमुद्भव: कामक्रोधौ स्त:l

ii.काम: एष महापाप्मा भवति।

iii.वैरिणं एनं (कामक्रोधं )विद्धि l

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत** **1 * 2 = 2**

(i) विद्धि (ii) कामस्य (iii) वैरी

**15**

**1. एकपदेन उत्तरत** **½ * 2= 1**

(i) कामात् (ii) कामक्रोधोद्भवं वेगम् (iii) युक्त:

**II. पूर्णवाक्येन उत्तरत** **1*2 =2**

(i)यः शरीर-विमोक्षणात् प्राक् कामक्रोधोद्भवम् वेगं सोढुं शक्नोति सः नरः सुखी भवति।

(ii)सः नरः युक्तः भवति।

(iii) कामक्रोधोद्भवम् वेगं नर: अस्मिन् संसारे एव सहते l

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत (केवलंप्रश्नद्वयम्)** **1 * 2 = 2**

(i) नरः (ii) युक्त: (iii) शक्नोति

**16**

**1. एकपदेन उत्तरत** **½ * 2 = 1**

(i) विषयान् (ii) जन: (iii) सङ्गात्

**II. पूर्णवाक्येन उत्तरत** **1*2 =2**

i. कामात् क्रोधः उपजायते।

ii.मानवस्य विषयेषु सङ्ग: उपजायते ।

iii.विषयान् ध्यायत: नरस्य विषयेषु सङ्ग: उपजायते l

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत** **1 * 2 = 2**

(i) सञ्जायते (ii) पुंसः (iii) अभिजायते

**17**

**1. एकपदेन उत्तरत** **½ * 2= 1**

(i) सम्मोह: (ii) क्रोधः (iii) बुद्धिनाश:

**II. पूर्णवाक्येन उत्तरत** **1*2 =2**

(i) बुद्धिनाशात् मनुष्यः प्रणश्यति।

(ii) क्रोधात् सम्मोह: भवति l

(iii) सम्मोहात् स्मृति विभ्रम: भवति l

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत (केवलंप्रश्नद्वयम्)** **1 * 2 = 2**

(i) प्रणश्यति। (ii) प्रणश्यति (iii) सम्मोह:

**18**

**1. एकपदेन उत्तरत** **½ * 2 = 1**

(i) अर्जुनस्य (ii) पाप्मानम् (iii) इन्द्रियाणि

**II. पूर्णवाक्येन उत्तरत** **1*2 =2**

i. आदौ इन्द्रियाणि वशीकरणीयानि।

ii इदम् उपदेश कृष्णः अर्जुनाय यच्छति।

iii . इन्द्रियाणि नियम्य पाप्मानं प्रजहि l

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत** **1 * 2 = 2**

(i) कामस्य (ii) प्रजहि (iii) आदौ

**19**

**1. एकपदेन उत्तरत** **½ * 2= 1**

(i) चञ्चलम् (ii) कृष्ण! (iii) वायो:

**II. पूर्णवाक्येन उत्तरत** **1*2 =2**

**(i)** मनसः निग्रहं सुदुष्करम् मन्यते।

(ii) मनः अतीव चञ्चलं वर्तते।

(iii) मन: बलवद्दृढं प्रमाथि l

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत (केवलंप्रश्नद्वयम्)** **1 * 2 = 2**

(i) चञ्चलम् (ii) प्रमाथि (iii) अहम्

**20**

**1. एकपदेन उत्तरत** **½ * 2 = 1**

(i) कृष्ण: (ii) मन: (iii) अर्जुनाय

**II. पूर्णवाक्येन उत्तरत** **1*2 =2**

i.मनः अभ्यासेन वैराग्येण च गृह्यते।

ii.मनस: अभ्यासेन वैराग्येण च वशीकरणं भवति।

iii.मन: दुर्निग्रहं चलं च अस्ति l

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत** **1 * 2 = 2**

i. दुर्निग्रहम् ii. दुर्निग्रहम् iii. मन:

**21**

**1. एकपदेन उत्तरत** **½ * 2= 1**

(i) पिता (ii) बाल्ये (iii) विद्याधनम्

**II. पूर्णवाक्येन उत्तरत** **1*2 =2**

**(i)** पिता पुत्राय विद्याधनम् यच्छति।

(ii) अत्र विद्याम् एव धनम् अमन्यत्।

(iii) पुत्र:पितरं प्रति कृतज्ञता अनुभवेत् l

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत (केवलंप्रश्नद्वयम्)** **1 * 2 = 2**

(i) महत् (ii) कृतज्ञता (iii) तप:

**22**

**1. एकपदेन उत्तरत** **½ * 2 = 1**

(i) अवक्रता (ii) वाचि (iii) वक्रता

**II. पूर्णवाक्येन उत्तरत** **1*2 =2**

i. चित्ते वाचि च अवक्रता समत्वम् कथ्यते।

ii.महात्मानः तदेव समत्त्वं कथयन्ति।

iii.चित्ते वाचि च अवक्रता समत्वम् उच्यते l

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत** **1 * 2 = 2**

(i) अवक्रता (ii) अवक्रता (iii) अवक्रता

**23**

**1. एकपदेन उत्तरत** **½ * 2= 1**

(i) धर्मप्रदाम् (ii) विमूढधीः (iii) धर्मप्रदाम्

**II. पूर्णवाक्येन उत्तरत** **1*2 =2**

**(i)** विमूढधीः अपक्वम् फलम् खादति।

(ii) धर्मप्रदां वाणीम् अभ्युदीरयेत् l
(iii) विमूढधी: पक्वं फलं त्यक्त्वा अपक्वं फलं खादति l

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत (केवलंप्रश्नद्वयम्)** **1 * 2 = 2**

(i) परुषाम् (ii) अपक्वम् (iii) भुङ्क्ते

**24**

**1. एकपदेन उत्तरत** **½ * 2 = 1**

(i) विद्वांसः (ii) लोके (iii) वदने

**II. पूर्णवाक्येन उत्तरत** **1*2 =2**

(i) मूर्खाणाम् वदने ये नेत्रे ते चक्षुर्नामनी।
(ii) विद्याहीनाः नेत्रहीनाः इव भवन्ति।
(iii) अस्मिन् संसारे चक्षुष्मन्तः विद्वांस: प्रकीर्तिता:l

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत** **1 * 2 = 2**

(i) अस्मिन् (ii) प्रकीर्तिता: (iii) चक्षुष्मन्तः

**25**

**1. एकपदेन उत्तरत** **½ * 2= 1**

(i) विवेक: (ii) तत्त्वार्थस्य (iii) प्रोक्तम्

**II. पूर्णवाक्येन उत्तरत** **1*2 =2**

**(i)** येन केनापि यत् प्रोक्तम् तस्य तत्त्वार्थनिर्णयः कर्तुं शक्यः जनः विवेकी भवति।
(ii) विवेकः एव तत्त्वार्थनिर्णयं करोति।
(iii) विवेक: येन केनापि यत् प्रोक्तम् तस्य तत्त्वार्थनिर्णयं कर्तुं शक्नोति l

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत (केवलंप्रश्नद्वयम्)** **1 * 2 = 2**

(i) ईरितः (ii) विवेक: (iii) प्रोक्तम्

**26**

**1. एकपदेन उत्तरत** **½ * 2 = 1**

(i) अकातर: मन्त्री (ii) मन्त्रिणे (iii) वाक्पटु:

**II. पूर्णवाक्येन उत्तरत** **1*2 =2**

(i) मन्त्री वाक्पटुः, धैर्यवान् सभायाम् अकातरः च भवेत्।
(ii) वाक्पटुः मन्त्री कदापि न परिभूयते।
(iii) धैर्यवान् मन्त्री सभायां अकातर: भूत्वा तिष्ठति l

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत** **1 * 2 = 2**

(i) अकातरः (ii) परिभूयते (iii) मन्त्री

**27**

**1. एकपदेन उत्तरत** **½ * 2 =1**

(i) श्रेयः (ii) प्रभूतानि (iii) परेषाम्

**II. पूर्णवाक्येन उत्तरत** **1*2 =2**

(i) यः आत्मनः श्रेयः प्रभूतानि सुखानि च इच्छति सः परेभ्यः अहितम् न कुर्यात्।
(ii) मनुष्य: प्रभूतानि सुखानि इच्छति।
(iii) नर: आत्मन: श्रेय: प्रभूतानि सुखानि च इच्छति l

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत (केवलंप्रश्नद्वयम्)** **1 * 2 = 2**

(i ) प्रभूतानि (ii) श्रेयः (iii) सः

**28**

**1. एकपदेन उत्तरत** **½ * 2 = 1**

(i) आचारः (ii) विदुषाम् (iii) प्रथम:

**II. पूर्णवाक्येन उत्तरत** **1*2 =2**

(i) प्राणेभ्यः अपि विशेषतः सदाचारः रक्षणीयः।

(ii) सः प्राणेभ्यः अपि विशेषो भवति ।

(iii) आचार: प्रथमो धर्म: इति विदुषां वच: l

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत** **1 * 2 = 2**

(i) सदाचारम् (ii) धर्मः (iii) रक्षेत्

**29**

**1. एकपदेन उत्तरत** **½ * 2 = 1**

(i) लोहिता (ii) अरुणाचल प्रदेशस्य (iii) अरुणाचले

**II. पूर्णवाक्येन उत्तरत** **1*2 =2**

i. अरुणाचलप्रदेशः सप्तराज्येषु विभासमानः अस्ति।

ii. अरुणाचलस्य प्रधाना पुरी 'ईटा' अस्ति।

iii.अरुणाचलप्रदेशे सुस्वागतम् भवति।

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत** **1 * 2 = 2**

(i) तरङ्गिणी (ii) प्रधाना (iii) अस्ति

**पठित-अवबोधनम्**

**नाट्यखण्डः**

**तृतीयः पाठः- रमणीया हि सृष्टिः एषा**

**नाट्यांशः -01**

**अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**

[**स्थानम्** - सरस्तीरम् ! समयः प्रभातवेला तत्र राजहंस: हंसी च विहरतः | नेपथ्ये काकध्वनिः श्रूयते ।]

**राजहंसः** - अये! किन्तु खलु सरस्तीरे विहरति मयि केनापि कर्कशैः 'का का' शब्दैः वातावरणम् आकुलीक्रियते ?

**राजहंसी** - भर्तः ! काकात् अन्यः को भवितुमर्हति ? अस्य वर्णः अपि कृष्णः, कर्म अपि कृष्णम्। मेध्यम् अमेध्यं सर्वमेव भक्षयति । कर्णकटुशब्दैः ----

**काकः** - (प्रविश्य, सक्रोधम्) आः किम् उक्तवती भवती ? यदि अहं कृष्णवर्णः तर्हि श्रीरामस्य वर्णः कीदृशः? श्रीवासुदेवस्य वर्णः कीदृशः ? मुग्धे! अहं तु अतीव कर्तव्यपरायणः । प्रभाते 'काका' ध्वनिना सुप्तान् प्रबोधयामि कर्मसु च विनियोजयामि।

**एकपदेन उत्तरत (केवलं प्रश्नद्वयम् )**

(i) नेपथ्ये का श्रूयते ?

(ii) काकात् अन्यः कः भवितुमर्हति इति का पृच्छति ?

(iii)कः मेध्यम् अमेध्यं सर्वमेव भक्षयति ?

**पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम् )**

(i) सरस्तीरे के विहरतः ?

(ii) काकः प्रभाते किं करोति ?

(iii) क: कर्तव्यपरायणः अस्ति ?

**भाषिकं कार्यम् (केवलं प्रश्नद्वयम् )**

(i) शुद्धम् इत्यर्थे किं पदम् अनुच्छेदे प्रयुक्तम् ?

(ii) शब्दैः इत्यस्य विशेषणपदम् अनुच्छेदात् चित्वा लिखत ।

(iii) श्वेतः इति पदस्य विलोमपदं किम् ?

**नाट्यांशः -02**

**अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**

**राजहंसः** - हुँ! किमनेन ? एतत् कार्यं तु कुक्कुटोऽपि करोति ।

**काकः** - (विहस्य) कुक्कुटः | अरे अद्य कुतः कुक्कुटा: नगरेषु। अहमेव सर्वत्र सुलभः ।

**राजहंसी** - भो भो वाचाल ! स्वीयैः कटुभिः क्वणितैः जनजागरणात् अन्यत् तु किमपि न करोषि ?

**काकः** - अहो अज्ञानं भवत्याः ! अरे यस्य गृहस्य भित्तौ स्थित्वा आलपामि जनाः प्रियस्य आगमनसङ्केतं मत्वा हृष्यन्ति | किं बहुना ! अहं तु एतादृशः सत्यप्रियः यत् मातरः शिशून् कथयन्ति " अनृतं वदसि चेत् काकः दशेत्। " अस्माकम् ऐक्यं तु जगत्प्रसिद्धम्। सर्वथा जागरूकोऽहं छात्राणां कृते आदर्शः एव| किं न श्रुतं काकचेष्टा, बकध्यानम्-----

**राजहंसः** - विरम विरम! श्रूयतां यत् जनैः सर्वदा गीयते तव विषये-

**काकस्य गात्रं यदि काञ्चनस्य माणिक्यरलं यदि चञ्चुदेशे।**
**एकैकपक्षे ग्रथितं मणीनां तथापि काको न तु राजहंसः ॥ 1 ॥**

अपि च

**हंस श्वेतः बकः श्वेतः को भेदः बकहंसयोः ।**
**नीरक्षीरविवेके तु हंसो हंसः बको बकः ॥ 2 11**

**एकपदेन उत्तरत (केवलं प्रश्नद्वयम् )**

(i)काकः केषां कृते आदर्शः भवति ?

(ii)कः सर्वत्र सुलभः अस्ति ?

(iii) काकः कुत्र स्थित्वा आलपति ?

**पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम् )**

(i) मातरः शिशून् किं कथयन्ति?

(ii) बकहंसयोः भेदः कदा भवति ?

(iii) छात्राणां कृते क: आदर्शः ?

**भाषिकं कार्यम् (केवलं प्रश्नद्वयम् )**

(i) सत्यम् इति पदस्य विलोमपदम् अनुच्छेदात् चित्वा लिखत।

(ii)एतत् कार्यं तु कुक्कुटोऽपि करोति – अस्मिन् वाक्ये कर्तृपदं किम् ?

(iii) शरीरम् इति पदस्य समानार्थकपदम् अनुच्छेदात् चित्वा लिखत।

## नाट्यांशः -03

**अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**

**बकः** - (प्रविश्य, स्वपक्षौ अवधूय) कथं माम् अपि अधिक्षिपसि ? किं ते महत्त्वम् ? वर्षर्तौ तु मानसं पलायसे| अहम् एव अत्र वृष्टेः अभिनन्दनं करोमि| कीदृशी तव मैत्री? आपत्काले सरांसि त्यक्त्वा दूरं व्रजसि| वस्तुतः अहमेव शीतले जले बहुकालपर्यन्तम् अविचलं ध्यानमग्नः 'स्थितप्रज्ञ' इव तिष्ठामि | दुग्धधवला मे पक्षाः | न जाने कथं माम् अपरिगणयन्तः जनाः चित्रवर्णम् अहिभुजं मयूरं 'राष्ट्र- पक्षी' इति मन्यन्ते। अहमेव योग्य: |

**मयूरः** - (प्रविश्य साट्टहासम् ) सत्यं सत्यम्। अहमेव राष्ट्रपक्षी | को न जानाति तव ध्यानावस्थाम् ? मौनं धृत्वा वराकान् मीनान् छलेन अधिगृह्य क्रूरतया भक्षयसि। धिक् त्वाम्। अवमानितं खलु सर्वं पक्षिकुलं त्वया।

**काकः** - रे सर्पभक्षक! नर्तनात् अन्यत् किम् अपरं जानासि ?

**मयूरः** - श्रूयतां श्रूयताम्! मम नृत्यं तु प्रकृतेः आराधना | पश्य! चारुवर्तुलचन्द्रिकाशोभितानां मम पिच्छानाम् अपूर्वं सौन्दर्यम्। मम केकारवं श्रुत्वा कोकिलः अपि लज्जते मम शिरसि राजमुकुटमिव शिखां स्थापयता विधात्रा एव अहं पक्षिराजः कृतः।

**एकपदेन उत्तरत (केवलं प्रश्नद्वयम् )**

(i)कः स्वपक्षौ अवधूय प्रविशति ?

(ii) कः वृष्टेः अभिनन्दनं करोति ?

(iii)केन मयूरः पक्षिराजः कृतः ?

**पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम् )**

(i) जनाः कं "राष्ट्र-पक्षी "इति मन्यन्ते **?**

(ii) मम नृत्यं तु प्रकृतेः आराधना – इति कः वदति ?

(iii) आपत्काले सरांसि त्यक्त्वा दूरं क: व्रजति ?

**भाषिकं कार्यम् (केवलं प्रश्नद्वयम् )**

(i)अहम् एव अत्र वृष्टेः अभिनन्दनं करोमि – अस्मिन् वाक्ये क्रियापदं किम् ?

(ii) "परित्यज्य" इत्यस्य अर्थे किं पदम् अनुच्छेदे प्रयुक्तम् ?

(iii) जले इत्यस्य विशेषणशब्दं किम् ?

## नाट्यांशः - 04

**अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**

**कोकिलः** - (प्रविश्य) रे मयूर! अलम् अतिविकत्थनेन | मधुमासे आम्रवृक्षे स्थित्वा यदा अहं पञ्चमस्वरेण गायामि तदा श्रोतारः कथयन्ति-

**काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः ।**
**वसन्तसमये प्राप्ते काकः काकः पिकः पिकः ॥ 3 ॥**

**काकः** - रे परभृत्! अहं यदि तव सन्ततिं न पालयामि तर्हि कुत्र स्युः पिकाः ? अतः अहम् एव करुणापरः पक्षिसम्राट् काकः ।

**राजहंसः** - शान्तं शान्तम् | अहमेव नीरक्षीरविवेकी पक्षिणां राजा!

**बकः** - धिक् युष्मान् ! अहमेव सर्वशिरोमणिः ।

( ततः प्रकृतिमाता प्रविशति )

**प्रकृतिः** - (सस्नेहम्) अलम् अलं मिथः कलहेन । अहं प्रकृतिः एव युष्माकं जननी। यूयं सर्वे एव मम प्रियाः। सर्वेषामेव महत्त्वं विद्यते यथासमयम्। सर्वैः एव मे शोभा | न तावत् कलहेन समयं वृथा यापयेत| मिलित्वा एव मोदध्वं जीवनं च रसमयं कुरुध्वम् ।

सर्वे मिलित्वा गायन्ति-

**आयुषः क्षण एकोऽपि न लभ्यः स्वर्णकोटिकैः ।**
**स चेन्निरर्थकं नीतः का नु हानिस्ततोऽधिका ॥ 4 ॥**
**अधुना रमणीया हि सृष्टिरेषा जगत्पतेः ।**
**जीवाः सर्वेऽत्र मोदन्तां भावयन्तः परस्परम् ॥ 5 ॥**

**एकपदेन उत्तरत (केवलं प्रश्नद्वयम् )**

(i)मधुमासे आम्रवृक्षे स्थित्वा कः पञ्चमस्वरेण गायति ?

(ii) अहमेव सर्वशिरोमणिः इति कः वदति ?

(iii) एषा कस्य सृष्टिः ?

**पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम् )**

(i) काकपिकयोः भेदः कदा भवति ?

(ii)प्रकृतिमाता सस्नेहं किं वदति ?

(iii)राजहंस: किं वदति ?

**भाषिकं कार्यम् (केवलं प्रश्नद्वयम् )**

(i)कोकिलः इति पदस्य समानार्थकपदम् अनुच्छेदे किं प्रयुक्तम् ?

(ii)करुणापरः इत्यस्य विशेष्यपदं किम् ?

(iii) जीवाः सर्वेऽत्र मोदन्ताम् – अत्र क्रियापदं किम् ?

## षष्ठः पाठः - राष्ट्रं संरक्ष्यमेव हि

**<u>नाट्यांशः -05</u>**

**अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**

**ध्रुवः** - विचित्रः अयं संसारः। केचन महापुरुषाः महात्मगान्धिवत् अहिंसायाः पाठं पाठयन्ति। अन्ये च आणविक अस्त्राणां निर्माणं विधाय जगतः संहारं कर्तुम् इच्छन्ति।

**सिद्धार्थः**- वस्तुतः विज्ञानस्य सत्प्रयोगः राष्ट्रस्य कल्याणाय, दुरुपयोगश्च विनाशाय भवति।

**सुश्रुतः** - आम्, दुरुपयोगः तु अभिशापः एव।

**चरकः** - विदितम् अस्ति किं युष्माकं यत् प्राचीनकाले अपि आणविक अस्त्राणां मानवेषु प्रयोगः निषिद्धः आसीत्।

**ध्रुवः** - किं पुरा अपि एतादृशानि अस्त्राणि आसन् येषां मानवेषु प्रयोगः वर्जितः आसीत् ।

**सिद्धार्थः**- किमिदं सत्यम् ? आश्चर्यम् ।

**चरकः**- प्रत्यक्षं किं प्रमाणम्? 'राष्ट्रं संरक्ष्यमेव हि' अयं पाठः महाभारत-आधारितः।

**1. एकपदेन उत्तरत(केवलं प्रश्नद्वयम् )**

(i) विचित्रः क:?

(ii) कस्य सत्प्रयोगः राष्ट्रस्य कल्याणाय?

(iii) पुरा मानवेषु कस्य प्रयोगः वर्जितः आसीत्?

**II. पूर्णवाक्येन उत्तरत(केवलं प्रश्नद्वयम् )**

(i) आणविक अस्त्राणां निर्माणं विधाय किम् कर्तुम् इच्छन्ति जना:?

(ii) विज्ञानस्य प्रयोग:कीदृश: भवति?

(iii) मानवेषु केषां प्रयोगः निषिद्धः आसीत्?

**III. भाषिकं कार्यम् (केवलं प्रश्नद्वयम् )**

(i)'वर्जित:' इति पदस्य समानार्थकपदम् अनुच्छेदे किं प्रयुक्तम् ?

(ii) "आणविक अस्त्रं" इत्यत्र विशेष्यपदं किम् ?

(iii) "पुरा अपि एतादृशानि अस्त्राणि आसन्" – अत्र क्रियापदं किम् ?

## नाट्यांश: -06

**अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**

(ततः पुत्रशोकसन्तप्ताः युधिष्ठिरः भीमः द्रौपदी च रणभूमौ प्रविशन्ति ।)

**द्रौपदी -** (दीर्घ निःश्वस्य) हा हन्त किम् इदं घोरम् आपतितम्। पापकर्मणा द्रौणिना मे पुत्राः भ्रातरः च हताः। अग्निः इव दहति माम् अयं शोकः ।

**युधिष्ठिरः-** शुभे! धैर्यं धारय। नूनं तव पुत्राः वीरगतिम् एव प्राप्ताः । वीरजननी त्वं शोचितुं न अर्हसि।

**द्रौपदी -** कथं मन्दभाग्या अहं धैर्यं धारयामि । यावत् असौ क्रूरकर्मा न दण्ड्यते तावत् अहम् इतः न गमिष्यामि अत्रैव प्राणत्यागं च करिष्यामि ।

**युधिष्ठिरः-** प्रिये !मा एवं ब्रूयाः। स पापकर्मा कुत्र गतः इति न जानीमः । अतिदूरं किञ्चिद् दुर्गमवनं प्रविष्टः भवेत्।

**द्रौपदी -** (भीमं प्रति) आर्यपुत्र! क्षत्रधर्मम् अनुस्मरन् मां शोकसागरात् रक्ष | अस्मिन् संसारे कश्चित् अपि त्वया सदृशः पराक्रमी नास्ति| पुरा वारणावते त्वमेव पाण्डवान् रक्षितवान्। विराटनगरे अपि त्वं मां प्राणसंकटात् उद्धृतवान्।

**I एकपदेन उत्तरत- (केवलं प्रश्नद्वयम् )**

i. केन द्रौपद्या: पुत्रा: हता: ?

ii. वारणावते पाण्डवान् कः रक्षितवान्?

iii. के वीरगतिम् एव प्राप्ताः ?

II पूर्णवाक्येन उत्तरत- **(केवलं प्रश्नद्वयम् )**

i. संसारे परमपराक्रमी क: आसीत् ?

ii. के रणभूमौ प्रविशन्ति ?

iii. द्रौपदी भीमं प्रति किं कथयति ?

III भाषिक कार्य – **(केवलं प्रश्नद्वयम् )**

i. "मन्दभाग्या" इति कस्या: विशेषणम्?

ii. "रक्षितवान्" क्रियाया: कर्तृपदं किम्?

iii. "लोके" इति शब्दस्य पर्यायपदं किम्?

## नाट्यांश: -07

**अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**

**श्रीकृष्णः-** भो धर्मराज। समीचीनं न कृतं भवता । पुत्रशोकविह्वलः भीमसेनः एकाकी एवं द्रौणिं हन्तुम् अभिधावति ।

**युधिष्ठिरः-** भगवन्! सः तु एकाकी एव द्रोणपुत्राय अलम्।

**श्रीकृष्णः-** वत्स! न जानाति भवान् द्रौणेः चपलां प्रकृतिम् । पितुः द्रोणात् प्राप्तं ब्रह्मशिरो नाम अस्त्रं विद्यते तस्य पार्श्वे यदि तत् प्रयुज्यते, सर्वा पृथ्वी दग्धा स्यात् |

**युधिष्ठिरः-** अप्येवम्! आचार्येण कीदृशः अनर्थः कृतः ? किं चपलबालकेभ्यः एतादृश-भीषणानाम् अस्त्राणां प्रदानम् उचितम् ?

**श्रीकृष्णः-** शृणु तावत्, आचार्येण तु प्रियशिष्याय अर्जुनाय एवं प्रीत्या मनसा ब्रह्मास्त्रशिक्षा प्रदत्ता किन्तु पुत्रप्रेमपराधीनेन तेन अश्वत्थामा अपि तच्छिक्षया वञ्चितः न कृतः ।

**अर्जुनः -** अपरं च अस्त्रशिक्षाप्रदानात् पूर्वम् आचार्यः पुत्रं सावधानम् अकरोत् ।

**I . एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**

(i) आचार्यः द्रोणः कं सावधानम् अकरोत्?

(ii) भीमसेनः कं हन्तुम् अभिधावति ?

(iii) द्रौणेः प्रकृतिः कीदृशी आसीत्?

**II . पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**

(i) कदा सर्वा पृथ्वी दग्धा स्यात्?

(ii) द्रोणेन अर्जुनाय कथं ब्रह्मास्त्रशिक्षा प्रदत्ता ?

(iii) अश्वत्थामा कुतः ब्रह्मशिरो नाम अस्त्रं प्राप्तवान्?

**III . निर्देशानुसारम्उत्तरत। (केवलं प्रश्नद्वयम्)**

(i) 'पर्याप्तम्' इत्यस्य किं पर्यायपदम् अत्र प्रयुक्तम्?

(il) 'जानाति' इति क्रियापदस्य कर्तृपदं किं प्रयुक्तम्?

(iii) 'दग्धा' इत्यस्य विशेष्यपदं चित्वा लिखत।

## <u>नाट्यांशः -08</u>

**अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**

**अश्वत्थामा-** रे दुष्ट भीम! त्वम् अद्य वध्योऽसि मया (विलोक्य) अये कथं श्रीकृष्णार्जुनौ युधिष्ठिरश्च ? (स्वगतम्) इदानीं किं करवाणि? आः दृष्टम्, अस्मिन् विषमे समये ब्रह्मास्त्रम् एव मे शरणम् मोचयामि अस्त्रम्। (ध्यानं नाटयति ब्रवीति च) इदम् अपाण्डवाय।

**श्रीकृष्णः-** पार्थ! पश्य, पश्य एतद् विमुच्यते ब्रह्मास्त्रं द्रोणपुत्रेण! त्रैलोक्यं दहन् इव प्रचण्डज्वालः अग्निः परितः प्रसरति । अर्जुन! अर्जुन! त्वमपि मुञ्च ब्रह्मास्त्रं एतत् निवारयितुम् ।

**अर्जुनः -** नमः भगवते । स्वस्ति आचार्यपुत्राय, स्वस्ति मे भ्रातृभ्यः। उत्सृज्यते मया ब्रह्मास्त्रम्। अस्त्रम् अस्त्रेण शाम्यताम् ।

(ततः प्रविशतः व्यासनारदौ)

**नारदः -** (व्यासं प्रति) पश्यतु भवान् । कोऽयम् अनर्थः क्रियते एताभ्यां वीराभ्याम् | समन्तात् वर्धमानाः प्रचण्डानलशिखाः आकाशं लिहन्ति इव| गगनात् सहस्रशः उल्काः भूमौ पतन्ति| कम्पते खलु सपर्वत-वन-द्रुमा सकला मही| पवनः स्तब्धः जातः। सहस्रांशुः न भासते| शैलाः विदीर्यन्ते| कथमपि एतौ निवारणीयौ, अन्यथा सकलं जगद् ध्वस्तं भविष्यति ।

**अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**

(i) त्वमपि मुञ्च ब्रह्मास्त्रम् इति कः कथयति ?

(ii) काः आकाशं लिहन्ति इव?

(iii) अस्त्रम् केन शाम्यताम् ?

**आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**

(i) कीदृशी मही कम्पते?

(ii) ब्रह्मास्त्रम् एव मे शरणम् मोचयामि अस्त्रम् इति ध्यायन् कः किं ब्रवीति ?

(iii) ब्रह्मास्त्रप्रभावेण कीदृशः अनर्थः नारदः पश्यति?

**इ. निर्देशानुसारम्उत्तरत। (केवलं प्रश्नद्वयम्)**

(i) 'पृथ्वी' इत्यस्य किं पर्यायपदम् अत्र प्रयुक्तम्?

(il) 'एतद् विमुच्यते ब्रह्मास्त्रं द्रोणपुत्रेण' किम् अत्र क्रियापदं प्रयुक्तम्?

(iii) ' सपर्वत-वन-द्रुमा' इत्यस्य विशेष्यपदं चित्वा लिखत।

## नवमः पाठः- सुस्वागतं भो! अरुणाचलेऽस्मिन्

### नाट्यांशः -09

**अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**

**पर्यटनाधिकारी-** (ध्वनिविस्तारकयन्त्रस्य समीपम् आगत्य) प्रियच्छात्राः! अभिनन्दनं भवताम् अस्मिन् प्रदेशे। प्रसीदामि यत् भवन्तः अस्य रम्यस्य प्रदेशस्य विषये तु अति उत्सुकाः। एतदर्थं स्थलानां दर्शनाय प्रबन्धः अपि वर्तते परन्तु सम्प्रति प्रश्नोत्तरमाध्यमेन भवतां जिज्ञासां शमयितुम् इच्छामि। प्रथमं तु अहम् एव एकं प्रश्नं पृच्छामि। अस्य प्रदेशस्य नाम 'अरुणाचलः कथं जातम् ? अनुमीयताम्।

**हिमांशु -** अहं चिन्तयामि यत् 'अरुणः 'तु सूर्यस्य पर्यायः। अस्य प्रकाशः सर्वप्रथमम् इमं प्रदेशं स्पृशति| अतः अरुणस्य प्रदेश: अरुणाचल: ।

**पर्यटनाधिकारी-** शोभनम्। उचितम् उक्तम्। हिमाद्रितुंगशृङ्गैः सुशोभिता सूर्योदयभूमिः इयम्। अतः अरुणाचलः। अस्मिन् प्रदेशे पञ्चाशदधिकाः नद्यः प्रवहन्ति। विपुला च अत्र वनसम्पदा | वनौषधीनां तु अयं स्रोतः एव | पुष्पाणां समृद्धिः सुगन्धिः च मनोहरः । सर्वत्र हरीतिमा शुद्धपर्यावरणेन युक्तस्य अस्य प्रदेशस्य केवलं प्रकृतिः एव न विविधा मनोहरा च प्रत्युत संस्कृतिः अपि ।

**1. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम् )**

(i) पर्यटनाधिकारी किं शमयितुम् इच्छति?

(ii) अरुणस्य प्रकाश: सर्वप्रथमम् कं प्रदेशं स्पृशति ?

(iii) केषाम् समृद्धिः सुगन्धिः च मनोहरा ?

**2. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम् )**

(i) अयम् अरुणाचलः कथम् ?

(ii) अरुणाचलप्रदेशे कति नद्यः प्रवहन्ति?

(iii) इयम् सूर्योदयभूमि: कैः सुशोभिता?

**3. निर्देशानुसारम् उत्तरत- (केवलं प्रश्नद्वयम् )**

(i) अस्य प्रकाश: सर्वप्रथमम् इमं प्रदेशं 'स्पृशति।' अत्र 'स्पृशति' इति क्रियापदस्य कर्तृपदं किम् ?

(ii) “अन्धकार:” इति शब्दस्य विलोमपदं किं प्रयुक्तम् ?

(iii) “रम्य:” इति कस्य विशेषणम्?

### नाट्यांशः -10

**अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**

**पर्यटनाधिकारी -** साधु पृष्टम्। अत्र अनेके प्रमुखोत्सवाः । 'वाङ्चो' जनजातीनां प्रमुखं पर्व 'ओरिया' इति अस्ति । एतत् तु फरवरी इति मासे मान्यते । अस्मिन् अवसरे कृषिभूमिपूजनं सेतुनिर्माणं च सामाजिकं कार्यं क्रियते । 'मोपीन' इति अपि कृषिपर्व अस्ति । देवानामपि देवः 'मोपीन' इति कथ्यते।

**हिमांशुः -** अस्माभिः 'मिथुन' इति विषये अपि किञ्चित् श्रुतम्। किं तत्?

**पर्यटनाधिकारी -** 'मिथुनः' गोमहिषसदृशः एकः विशिष्टः राजपशुः अस्ति ।

**शोभा -** वयम् अत्रत्यानाम् ऐतिहासिकस्थलानां विषये ज्ञातुम् इच्छामः ।

**पर्यटनाधिकारी -** मया पूर्वम् एव उक्तं यत् अस्य प्रदेशस्य दर्शनीयस्थलानां दर्शनाय विशेषः प्रबन्धः अपि अस्ति। अधुना तु वयम् अनेन प्रक्षेपकयन्त्रेण केषाञ्चित् स्थलानां परिचयं प्राप्स्यामः ।

**1. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम् )**

(i) देवानाम् देवः कः अस्ति?

(ii) फरवरी मासे किं पर्व सम्पद्यते?

(iii) 'मोपीन' इति कीदृशं पर्व अस्ति?

**2. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम् )**

(i) मिथुनः कीदृशः राजपशुः अस्ति?

(ii) 'ओरिया' इति केषाम् प्रमुखं पर्व अस्ति?

(iii) विशेष: प्रबन्धः किमर्थम् अस्ति ?

**3. निर्देशानुसारम् उत्तरत-(केवलं प्रश्नद्वयम् )**

(i) 'इच्छाम:' इति क्रियापदस्य कर्तृपदं किम् ?

(ii) 'उत्सव:' इत्यस्य किं पर्यायपदम् अत्र प्रयुक्तम्?

(iii) 'प्रबन्ध:' इति पदस्य विशेषणपदं किम् ?

## नाट्यांश: -11

**अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**

**पर्यटनाधिकारी-** 'मिथुन' गोमहिषसदृशः एकः विशिष्टः राजपशुः अस्ति ।

**शोभा** - वयम् अत्रत्यानाम् ऐतिहासिकस्थलानां विषये ज्ञातुम् इच्छामः |

**पर्यटनाधिकारी-** मया पूर्वम् एव उक्तं यत् अस्य प्रदेशस्य दर्शनीयस्थलानां दर्शनाय विशेषः प्रबन्धः अपि अस्ति । अधुना तु वयम् अनेन प्रक्षेपकयन्त्रेण केषाञ्चित् स्थलानां परिचयं प्राप्स्यामः । पश्यत एतत् चित्रम्।

**राजीव:** - किम् एतत् कस्यचित् दुर्गस्य चित्रम् ?

**पर्यटनाधिकारी-** आम्। एतत् दिवाङ्ग-उपत्यका-मण्डले स्थितं भीष्मकनगरदुर्गम्! अस्य अवशेषाः तु आर्यकला-संस्कृति सम्पदः परिचायकाः । अधुना इदं चित्रं पश्यत।

**1. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम् )**

(i) केषां दर्शनाय प्रबन्धः कृतः ?

(ii) विशिष्टः राजपशुः कः?

(iii) ऐतिहासिकस्थलानां विषये ज्ञातुम् उत्सुकाः के सन्ति?

**2. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम् )**

(i) भीष्मकनगरदुर्गस्य अवशेषाः कीदृशाः सन्ति।

(ii) भीष्मकनगरदुर्गम् कुत्र अस्ति?

(iii) पर्यटनाधिकारी स्थलानां परिचयं केन करिष्यति ?

**3. निर्देशानुसारम् उत्तरत- (केवलं प्रश्नद्वयम् )**

(i) 'इच्छामः' इति क्रियापदस्य कर्तृपदं किम् ?

(ii)'विशेष:' इति पदस्य विशेष्यपदं किम् ?

(iii) 'राज्यस्य' इत्यस्य किं पर्यायपदम् अत्र प्रयुक्तम्?

## नाट्यांश: -12

**अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**

**पर्यटनाधिकारी-** आम्। एतत् दिवाङ्ग-उपत्यका-मण्डले स्थितं भीष्मकनगरदुर्गम्! अस्य अवशेषाः तु आर्यकला-संस्कृति सम्पदः परिचायकाः । अधुना इदं चित्रं पश्यत।

**शैलेश:** - अहं जानामि इदं स्थानम् । इदं तु 'तवाङ्ग गोम्पा' इति प्रसिद्धः बौद्धमठ: ।

**पर्यटनाधिकारी-** सम्यक् अभिज्ञातम्। मनोहरे सुरम्ये 'तवाङ्ग' इति स्थले राजते अर्थ बौद्धमठः । पञ्चशतानां बौद्धभिक्षूणां निवासयोग्या स्थली इयम्। लोहितजनपदे अपि अनेक बौद्धविहाराः सन्ति।

**नीलिमा** - मान्यवर! मया अस्य प्रदेशस्य परशुरामकुण्डम्' इति दर्शनीयस्थलविषये अपि पठितम्। किम् इदम् ?

**1. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम् )**

(i) 'परशुरामकुण्डम्' इति दर्शनीयस्थलविषये कया पठितम् ?

(ii) अनेके बौद्धविहाराः कुत्र सन्ति?

(iii) प्रसिद्धः बौद्धमठः किम्?

**2. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम् )**

(i) भीष्मकनगरदुर्गम् कुत्र स्थितम् ?

(ii) 'तवाङ्ग गोम्पा' केषाम् मठः?

(iii) कस्य अवशेषाः आर्यकला-संस्कृति-सम्पदः परिचायकाः?

**3. निर्देशानुसारम् उत्तरत- (केवलं प्रश्नद्वयम् )**

(i) "अप्रसिध्द:" शब्दस्य कृते किं विलोमपदं अत्र प्रयुक्तम् ?

(ii) 'प्रदेशस्य' इति पदस्य विशेषणपदं किम् ?

(iii) 'पठितं' इति क्रियापदस्य कर्तृपदं किम् ?

## उत्तर-संकेतः

## नाट्यखण्डः

### तृतीयः पाठः - रमणीया हि सृष्टिः एषा

#### नाट्यांश: -01

**अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**

**एकपदेन उत्तरत।**

(i) काकध्वनिः (ii) राजहंसी (iii) काकः

**पूर्णवाक्येन उत्तरत।**

(i) सरस्तीरे राजहंसः हंसी च विहरतः।

(ii) प्रभाते "का का " ध्वनिना सुप्तान् प्रबोधयति कर्मसु च विनियोजयति ।

(iii) काक: कर्तव्यपरायण: अस्ति l

**भाषिकं कार्यम्**

(i) मेध्यम् (ii) कर्कशैः (iii) कृष्णः

#### नाट्यांश: -02

**एकपदेन उत्तरत।**

(i) छात्राणाम् (ii) काकः (iii) गृहस्य भित्तौ

**पूर्णवाक्येन उत्तरत।**

(i) मातरः शिशून् कथयन्ति –"अनृतं वदसि चेत् काकः दशेत् ।"

(ii) बकहंसयोः भेदः नीरक्षीरविवेके भवति।

(iii) छात्राणाम् कृते काक: आदर्श: l

**भाषिकं कार्यम्।**

(i) अनृतम् (ii) कुक्कुटः (iii) गात्रम्

#### नाट्यांश: -03

**एकपदेन उत्तरत।**

(i) बकः (ii) बकः (iii) विधात्रा

**पूर्णवाक्येन उत्तरत।**

(i) जनाः चित्रवर्णम् अहिभुजं मयूरं "राष्ट्र-पक्षी "इति मन्यन्ते।

(ii) मम नृत्यं तु प्रकृतेः आराधना – इति मयूरः वदति।

(iii) आपत्काले सरांसि त्यक्त्वा राजहंस: दूरं व्रजति l

**भाषिकं कार्यम्।**(i) करोमि (ii) त्यक्त्वा (iii) शीतले

## नाट्यांशः - 04

**एकपदेन उत्तरत ।**

(i) कोकिलः (ii) बकः (iii) जगत्पतेः

**पूर्णवाक्येन उत्तरत ।**

(i) काकपिकयोः भेदः वसन्तसमये भवति ।

(ii) प्रकृतिमाता सस्नेहं वदति - अलम् अलं मिथः कलहेन । अहं प्रकृतिः एव युष्माकं जननी।

(iii)राजहंस: वदति - शान्तं शान्तम् | अहमेव नीरक्षीरविवेकी पक्षिणां राजा!

**भाषिकं कार्यम् ।**

(i) पिकः,परभृत् (ii) काकः (iii) मोदन्ताम्

**षष्ठः पाठः - राष्ट्र संरक्ष्यमेव हि**

## नाट्यांशः -05

**अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**

**1. एकपदेन उत्तरत**

(i) संसारः (ii) विज्ञानस्य (iii) आणविक अस्त्राणां

II. **पूर्णवाक्येन उत्तरत**

(i) आणविक अस्त्राणां निर्माणं विधाय जगतः संहारं कर्तुम् इच्छन्ति।

(ii) विज्ञानस्य सत्प्रयोगः राष्ट्रस्य कल्याणाय, दुरुपयोगश्च विनाशाय भवति।

(iii) मानवेषु आणविक अस्त्राणां प्रयोग: निषिद्ध: आसीत् ।

III. **भाषिकं कार्यम् -**

(i) निषिद्धः (ii) अस्त्रम् (iii) आसन्

## नाट्यांशः -06

I एकपदेन उत्तरत-

i) द्रौणिना ii) भीम: iii) पुत्रा:

II पूर्णवाक्येन उत्तरत-

(i) भीम: संसारे परमपराक्रमी आसीत|

(ii) युधिष्ठिर: भीम: द्रौपदी च रणभूमौ प्रविशन्ति |

(iii) आर्यपुत्र! क्षत्रधर्मम् अनुस्मरन् मां शोकसागरात् रक्ष |

III भाषिक कार्य –

क ) द्रौपद्या: ख) त्वम् ग) संसारे

## नाट्यांशः -07

**अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**

(i) पुत्रम् (अश्वत्थामानम्) (ii) द्रौणिम् (iii) चपला

**आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**

(i) पितुः द्रोणात् प्राप्तं ब्रह्मशिरो नाम अस्त्रं विद्यते तस्य पार्श्वे यदि तत् प्रयुज्येत, तदा सर्वा पृथ्वी दग्धा स्यात्|

(ii) द्रोणेन अर्जुनाय प्रीत्या मनसा ब्रह्मास्त्रशिक्षा प्रदत्ता |

(iii) अश्वत्थामा पितुः द्रोणात् ब्रह्मशिरो नाम अस्त्रं प्राप्तवान्|

**इ. निर्देशानुसारम्उत्तरत। (केवलं प्रश्नद्वयम्)**

(i) अलम् (ii) भवान् (iii) पृथ्वी

## नाट्यांशः -08

**अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**

(i) श्रीकृष्णः (ii) प्रचण्डानलशिखाः (iii) अस्त्रेण

**आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**

(i) सपर्वत-वन-दुमा खलु सकला मही कम्पते

(ii) ब्रह्मास्त्रम् एव मे शरणम् मोचयामि अस्त्रम् इति ध्यायन् अश्वत्थामा ब्रवीति- 'इदम् अपाण्डवाय'। इति

(iii) ब्रह्मास्त्रप्रभावेण नारदः एतान् अनर्थान् पश्यति- समन्तात् वर्धमानाः प्रचण्डानलशिखाः आकाशं लिहन्ति इव| गगनात् सहस्रशः उल्का: भूमौ पतन्ति|

*** इ. निर्देशानुसारमुत्तरत। (केवलं प्रश्नद्वयम्)**

(i) मही (ii) विमुच्यते (iii) मही

## नवमः पाठः- सुस्वागतं भो! अरुणाचलेऽस्मिन्

### नाट्यांश: -09

**1. एकपदेन उत्तरत-**

(i) छात्राणाम् जिज्ञासां (ii) अरुणाचलं (iii) पुष्पाणाम्

**2. पूर्णवाक्येन उत्तरत-**

(i) 'अरुण:' सूर्यस्य पर्याय:। सूर्यस्य प्रकाश: सर्वप्रथमं इमं प्रदेशं स्पृशति। अतः अरुणस्य प्रदेशः अरुणाचलः।

(ii) अरुणाचलप्रदेशे पञ्चाशदधिकाः नद्यः प्रवहन्ति।

(iii) इयम् सूर्योदयभूमिः हिमाद्रितुङ्गशृङ्गैः सुशोभिता।

**3. निर्देशानुसारम् उत्तरत-**

(i) प्रकाश: (ii) प्रकाश: (iii) प्रदेश:

### नाट्यांश: -10

**1. एकपदेन उत्तरत-**

(i) मोपीनः (ii) ओरिया (iii) कृषिपर्व

**2. पूर्णवाक्येन उत्तरत-**

(i) मिथुन: गोमहिषसदृशः एकः विशिष्टः राजपशुः अस्ति।

(ii) 'ओरिया' इति वाङ्चो जनजातीनां प्रमुखं पर्व अस्ति।

(iii) अरूणाचलप्रदेशस्य दर्शनीयस्थलानां दर्शनाय विशेषः प्रबंधः अस्ति।

**3. निर्देशानुसारम् उत्तरत-**

(i) वयम् (ii) पर्व: (iii) विशेषः

### नाट्यांश: -11

1. एकपदेन उत्तरत-

(i) दर्शनीयस्थलानाम् (ii) मिथुन: (iii) सर्वे छात्रा:

2. पूर्णवाक्येन उत्तरत-

(i) भीष्मकनगरदुर्गस्य अवशेषाः तु आर्यकला-संस्कृति-सम्पदः परिचायकाः सन्ति।

(ii) भीष्मकनगरदुर्गम् दिवाङ्ङ्ग- -उपत्यका-मण्डले अस्ति।

(iii) पर्यटनाधिकारी स्थलानां परिचयं प्रक्षेपकयन्त्रेण करिष्यति।

3. निर्देशानुसारम् उत्तरत-

(i) वयम् (ii) प्रबन्धः (iii) प्रदेशस्य

### नाट्यांश: -12

**1. एकपदेन उत्तरत-**

(i) नीलिमया (ii) लोहितजनपदे (iii) तवाङ्ग गोम्पा

**2. पूर्णवाक्येन उत्तरत-**

(i) भीष्मकनगरदुर्गं दिवांग-उपत्यका-मण्डले स्थितम्।

(ii) 'तवाङ्ग गोम्पा' बौद्धानाम् मठः।

(iii) भीष्मकनगरदुर्गस्य अवशेषाः आर्यकला-संस्कृति-सम्पदः परिचायकाः।

**3. निर्देशानुसारम् उत्तरत-** (i) प्रसिद्धः (ii) अस्य (iii) मया

## प्रश्ननिर्माणकार्यम्

**1. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत (केवलं पञ्चप्रश्नाः)** **1×5=5**

(i) शारदा **सर्वदा** सन्निधिं क्रियात्।
(ii) शारदा **वदनाम्बुजे** सन्निधिंक्रियात्।
(iii) **सर्वदा** शारदा मुखकमले निवासं क्रियात्।
(iv) शारदा **अस्माकं** वदनाम्बुजे निवासं कुर्यात।
(v) भारत्याः कोशः **सञ्चयात्** क्षयम् आयाति।
(vi) व्ययतः **वृद्धिं** आयाति।

**2. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत (केवलं पञ्चप्रश्नाः)** **1×5=5**

(i) अयं कोशः **अपूर्वः** विद्यते।
(ii) **भारत्याः** कोशः विचित्रः विद्यते।
(iii) विद्यासमं **चक्षुः** नास्ति।
(iv) **सत्य** समं तपः नास्ति।
(v) **राग** समं दुःखं नास्ति।
(vi) त्यागसमं **सुखं** नास्ति।

**3. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत (केवलं पञ्चप्रश्नाः)** **1×5=5**

(i) **शीतला** छाया अपि पुरुषं न प्रह्लादयति।
(ii) मधुरभाषिणी वाणी एवं **पुरुषं** प्रह्लादयति।
(iii) शीतलं **सलिलं** भवति।
(iv) धियः **अष्ट** गुणाः सन्ति।
(v) धियः अष्टमः गुणः **तत्वज्ञानं** वर्तते।
(vi) एते **धियः** गुणाः सन्ति।

**4. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत (केवलं पञ्चप्रश्नाः)** **1×5=5**

(i) धियः चतुर्थः गुणः **ऊहः** अस्ति।
(ii) धियः **सप्तमः** गुणः अर्थविज्ञानं वर्तते।
(iii) एते **षट्** पाठकगुणाः सन्ति।
(iv) प्रथमः गुणः **माधुर्यम्** अस्ति।
(v) **सुस्वरः** चतुर्थः गुणो वर्तते।
(vi) **लयसमर्थं** पाठकानां गुणो वर्तते।

**5. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत (केवलं पञ्चप्रश्नाः)** **1×5=5**

(i) शिष्यः **आचार्यात्** पादम् गृह्णाति।
(ii) **शिष्यः** स्वमेधया ज्ञानं गृह्णाति।
(iii) **कालेन** तृतीयं पादं गृह्णाति।
(iv) शिष्यः चतुर्थं पादं **स्वमित्रैः** गृह्णाति।
(v) संसारे ज्ञानस्य **चत्वारः** पादाः भवन्ति।
(vi) वाङ्मयं **तपः** उच्यते।

**6. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत (केवलं पञ्चप्रश्नाः)** **1×5=5**

(i) **अनुद्वेगकरं** वाक्यम् एव वदेत्।

(ii) **प्रियहितं** वाक्यम् अपि वाङ्मयं तपः भवति।

(iii) **स्वाध्यायः** अपि तपः भवति।

(iv) यूथपः सर्वान् कपीन् आहूय **रहसि** अवदत्।

(v) कस्मिंश्चित् नगरे **चन्द्रो** नाम भूपतिः प्रतिवसति स्म।

(vi) **एतेषां** कलहः न वानराणां हिताय।

**7. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत (केवलं पञ्चप्रश्नाः)** **1×5=5**

(i) **राजपुत्राः** वानरयूथं नित्यं पुष्टिं नयन्ति स्म।

(ii) तेन **तम्** आशु ताडयन्ति स्म।

(iii) वयं राजभवनं परित्यज्य **वनं** गच्छामः।

(iv) नृणां **यशः** कुकर्मणा नश्यति।

(v) कलहः **हर्म्याणि** अन्तानि करोति।

(vi) ततः **सर्वेषां** नाशः न भवेत्।

**8. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत (केवलं पञ्चप्रश्नाः)** **1×5=5**

(i) **कुवाक्येन** सौहदम् नाशं गच्छति।

(ii) **मदोद्धताः** कपयः प्रहस्य अवदन्।

(iii) **वयं** रुक्षफलानि वने न भक्षयिष्यामः।

(iv) अहं तु **वनं** गच्छामि।

(v) **यूयम्** अस्य सुखस्य कुपरिणामं न जानीथ।

(vi) कपयः तस्य वचनम् **अश्रद्धेयम्** अमन्यन्त।

**9. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत (केवलं पञ्चप्रश्नाः)** **1×5=5**

(i) तृणेषु **वह्निज्वालाः** समुत्थिताः।

(ii) सूपकारेण **मेषः** अर्धज्वलितकाष्ठेन ताडितः।

(iii) मेषः **भूमौ** लुठति।

(iv) सूर्योदये **तमः** नाशम् अभ्येति।

(v) राजा शालिहोत्रज्ञान् **वैद्यान्** आहूय अपृच्छत्।

(vi) **राजादेशं** श्रुत्वा कपयः अचिन्तयन्।

**10. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत (केवलं पञ्चप्रश्नाः)** **1×5=5**

(i) **अस्माभिः** गुरुजनोपदेशाः अवधीरिताः।

(ii) विचक्षणैः ते **मित्ररूपाः** रिपवः सम्भाष्यन्ते।

(iii) ये **हितं वाक्यम्** उत्सृज्य विपरीतं सेवन्ते।

(iv) **'यथोचितं क्रियताम्'** इति राजा अवदत्।

(v) **गुरुवचनम्** उपादेयं भवति।

**(vi)** अकार्य **हेयम्** अस्ति।

**11. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत (केवलं पञ्चप्रश्नाः)** **1×5=5**

(i) **राजा** सरोवरस्य समीपे विहरति स्म।

(ii) शक्रः **नृपस्य** त्यागवृत्तिं प्रशंसन् अवदत्।

(iii) नृपस्य एकं नेत्रं **प्रतिष्ठितम्** अभवत्।

(iv) अहं देवेन्द्रः **शक्रः** अस्मि।

(v) भूयः प्रीतः शक्रः **<u>वरम्</u>** अददात्।

(vi) शक्रः **<u>तत्रैव</u>** अन्तर्हितः अभवत्।

**12. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत (केवलं पञ्चप्रश्नाः) 1×5=5**

(i) **<u>दीयमानं</u>** धनं निधनतां याति।

(ii) **<u>आत्मनः</u>** सत्यपुण्यबलेन नृपस्य एकं नेत्रं प्रतिष्ठितम् अभवत्।

(iii) धनं **<u>निःसारं</u>** लघुं च भवति।

(iv) पुरुषः **<u>पापं</u>** चरति।

(v) **<u>अनिच्छन्नपि</u>** पुरुषः पापं करोति

(vi) पुरुषः एव बलादिव **<u>नियुक्तः</u>** भवति।

**13. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत (केवलं पञ्चप्रश्नाः) 1×5=5**

(i) **<u>श्रीकृष्णः</u>** अर्जुनम् उवाच।

(ii) कामः क्रोधः च **<u>रजोगुणात्</u>** प्रभवतः।

(iii) **<u>कामः</u>** महापाप्मा भवति।

(iv) कामः क्रोधः च **<u>जनानां</u>** वैरिणौ भवतः।

(v) **<u>कामेन</u>** जनानां नाशो भवति।

(vi) **<u>युक्तः</u>** नरः सुखी भवति।

**14. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत (केवलं पञ्चप्रश्नाः) 1×5=5**

(i) यः **<u>शरीरस्य</u>** विमोक्षणात् पूर्वं कामं क्रोधं च सहते।

(ii) सः नरः **<u>युक्तः</u>** भवति।

(iii) **<u>अस्मिन् संसारे</u>** एव नरः कामं क्रोधं च सहते।

(iv) **<u>जनः</u>** विषयान् ध्यायति।

(v) तदा तेषु तस्य **<u>संगतिः</u>** उपजायते।

(vi) **<u>संगात्</u>** कामः संजायते

**15. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत (केवलं पञ्चप्रश्नाः) 1×5=5**

(i) कामात् **<u>क्रोधस्य</u>** जन्म भवति।

(ii) **<u>क्रोधात्</u>** संमोहः भवति।

(iii) **<u>स्मृति-विभ्रमः</u>** सम्मोहात् जायते।

(iv) स्मृति भ्रंशात् **<u>बुद्धेः</u>** नाशः भवति।

(v) बुद्धिनाशात् **<u>जनानाम्</u>** विनाशः भवति।

(vi) इदम् उपदेशं श्रीकृष्णः **<u>अर्जुनाय</u>** यच्छति।

**16. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत (केवलं पञ्चप्रश्नाः) 1×5=5**

(i) कामः **<u>ज्ञानविज्ञाननाशकः</u>** भवति।

(ii) इन्द्रियाणि **<u>आदौ</u>** एव वशीकरणीयानि।

(iii) **<u>पाप्मानं</u>** कामं त्यक्त्वा एव ज्ञानं जायते।

(iv) **<u>अर्जुनः</u>** श्रीकृष्णं सम्बोधयति।

(v) मनः **<u>प्रमाथि</u>** वर्तते।

(vi) **<u>मनसः</u>** निग्रहम् अतीव कठिनम् अस्ति।

17. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत (केवलं पञ्चप्रश्नाः) 1×5=5

(i) **मनः** अतीव चञ्चलं वर्तते।
(ii) मनः असंशयं **तीव्रगामी** वर्तते।
(iii) **एतत्** कठिनतया वशीक्रियते।
(iv) मनसः **अभ्यासेन वैराग्येण च** वशीकरणं भवति।
(v) विषयान् प्रति **आसक्तिं** न करणमेव वैराग्यं वर्तते।
(vi) घटः क्रमशः **जलबिन्दूनां** निपातेन पूर्यते।

18. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत (केवलं पञ्चप्रश्नाः) 1×5=5

(i) सर्वाः विद्याः अपि **परिश्रमेण** क्रमशः एव आगच्छन्ति।
(ii) उपदेशं श्रुत्वा सः **शान्तचित्तः** अभवत्।
(iii) सः **श्रमेण** प्रभूतं धनम् अर्जितवान्।
(iv) **प्रच्छन्नभाग्यः** कृषकस्य क्षेत्रे कार्यम् अकरोत्।
(v) **विचित्रा** खलु दैवगतिः।
(vi) **विषधरः** दुष्टबुद्धिमेव दष्टवान्।

19. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत (केवलं पञ्चप्रश्नाः) 1×5=5

(i) कलशपातशब्देन **तौ दम्पती** अतिष्ठताम्।
(ii) **पापिनाम्** सदा दुःखमेव प्राप्नोति।
(iii) **काकस्य** गात्रं काञ्चनस्य भवेत्।
(iv) **नीरक्षीरविवेके** हंसो हंसः भवति।
(v) जनैः सर्वदा **तव** विषये गीयते।
(vi) हंसः **श्वेतः** भवति।

20. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत (केवलं पञ्चप्रश्नाः) 1×5=5

(i) **मम** केकारवं श्रुत्वा कोकिलः अपि लज्जते।
(ii) मम नृत्यं तु **प्रकृतेः** आराधना।
(iii) **काकः पिकः च** कृष्णौ भवतः।
(iv) **कोकिलः** एव पञ्चमस्वरेण गायति।
(v) अहम् **करुणापरः** काकः अस्मि।
(vi) अहमेव **सर्वशिरोमणिः।**

21. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत (केवलं पञ्चप्रश्नाः) 1×5=5

(i) अहं तव **सन्ततिं** पालयामि।
**(ii)** धिक् **युष्मान्** ।
(iii) पिता **पुत्राय** महत् विद्याधनं यच्छति।
(iv) एतदर्थं **पिता** महत् तपः तपति।
(v) इति उक्तिः एव **कृतज्ञता** भवति।
(vi) विद्या **महत्** धनं वर्तते।

22. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत (केवलं पञ्चप्रश्नाः) 1×5=5

(i) **अवक्रता** चित्ते भवेत्।
(ii) चित्ते वाचि अवक्रता **समत्त्वं** भवति।

(iii) **महात्मानः** तदेव समत्त्वं कथयन्ति।
(iv) अवक्रता **वाचि** अपि भवेत्।
(v) **विमूढधीः** अपक्वं फलं भुङ्क्ते।
(vi) मूर्खबुद्धिः **धर्मप्रदाम्** वाचं त्यजति।

**23. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत (केवलं पञ्चप्रश्नाः)** **1×5=5**

(i) मूर्खः परुषां **वाचं** वदति।
(ii) मूढः **पक्वं** फलं परित्यजति।
(iii) **विद्या** एव नेत्रम् वर्तते।
(iv) **विद्वांसः** एव चक्षुष्मन्तः प्रकीर्तिताः।
(v) अन्येषां वदने नाममात्रमेव **नेत्रे** स्तः।
(vi) **विद्याहीनाः** नेत्रहीनाः इव भवन्ति।

**24. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत (केवलं पञ्चप्रश्नाः)** **1×5=5**

(i) **विवेकेन** यथार्थनिर्णयः भवति।
(ii) **जनानां** कथनस्य निर्णयः विवेकः करोति।
(iii) विवेकः एव **तत्त्वार्थनिर्णयं** करोति।
(iv) मन्त्री **वाक्पटुः** भवेत्।
(v) मन्त्री **सभायाम्** अकातरः अपि भवेत्।
(vi) वाक्पटुः **मन्त्री** कदापि न परिभूयते।

**25. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत (केवलं पञ्चप्रश्नाः)** **1×5=5**

(i) **धैर्यवान्** मन्त्री केनापि प्रकारेण परिभूयते।
**(ii)** मनुष्यः आत्मनः **श्रेयः** इच्छति।
(iii) जनः **अहितं** कर्म न कुर्यात्।
(iv) सः **परेभ्यः** अहितं कर्म न कुर्यात्।
(v) जनः **प्रभूतानि** सुखानि इच्छति।
(vi) **आचारः** प्रथमः धर्मः अस्ति।

**26. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत (केवलं पञ्चप्रश्नाः)** **1×5=5**

(i) इदं **विद्वांसः** कथयन्ति।
**(ii)** सदाचारः अवश्यमेव **जनैः** पालनीयः वर्तते।
(iii) सः **प्राणेभ्यः** अपि विशेषो भवति।
(iv) **आचार्येण** प्रियशिष्याय अर्जुनाय ब्रह्मास्त्रं शिक्षितम्।
(v) सः **अश्वत्थामाम्** अपि वञ्चितं न कृतवान्।
(vi) **आचार्यः** पुत्रं सावधानम् अकरोत्।

**27. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत (केवलं पञ्चप्रश्नाः)** **1×5=5**

(i) इदम् अस्त्रं **मानुषेषु** न प्रयोक्तव्यम्।
(ii) सः तु **चक्रम्** एव अयाचत।
(iii) **सः** सव्येन पाणिनां चक्रं गृहीतवान्।
(iv) स **ब्रह्मास्त्र-प्रयोगं** न करिष्यति।
(v) नाहं **त्वत्तः** ब्रह्मास्त्रम् वाञ्छामि।
(vi) भवतः **दिव्यां** शक्तिं जानीमः।

**28. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत (केवलं पञ्चप्रश्ना:)** **1×5=5**

(i) **अहं** खिन्नं द्रौणिं पृष्टवान्।
(ii) तस्मिन् **क्रूरे** द्रोणपुत्रे न विश्वसितव्यम्।
(iii) एतत् ते **सत्यं** ब्रवीमि।
(iv) **मया** त्वमद्य वध्योऽसि।
(v) अर्जुन ! त्वमपि **ब्रह्मास्त्रं** मुञ्च।
(vi) एतत् **द्रोणपुत्रेण** ब्रह्मास्त्रं विमुच्यते।

**29. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत (केवलं पञ्चप्रश्ना:)** **1×5=5**

(i) श्रीकृष्णेन सह **युधिष्ठिरार्जुनौ** रथारोहणं कुरुतः।
(ii) उत्सृज्यते **मया** ब्रह्मास्त्रम्।
(iii) सकला **मही** कम्पते।
(iv) एताभ्यां वीराभ्याम् **अनर्थः** क्रियते।
(v) **नानाशास्त्रविदः** महारथाः अपि मनुष्येषु इदमस्त्रं न प्रयुक्तवन्तः।
(vi) अद्य विद्यालये **उत्सवस्य** वातावरणं वर्तते।

**30. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत (केवलं पञ्चप्रश्ना:)** **1×5=5**

(i) तत्र **छात्राणाम्** एकः दलः प्रविशति।
(ii) अरुणाचलस्य **प्रधाना** पुरी 'ईटा' अस्ति।
(iii) सभागारे राज्यस्य पर्यटनाधिकारी **छात्रान्** प्रतीक्षते।
(iv) अरुणाचलः **सप्तराज्येषु** विभासमानः अस्ति।
(v) मञ्चे **विद्यालयस्य** प्रधानाचार्यः उपविशति।
(vi) **अरुणः** तु सूर्यस्य: पर्यायः।

**31. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत (केवलं पञ्चप्रश्ना:)** **1×5=5**

(i) विपुला च अत्र **वन सम्पदा।**
(ii) **अस्मिन् प्रदेशे** भवताम् अभिनन्दनम्।
(iii) मिथुनः एकः **विशिष्टः** राजपशुः अस्ति।
(iv) अधुना **इदं चित्रं** पश्यत।
(v) वयम् **ऐतिहासिक स्थलानां** विषये ज्ञातुम इच्छामः।
(vi) अहम् **इदं स्थानं** जानामि।

**32. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत (केवलं पञ्चप्रश्ना:)** **1×5=5**

(i) **अयं** बौद्धमठः तवाङ्ग इति स्थले राजते।
(ii) **पूर्वम्** इदं ब्रह्मकुण्डम् आसीत्।
(iii) एतत् कुण्डम् तु **लोहितनद्याः** किञ्चिद्दूरे अस्ति।
(iv) अहं खलु **कालः**।
(v) अहमेव **जगतः** उत्पत्तेः, विकासस्य, प्रणयस्य च साक्षी अस्मि।
(vi) तर्हि शृणुत **ध्यानेन**।

**33. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत - (केवलं पञ्चप्रश्ना:)** **1×5=5**

(i) मम पिच्छानाम् **अपूर्वं** सौन्दर्यम्।
(ii) अयं पुरुषः **पापं** चरति।

(iii) राजा **शक्राय** चक्षुः समर्पितवान्।
(iv) एतद् **मनुष्येषु** न प्रयोक्तव्यम्।
(v) मधुरभाषिणी **वाणी** पुरुषे प्रह्लादयति।
(vi) वयं **स्थलानि** द्रष्टुम् उत्सुकाः स्मः।

**34. अधोलिखित-कथनेषु स्थूलपदानि आधृत्य उदाहरणानुसारं प्रश्ननिर्माणं क्रियताम्-(केवलं पञ्चप्रश्नाः)**
(i)राजा **नगरस्य** समन्ततः दानशालाः अकारयत्।
(ii) अभीष्टवस्तूनि प्राप्य **याचकाः** सन्तुष्टाः आसन्।
(iii) **दानशालासु** विचरन् राजा अचिन्तयत्।
(iv)राजा पुत्रवत् **प्रजाः** पालयति स्म।
(v)स राजा **तान्** अकथयत्।
(vi)राजा **याचकेभ्यः** दानं ददाति स्म।

**35. अधोलिखित-कथनेषु स्थूलपदानि आधृत्य उदाहरणानुसारं प्रश्ननिर्माणं क्रियताम्-(केवलं पञ्चप्रश्नाः)**
(i)अश्वाः **प्राणत्राणाय** इतस्ततः अधावन्।
(ii) राजा **वैद्यान्** आहूय अश्वरक्षार्थम् अपृच्छत्।
(iii)सूपकारेण मेषः **अर्धज्वलितकाष्ठेन** ताडितः।
(iv)**प्राज्ञः** कलहयुक्तं गृहं दूरतः परिवर्जयेत्।
(v)सूर्योदये **तमः** नश्यति।
(vi)ज्वलन् मेषः **अश्वशालां** प्रविशति।

**36. अधोलिखित-कथनेषु स्थूलपदानि आधृत्य उदाहरणानुसारं प्रश्ननिर्माणं क्रियताम्-(केवलं पञ्चप्रश्नाः)**
(i) **विषादं** त्यक्त्वा उद्यमः क्रियताम्।
(ii) **जलबिन्दुनिपातेन** क्रमशः घटः पूर्यते।
(iii)कृषकस्य क्षेत्रे **श्रमं** कृत्वा स धनम् अर्जितवान्।
(iv) धैर्यम् **आपदां** तरणिः।
(v)नरः **साधुवृत्तिं** समाचरेत्।
(vi)प्रच्छन्नभाग्यस्य गृहम् **मणीनाम्** आभया भासमानम् अभवत्।

**37.अधोलिखित-कथनेषु स्थूलपदानि आधृत्य उदाहरणानुसारं प्रश्ननिर्माणं क्रियताम्-(केवलं पञ्चप्रश्नाः)**
(i) भूतं वर्तमानं भविष्यद् इति **त्रयः** कालभेदाः।
(ii)चतुर्णां **युगानां** समूह एव महायुगम्।
(iii)संवत्सरे षड् **ऋतवः** भवन्ति।
(iv) **संवत्सरे** द्वादश मासाः भवन्ति।
(v)चतुर्दश मन्वन्तराणां **समूहः** कल्पः।
(vi) **ब्रह्मणः** आयुः शतं वर्षाणि।

## उत्तरसंकेतः
## प्रश्ननिर्माणकार्यम्

रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत (केवलं पञ्चप्रश्नाः) **1×5=5**

1. उत्तराणि -

**(i) कदा (ii) कुत्र (iii) कीदृशी (iv) केषाम् (v) कस्मात् (vi) किम्**

2. उत्तराणि –

**(i) कीदृशः (ii) कस्याः (iii) कः (iv) केन (v) केन (vi) किम्**

3. उत्तराणि –

**(i) कीदृशी (ii) कम् (iii) किम् (iv) कति (v) किम् (vi) कस्याः**

4. उत्तराणि –

(i) कः (ii) कतमः (iii) कति (iv) किम् (v) कः (vi) किम्

5. उत्तराणि –

(i) कस्मात् (ii) कः (iii) केन (iv) कैः (v) कति (vi) किम्

6. उत्तराणि –

(i) कीदृशम् (ii) कीदृशम् (iii) कः (iv) कुत्र (v) किम् (vi) केषाम्

7. उत्तराणि –

(i) के (ii) कम् (iii) कुत्र (iv) किम् (v) कानि (vi) केषाम्

8. उत्तराणि –

(i)केन (ii) कीदृशाः (iii) के (iv) कुत्र (v) के (vi)कीदृशम्

9. उत्तराणि –

(i) काः (ii) कः (iii) कुत्र (iv) किम् (v) कान् (vi) कम्

10. उत्तराणि –

(i) कैः (ii) कीदृशाः (iii)किम् (iv) किम् (v) किम् (vi)कीदृशम्

11. उत्तराणि –

(i) कः (ii) कस्य (iii) किम् (iv) कः (v) किम् (vi) कुत्र

12. उत्तराणि –

(i) कीदृशम् (ii) कस्य (iii) कीदृशम् (iv) किम् (v) कथम् (vi) कीदृशः

13. उत्तराणि –

(i) कः (ii) कस्मात् (iii) कः (iv) केषाम् (v) केन (vi) कीदृशः

14. उत्तराणि –

(i) कस्य (ii) कीदृशः (iii) कुत्र (iv) कः (v) का (vi) कस्मात्

15. उत्तराणि –

(i) कस्य (ii) कस्मात् (iii) कः (iv) कस्याः (v) केषाम् (vi) कस्मै

16. उत्तराणि –

(i) कीदृशः (ii) कदा (iii) कीदृशम् (iv) कः (v) कीदृशम् (vi) कस्य

17. उत्तराणि –

(i) किम् (ii) कीदृशम् (iii) किम् (iv) काभ्याम् (v) काम् (vi) केषाम्

18. उत्तराणि –

(i) केन (ii) कीदृशः (iii) केन / कथं (iv) कः (v) कीदृशी (vi) कः

19. उत्तराणि –

(i) कौ (ii) केषाम् (iii) कस्य (iv) कदा (v) कस्य (vi) कीदृशः

20. उत्तराणि –

(i) कस्य (ii) कस्याः (iii) कौ (iv) कः (v) कीदृशः (vi) कीदृशः

21. उत्तराणि –

(i) काम् (ii) कान् (iii) कस्मै (iv) कः (v) का (vi)कीदृशम्

22. उत्तराणि –

(i) का (ii) किम् (iii) के (iv) कस्याम् (v)कः (vi)कीदृशीं

23. उत्तराणि –

(i) काम् (ii) किम् (iii) का (iv) के (v) के (vi) के

**24. उत्तराणि –**

(i) केन (ii) केषाम् (iii) किम् (iv) कीदृशः (v) कुत्र (vi) कम्

**25. उत्तराणि –**

(i) कीदृशः (ii) किम् (iii) कीदृशम् (iv) केभ्यः (v) कति (vi) कः

**26. उत्तराणि –**

(i) के (ii) कैः (iii) केभ्यः (iv) केन (v) कम् (vi) कः

**27. उत्तराणि –**

(i) केषु (ii) किम् (iii) कः (iv) किम् (v) कस्मात् (vi)कीदृशीम्

**28. उत्तराणि –**

(i) कः (ii) कीदृशे (iii) किम् (iv) केन (v) किम् (vi) केन

**29. उत्तराणि –**

(i) कौ (ii) केन (iii) का (iv) कः (v) कीदृशाः (vi) कस्य

**30. उत्तराणि –**

(i) केषाम् (ii) कीदृशी (iii) कान् (iv) केषु (v) कस्य (vi) कः

**31. उत्तराणि –**

(i) का (ii) कुत्र (iii) कीदृशः (iv) किम् (v) केषाम् (vi) किम्

**32. उत्तराणि –**

(i) कः (ii) कदा (iii) कस्याः (iv) कः (v) कस्य (vi) कथम्

**33. उत्तराणि –**

(i) कीदृशं (ii) किं (iii) कस्मै (iv) केषु/कुत्र (v) का (vi) कानि

**34. उत्तराणि**

(i) कस्य (ii) के (iii) कुत्र (iv) काः (v) कान् (vi) केभ्यः

**35.उत्तराणि**

(i)किमर्थम् / कस्मै (ii) कान् (iii) केन
(iv) कः (v) किम् (vi) कुत्र

**36.उत्तराणि**

(i) किम्/कम् (ii) केन (iii) किम्
(iv) कासाम् (v) काम्/किम् (vi) कासाम्।

**37.उत्तराणि**

(i) कति (ii) केषाम् (iii) काः (iv) कस्मिन् (v) कः (vi) कस्य

**अन्वयः**

**मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयित्वा पुनः लिखत –**

**1**

**शारदा शारदाम्भोजवदना वदनाम्बुजे ।**
**सर्वदा सर्वदाऽस्माकं सन्निधिं सन्निधिं क्रियात् ।।**

**अन्वयः –**

शारद-अम्भोज-वदना (i) ------------ शारदा (ii) ------------ वदन-अम्बुजे (iii) -----------
सत् निधिम् (iv) ------------ क्रियात् ।

**मञ्जूषा**

| अस्माकम्, सन्निधिम्, सर्वदा, सर्वदा |
|---|

**2**

**अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति!**
**व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात् ।।**

**अन्वयः –**

भारति! (i) ------------ अयम् कोशः कः (ii) ------------ अपूर्वः विद्यते । व्ययतः (iii) -----------
आयाति (iv) ------------ च क्षयम् आयाति।

**मञ्जूषा**

| वृद्धिम्, अपि, सञ्चयात्, तव |
|---|

**3**

**न तथा शीतलसलिलं न चन्दनरसो न शीतला छाया ।**
**प्रह्लादयति च पुरुषं यथा मधुरभाषिणी वाणी ।।**

**अन्वयः –**

यथा (i) ------------ वाणी पुरुषम् (ii) ------------ तथा शीतल-सलिलम् न, (iii) -----------
न, शीतला (iv) ------------ च न (प्रह्लादयति)।

**मञ्जूषा**

| छाया, प्रह्लादयति, चन्दनरसः, मधुरभाषिणी, |
|---|

**4.**

**अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् ।**
**स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ।।**

**अन्वयः –**

यत् (i) ------------ अनुद्वेगकरम् सत्यम् (ii) ------------ च (तथा) स्वाध्याय- अभ्यसनम् च (iii) ---- वाङ्मयम् (iv) - ----------- उच्यते

**मञ्जूषा**

| तपः, वाक्यम्, एव, प्रियहितम् |
|---|

**5.**

**दास्यामीति प्रतिज्ञाय योऽन्यथा कुरुते मनः।**
**कार्पण्यानिश्चितमतेः कः स्यात् पापतरस्ततः॥**

**अन्वयः –**

दास्यामि इति (i) ------------ यः (ii) ------------ अन्यथा (iii) ----------- कार्पण्य-अनिश्चितमतेः ततः (iv) ------------ कः स्यात् ?

**मञ्जूषा**

| मनः, कुरुते, प्रतिज्ञाय, पापतरः |
|---|

**6.**

**धनस्य निःसारलघोः स सारो यद् दीयने लोकहितोन्मुखेन।**
**निधानतां याति हि दीयमानम् अदीयमानं निधनैकनिष्ठम्॥**

**अन्वयः –**

(i) ------------ धनस्य सः (ii) ------------ यत् लोकहित-उन्मुखेन दीयते। (iii) ----------- (धनम्) निधानताम् हि याति। (iv) ------------ (धनम्) निधन-एकनिष्ठम् (भवति)।

**मञ्जूषा**

| दीयमानम्, अदीयमानम्, सारः, निःसारलघोः, |
|---|

**7**

**काकस्य गात्रं यदि काञ्चनस्य माणिक्यरत्नं यदि चञ्चुदेशे।**
**एकैकपक्षे ग्रथितं मणीनां तथापि काको न तु राजहंसः॥**

**अन्वयः –**

यदि काकस्य (i) ------------ काञ्चनस्य, यदि (ii) ------------ माणिक्यरत्नम् एकैकपक्षे (iii) ------- ग्रथितम् तथापि (स) काकः (एव) न तु (iv) ------------ |

**मञ्जूषा**

| मणीनाम्, गात्रम्, राजहंसः चञ्चुदेशे, |
|---|

**8**

**आयुषः क्षण एकोऽपि न लभ्यः स्वर्णकोटिकैः ।**
**स चेन्निरर्थकं नीतः का नु हानिस्ततोऽधिका ॥**

**अन्वयः –**

(i) ------------ एकः (ii) ------------ अपि स्वर्णकोटिकैः न लभ्यः। स चेत् (iii) ----------- नीतः ततः अधिका नु (iv) ------------ का?

**मञ्जूषा**

| निरर्थकम्, आयुषः, हानिः, क्षणः, |
|---|

**9**

**काम एषः क्रोध एष रजोगुणसमुद्भवः ।**
**महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥**

**अन्वयः –**

(i) ------------ एषः कामः एषः (ii) ------------ महाशनः (iii) ----------- । एनम् इह (iv) --------- विद्धि।

**मञ्जूषा**

| क्रोधः, वैरिणम्, महापाप्मा, रजोगुणसमुद्भवः |
|---|

**10**

**शक्नोतीहैव यः सोढुं प्राक् शरीरविमोक्षणात् ।**
**कामक्रोधोद्भवं वेगं सः युक्तः स सुखी नरः ॥**

**अन्वयः –**

यः (i) ------------ प्राक् कामक्रोधोद्भवम् (ii) ------------ इह एव (iii) ----------- शक्नोति सः नरः (iv) ------------ सः सुखी (भवति)।

**मञ्जूषा**

| सोढुम्, युक्तः, वेगम्, शरीरविमोक्षणात्, |
|---|

**11**

**तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ।**
**पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम् ॥**

**अन्वयः –**

(i) ------------ तस्मात् त्वम् (ii) ------------ इन्द्रियाणि नियम्य (iii) ----------- एनम् (iv) --------- हि प्रजहि।

**मञ्जूषा**

| |
|---|
| ज्ञानविज्ञाननाशनम्, भरतर्षभ !, पाप्मानम्, आदौ |

**12**

**असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।**
**अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥**

**अन्वयः –**

महाबाहो ! (i) ------------ मनः दुर्निग्रहम् (ii) ------------ कौन्तेय! (एतत्) तु (iii) --------- वैराग्येण च (iv) ------------ ।

**मञ्जूषा**

| |
|---|
| चलम्, अभ्यासेन, गृह्यते, असंशयम्, |

**13**

**जलबिन्दुनिपातेन क्रमशः पूर्यते घटः ।**
**स हेतुः सर्वविद्यानां धर्मस्य च धनस्य च ॥**

**अन्वयः –**

(यथा) (i) --------------- क्रमशः (ii) --------------- पूर्यते (तथैव) (iii) ----------- धर्मस्य च (iv) ------------ च सः (एव) हेतुः ।

**मञ्जूषा**

| |
|---|
| घटः, जलबिन्दुनिपातेन, धनस्य, सर्वविद्यानाम् |

**14**

**पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्।**
**पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता॥**

**अन्वयः –**

पिता पुत्राय (i) ------------ महत् (ii) ------------ यच्छति। अस्य पिता किं तपः (iii) ---------- इति (iv) ----------- तत्कृतज्ञता (मन्यते)।

**मञ्जूषा**

| |
|---|
| उक्तिः, विद्याधनम्, तेपे, बाल्ये |

**15**

**अवक्रता यथा चित्ते तथा वाचि भवेद् यदि।**
**तदेवाहुः महात्मानः समत्वमिति तथ्यतः ॥**

**अन्वयः –**

यथा (i) ---------------- चित्ते तथा (ii) ---------------- वाचि भवेत्, (iii) --------------- तथ्यतः तदेव (iv) ------------ इति आहुः ।

**मञ्जूषा**

| |
|---|
| महात्मानः, समत्वम्, अवक्रता, यदि |

**16**

**त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्।**
**परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः ॥**

**अन्वयः –**

यः (i) ------------ वाचम् त्यक्त्वा (ii) ------------ (वाचम्) अभ्युदीरयेत्। (सः) (iii)------- पक्वम् फलम् परित्यज्य (iv) ----------- (फलम्) भुङ्क्ते।

**मञ्जूषा**

| |
|---|
| धर्मप्रदाम्, विमूढधीः, अपक्वम्, परुषाम् |

**17**

**यत् प्रोक्तं येन केनापि तस्य तत्त्वार्थनिर्णयः ।**
**कर्तुं शक्यो भवेद्येन स विवेक इतीरितः ॥**

**अन्वयः –**

येन (i) ------------ अपि यत् (ii) ------------ तस्य (iii) ---------- येन कर्तुम् शक्यः भवेत्, सः (iv) ----- ------ इति ईरितः ।

**मञ्जूषा**

| |
|---|
| केन, विवेकः, तत्त्वार्थनिर्णयः, प्रोक्तम् |

**18**

**य इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च।**
**न कुर्यादहितं कर्म स परेभ्यः कदापि च ॥**

**अन्वयः –**

यः (i) ---------- श्रेयः प्रभूतानि (ii) ---------- च इच्छति, सः (iii) -------- अहितम् (iv) ---------- कदापि न कुर्यात् ।।

**मञ्जूषा**

| परेभ्यः, कर्म, सुखानि, आत्मनः, |
|---|

**19**

**भगवन्किमुपादेयम् ? गुरुवचनम्, हेयमपि च किम् ? अकार्यम् ।**
**को गुरुः ? अधिगततत्त्वः शिष्यहितायोद्यतः सततम् ॥**

**अन्वयः –**

भगवन्! (i) ------------ किम् ? गुरुवचनम् । (ii) ------------ च हेयम् किम् ? अकार्यम् । गुरुः कः ? (iii) ---------- शिष्यहिताय उद्यतः (iv) ----------- ।

**मञ्जूषा**

| अपि, अधिगततत्त्वः, सततम्, उपादयेम्, |
|---|

**20**

**कोऽन्धः ? योऽकार्यरतः, को बधिरः ? यो हितानि न शृणोति।**
**को मूकः ? यः काले प्रियाणि वक्तुं न जानाति ॥**

**अन्वयः –**

अन्धः कः ? यः (i) ------------ । बधिरः कः ? यः (ii) ------------ न शृणोति । (iii) ---------- कः? यः काले (iv) ----------- वक्तुम् न जानाति। ।

**मञ्जूषा**

| प्रियाणि, हितानि, मूकः, अकार्यरतः |
|---|

**अन्वयः**

**उत्तरसंकेतः**

**1**

(i) सर्वदा (ii) अस्माकम् (iii) सर्वदा (iv) सन्निधिम्

**2**

(i) तव (ii) अपि (iii) वृद्धिम् (iv) सञ्चयात्

**3**

(i) मधुरभाषिणी (ii) प्रह्लादयति (iii) चन्दनरसः (iv) छाया

**4**

(i) वाक्यम् (ii) प्रियहितम् (iii) एव (iv) तपः

**5**

(i) प्रतिज्ञाय (ii) मनः (iii) कुरुते (iv) पापतरः

**6**

(i) निःसारलघोः (ii) सारः (iii) दीयमानम् (iv) अदीयमानम्

**7**

(i) गात्रम् (ii) चञ्चुदेशे (iii) मणीनाम् (iv) राजहंसः

**8**

(i) आयुषः (ii) क्षणः (iii) निरर्थकम् (iv) हानिः

**9**

(i) रजोगुणसमुद्भवः (ii) क्रोधः (iii) महापाप्मा (iv) वैरिणम्

**10**

(i) शरीरविमोक्षणात् (ii) वेगम् (iii) सोढुम् (iv) युक्तः

**11**

(i) भरतर्षभ ! (ii) आदौ (iii) ज्ञानविज्ञाननाशनम् (iv) पाप्मानम्

**12**

(i) असंशयम् (ii) चलम्, (iii) अभ्यासेन (iv) गृह्यते

**13**

(i) जलबिन्दुनिपातेन (ii) घटः (iii) सर्वविद्यानाम् (iv) धनस्य

**14**

(i) बाल्ये (ii) विद्याधनं (iii) तेपे (iv) उक्तिः

**15**

(i) अवक्रता (ii) यदि (iii) महात्मानः (iv) समत्वम्

**16**

(i) धर्मप्रदाम्, (ii) परुषाम् (iii) विमूढधीः (iv) अपक्वम्

**17**

(i) केन (ii) प्रोक्तम् (iii) तत्त्वार्थनिर्णयः (iv) विवेकः

**18**

(i) आत्मनः (ii) सुखानि (iii) परेभ्यः (iv) कर्म

**19**

(i) उपादयेम् (ii) अपि (iii) सततम् (iv) अधिगततत्त्वः

**20**

(i) अकार्यरतः (ii) हितानि (iii) मूकः (iv) प्रियाणि

**भावार्थः**

**1.मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

**शारदा शारदाम्भोजवदना वदनाम्बुजे।**
**सर्वदा सर्वदाऽस्माकं सन्निधिं सन्निधिं क्रियात्॥**

**भावार्थः-**

शरद-ऋतौ विकसितं (i)________इव मुखवती सर्वदात्री (ii)_______अस्माकं (iii)_________समीपम् सदैव सत् निधिरूपे (iv)__________कुर्यात्।

**मञ्जूषा**

[ **निवासं , सरस्वती , कमलम् , मुखकमलस्य** ]

**2.मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

**अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति!**
**व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात्॥**

**भावार्थः-**

हे (i)_______। भवत्याः अयं ज्ञानकोषः कोऽपि (ii)________कोषः अस्ति। यः व्ययकरणाम् निरन्तरं वर्धते संग्रहकरणात् च (iii)__________आप्नोति। एतदेव अस्याः (iv)________विचित्रता वर्तते।

**मञ्जूषा**

[ **अपूर्वः सरस्वति क्षीणताम् . कोषस्य** ]

**3.मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

**नास्ति विद्यासमं चक्षुः नास्ति सत्यसमं तपः।**
**नास्ति रागसमं दुःखं नास्ति त्यागसमं सुखम्॥**

**भावार्थः-**

अस्मिन् संसारे (i)_________समम् किमपि नेत्रम् न वर्तते। (ii)________समं किमपि (iii)______न अस्ति। रागेण समम् किमपि दुःखं न (iv)_________। एवमेव त्यागेन समम् किमपि सुखम् न अस्ति। अतः अस्माभिः सदैव विद्याप्राप्त्यर्थं सत्यसंपादनार्थं च प्रयत्नः करणीयः। एवमेव रागविमुक्तये त्यागार्थं च सचेष्टः भवेत्।

**मञ्जूषा**

[ **विद्यया तपः सत्येन . भवति** ]

**4. मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

**न तथा शीतलसलिलं न चन्दनरसो न शीतला छाया।**
**प्रह्लादयति च पुरुषं यथा मधुरभाषिणी वाणी॥**

**भावार्थः-**

न तु शीतलं जलमेव न चन्दनस्य रसः न (i)_________छाया च मनुष्यं तथा (ii)______यथा मृदुभाषिणी (iii)_________पुरुषं प्रसन्नं करोति। अर्थात् (iv)___________वाणीं श्रुत्वा मनुष्यस्य मनः अपूर्वां शीतलताम् शान्तिम् च अधिगच्छति। अतः सदैव मधुरां वाणीम् एव वदेत्।

**मञ्जूषा**

**[ आनन्दयति वाणी शीतला . मधुरभाषिणीं ]**

**5. मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

**शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा।**
**ऊहापोहार्थविज्ञानं तत्त्वज्ञानं च धीगुणाः ॥**

**भावार्थः-**

अस्मिन् श्लोके उत्तमबुद्धेः (i)_______वर्णिताः सन्ति। यथा (ii)________(शुश्रूषा) श्रवणम् ग्रहणम् धारणम् पक्षे तर्कः (ऊहः) विपक्षे तर्कः (अपोहः) (iii)________(अर्थविज्ञानम्) यथार्थज्ञानम् (तत्त्वज्ञानम्) च। सा बुद्धिः एव (iv)_______भवति यस्माम् उपरिलिखिताः गुणाः भवन्ति।

**मञ्जूषा**

**[ अष्टगुणाः उत्कृष्टा श्रोतुम् इच्छा अर्थस्य विशुद्धं ज्ञानम् ]**

**6.मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

**माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः।**
**धैर्यं लयसमर्थं च षडेते पाठका गुणाः ॥**

**भावार्थः-**

अस्मिन् श्लोके (i)_____षड्गुणाः कथिताः सन्ति। सः एव उत्तमः पाठकः मन्यते यस्मिन् एते गुणाः पठनसमये (ii)______सन्ति-माधुर्यम् अर्थात् मधुरता अक्षरव्यक्तिः अर्थात् वर्णानाम् (iii)_______ उच्चारणम् पदच्छेदः सुष्ठु स्वरः धैर्यम् लयसमर्थं च। अर्थात् पाठकाः भाषां (iv)______पठेयुः वर्णानाम् स्पष्टतया उच्चारणं कुर्युः पदानाम् विच्छेदं कृत्वा पठेयुः पठने सुष्ठु स्वरः स्यात् धैर्यं कदापि न त्यजेयुः आरोहावरोहक्रमानुसारं च पठेयुः। तदैव भाषायाः शोभा भवति।

**मञ्जूषा**

**[ मधुरतया पाठकानां स्पष्टतया . सम्मिलिताः ]**

**7. मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

**आचार्यात्पादमादत्ते पादं शिष्यः स्वमेधया।**
**कालेन पादमादत्ते पादं सब्रह्मचारिभिः ॥**

**भावार्थः-**

शिष्यस्य (i)______चत्वारि साधनानि सन्ति। सः शिक्षायाः प्रथमं चतुर्थांशं (ii)______प्राप्नोति। द्वितीयं चतुर्थांशम् च (iii)______लभते। एवमेव तृतीयं चतुर्थांशं समयक्रमेण प्राप्नोति शेषं चतुर्थांशं च (iv)___________प्राप्नोति।

**मञ्जूषा**

**[ शिक्षाप्राप्तेः सब्रह्मचारिभिः आचार्यात् . स्वमेधया ]**

**8.मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

**अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।**
**स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥**

**भावार्थः-**

यत् (i)_______श्रोतॄणाम् हृदये उद्वेगं न करोति सत्ययुक्तं (ii)______हितकारि च भवति तस्य (iii)________तथा च स्वाध्यायस्य अभ्यासः एव (iv)_______तपः कथ्यते।

**मञ्जूषा**

**[ वाचनम् प्रियं वाङ्मयं . वाक्यम् ]**

**9. मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

**दास्यामीति प्रतिज्ञाय योऽन्यथा कुरुते मनः ।**
**कार्पण्यानिश्चितमतेः कः स्यात् पापतरस्ततः ॥**

**भावार्थः-**

अस्य भावोऽस्ति यत्-यः जनः स्वजीवने (i)______प्रतिज्ञां कृत्वा पश्चात् तस्याः (ii)________न करोति। तस्मात् कार्पण्य (iii)_______ नरात् अधिकः (iv) ________कोऽपि न भवति।

**मञ्जूषा**

**[ पापी दानस्य अनिश्चितमतेः पालनम् ]**

**10. मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

**शक्रोऽहमस्मि देवेन्द्रस्त्वत्समीपमुपागतः ।**
**वरं वृणीष्व राजर्षे! यदिच्छसि तदुच्यताम् ॥**

**भावार्थः-**

अस्य भावोऽस्ति अस्मिन् श्लोके शक्रः (i)_________कथयति यत् अहम् देवानाम् इन्द्रः (नृपः) (ii)__________तव समीपे वरं दातुम् (iii)_________अस्मि। अतः हे राजर्षे। वरं वृणीष्व यदपि त्वम् इच्छसि तत् (iv) __________कथय।

**मञ्जूषा**

**[ शक्रः नृपम् माम् उपागतः ]**

**11. मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

**धनस्य निःसारलघोः स सारो यद् दीयने लोकहितोन्मुखेन ।**
**निधानतां याति हि दीयमानम् अदीयमानं निधनैकनिष्ठम् ॥**

**भावार्थः-**

अस्य भावोऽस्ति यत्-धनस्य (i)__________अस्ति। तस्य अयम् एव (ii)_________ यत् धनम् संसारस्य हिताय दीयते तत् (iii) _______सुरक्षितम् भवति यत् धनम् न दीयते तस्य तु एक पदे एव (iv)_____

**मञ्जूषा**

**[ लाभः निधिरूपे सारहीनम् नाशः]**

**12. मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

**काकस्य गात्रं यदि काञ्चनस्य माणिक्यरत्नं यदि चञ्चुदेशे।**
**एकैकपक्षे ग्रथितं मणीनां तथापि काको न तु राजहंसः ॥**

**भावार्थः-**

अस्य श्लोकस्य भावः अस्ति यदि काकस्य शरीरं (i)__________भवेत् तस्य चञ्चुदेशे (ii)_______अपि भवेत् तथापि सः राजहंसः न मन्यते अपितु काकः एव भवति। एवमेव यदि (iii)__________ पक्षाः मणिभिः अपि ग्रथिताः भवेयुः तथापि सः (iv) ____________एव तिष्ठति। राजहंसः तु भवितुं नार्हति ॥

**मञ्जूषा**

[ **काकः, स्वर्णस्य, काकस्य ,माणिक्यरत्नम्**]

**13. मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

**हंस श्वेतः बकः श्वेतः को भेदः वकहंसयोः।**
**नीरक्षीरविवेके तु हंसो हंसः बको बकः ॥**

**भावार्थः-**

अस्य भावोऽस्ति यथा हंसस्य वर्णः (i)__________ (ii) भवति तथा बकस्य वर्णः अपि श्वेतः भवति तदा तयोः (ii) ______ कः भेदः भवति। अस्य ज्ञानम् नीरक्षीरविवेके एव भवति। अर्थात् (iii)______ नीरक्षीरविवेकी भवति परन्तु (iv) ___________एतादृशम् सामर्थ्यम् न भवति ॥

**मञ्जूषा**

[ **बके, बकहंसयोः, श्वेतः, हंसः** ]

**14. मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

**काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः।**
**वसन्तसमये प्राप्ते काकः काकः पिकः पिकः ॥**

**भावार्थः-**

पिकस्य काकस्य च वर्णः कृष्णः भवति। परन्तु यदा (i)________आगच्छति तदा पिकस्य मधुरेण स्वरेण ज्ञायते यत् द्वयोः मध्ये कः (ii) _______अस्ति अन्यथा द्वयोः एव वर्णः कृष्णः एव भवति। काकस्य स्वरः (iii)_________ भवति तथापि सः सर्व वर्षं 'का-का' इति करोति। एतद्विपरीतं (iv)___________वर्णः मधुरः कर्णप्रियः च भवति परन्तु सः केवलं वसन्ते एव कूजति न तु अयथाकालम्।

**मञ्जूषा**

[ **पिकस्य वसन्तकालः भेदः कर्णकटुः**]

**15. मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

**आयुषः क्षण एकोऽपि न लभ्यः स्वर्णकोटिकैः।**
**स चेन्निरर्थकं नीतः का नु हानिस्ततोऽधिका ॥**

**भावार्थः-**

अस्य भावोऽस्ति अस्माकं (i) _________अमूल्यम् अस्ति। अतः अस्माभिः (ii)___________ प्रत्येकं क्षणस्य सदुपयोगः कर्तव्यः। यतो हि अयं क्षणः (iii) ________अपि पुनः लब्धुं न शक्यते। गतः समयः न पुनः आगच्छति। अतः क्षणनाशाद् अधिका काऽपि अन्या (iv)_________ न अस्ति।

**मञ्जूषा**

**[ स्वर्णकोटिकैः आयुषः जीवनम् हानिः]**

16. मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -

**अधुना रमणीया हि सृष्टिरेषा जगत्पतेः।**
**जीवाः सर्वेऽत्र मोदन्तां भावयन्तः परस्परम्॥**

**भावार्थः-**

अधुना (i)___________इयम् सृष्टिः रमणीया (ii)_________खलु। अतः अत्र सर्वे (iii)_________ ईर्ष्या-द्वेषं विस्मृत्य परस्परम् (iv)_________प्रसन्नाः भवन्तु।

**मञ्जूषा**

**[ मनोहरा भावयन्तः ईश्वरस्य प्राणिनः ]**

17. मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -

**तस्मात् स्यात् कलहो यत्र गृहे नित्यमकारणः।**
**तद्गृहं जीवितं वाञ्छन् दूरतः परिवर्जयेत्॥**

**भावार्थः-**

यदि कश्चित् नरः (i)________ इच्छति तर्हि सः तत् (ii)__________अवश्यमेव त्यजेत् यत्र नित्यम् (iii)___________ भवति। यतो हि (iv)____________ कलहः सर्वदा विनाशस्य कारणं भवति।

**मञ्जूषा**

**[ अकारणः सुखी जीवनम् कलहः गृहम् ]**

18. मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -

**कलहान्तानि हर्म्याणि कुवाक्यान्तं च सौहृदम्।**
**कुराजान्तानि राष्ट्राणि कुकर्मान्तं यशो नृणाम्॥**

**भावार्थः-**

अस्य भावार्थः अस्ति यत् (i)__________राजप्रासादाः नश्यन्ते। कुवाक्यैः अपभाषणेन वा (ii) ___________नश्यते। एवमेव दुष्टनृपैः (iii) _________नश्यन्ते कुकर्मणा च (iv) _________यशः विनष्टं गच्छति।

**मञ्जूषा**

**[ विवादैः मनुष्याणां मैत्री राष्ट्राणि ]**

19. मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -

**कपीनां मेदसा दोषो वह्निदाहसमुद्भवः।**

**अश्वानां नाशमभ्येति तमः सूर्योदये यथा ॥**

**भावार्थः-**

अस्य भावार्थः अस्ति यत्-यथा सूर्यस्य (i)________ अन्धकारः नश्यति तथैव (ii)_________ मेदसा अश्वानाम् (iii)___________समुत्पन्नः (iv)___________विनश्यति।

**मञ्जूषा**

**[ कपीनाम् दोषः उदये वह्निदाहात्]**

**20. मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

**मित्ररूपाः हि रिपवः सम्भाष्यन्ते विचक्षणैः ।**
**ये हितं वाक्यमुत्सृज्य विपरीतोपसेविनः ॥**

**भावार्थः-**

अस्य भावार्थः अस्ति यत्-(i)________एतादृशाणि मित्राणि अपि (ii) ________कथ्यन्ते ये हितकराणि (iii)_________ परित्यज्य विपरीतं (iv)__________ 1

**मञ्जूषा**

**[ रिपवः सेवन्ते वाक्यानि विद्वद्भिः ]**

**21. मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

**अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः ।**
**अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥**

**भावार्थः-**

अस्य भावोऽस्ति यत्-अर्जुनः (i)_________ पृच्छति हे कृष्णः! पुनः अयं (ii) _________न इच्छन् अपि (iii)__________ नियोजितः इव केन (iv)____________भूत्वा पापकर्म आचरति ?

**मञ्जूषा**

**[ बलपूर्वकम् श्रीकृष्णं प्रेरितः मनुष्यः ]**

**22.मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

**काम एषः क्रोध एष रजोगुणसमुद्भवः ।**
**महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥**

**भावार्थः-**

अस्य भावोऽस्ति श्रीकृष्णः (i) ________अवदत् रजोगुणात् (ii) _______अयं कामः क्रोधः च अस्ति। एषः सर्वभोजी (iii)___________ च वर्तते। त्वम् अस्मिन् (शरीरे) एनम् एव (iv)_________ जानीहि।

**मञ्जूषा**

[ समुत्पन्नः      शत्रुम्      अर्जुनम्      महापापी ]

**23. मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

**शक्नोतीहैव यः सोढुं प्राक् शरीरविमोक्षणात्।**
**कामक्रोधवेगं सः युक्तः स सुखी नरः ॥**

**भावार्थः-**

अस्य श्लोकस्य भावोऽस्ति यः मनुष्यः शरीरस्य (i)__________पूर्व कामात् क्रोधात् च समुत्पन्नं (ii) ____________ अत्रैव( iii) __________समर्थः अस्ति सः जनः (iv) ________अस्ति सः च सुखी नरः अस्ति।

**मञ्जूषा**

[ वेगं      योगी      मृत्योः      सोढुं ]

**24. मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

**ध्यायतः विषयान् पुंसः सङ्गस्तेषूपजायते।**
**सङ्गात्सञ्जायते कामः कामात्क्रोधोऽभिजायते ॥**

**भावार्थः-**

अस्य श्लोकस्य भावोऽयम्-सांसारिकविषयान् भोगविलासादि पदार्थान् (i) _________ मनुष्यस्य तेषु विषयेषु (ii) ___________भवति। आसक्तेः एव (iii)_________ उद्भवति कामात् च क्रोधः (iv)__________ भवति।

**मञ्जूषा**

[ ध्यायतः      कामः      उत्पन्नः      आसक्तिः ]

**25. मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

**क्रोधाद्भवति संमोहः सम्मोहात्स्मृतिविभ्रमः।**
**स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥**

**भावार्थः-**

अस्य भावोऽस्ति यत्-क्रोधात् (i) ___________उद्भवति। उद्विग्नतायाः (ii)_________ विनाशः भवति। स्मृतेः विनाशात् (iii)________ नाशः भवति बुद्धेः (iv) _______च मनुष्यः विनश्यति।

**मञ्जूषा**

[ स्मृतेः      विनाशात्      उद्विग्नता      बुद्धेः ]

**26. मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

**तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ।**
**पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम् ॥**

**भावार्थः-**

अस्य भावां वर्तते भगवान् श्रीकृष्णः (i)__________उपदिशति यत् हे भरतवंशे उत्पन्न अर्जुन! कामक्रोधौः बुद्धेः (ii)__________प्रमुखे कारणे स्तः। अतः तस्मात् कारणात् त्वम् आरम्भे एव (iii)_________ नियम्य ज्ञानस्य विज्ञानस्य विनाशकम् एनम् (iv) ____________कामं क्रोधम् च विनाशय।

**मञ्जूषा**

**[ विनाशस्य पाप्मानं अर्जुनम् इन्द्रियाणि]**

**27. मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

**चञ्चलं हि मनः कृष्ण प्रमाथि बलवदृढम्।**
**तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥**

**भावार्थः-**

अस्य भावोऽस्ति यत् अर्जुनः भगवन्तं (i)_________ कथयति यत् हे श्रीकृष्ण! मनः निश्चयेन चञ्चलम् (ii)__________ विषयेषु च शक्तिमत् भवति। अतः अहं तस्य चलायमानस्य (iii)____________ नियन्त्रणं (iv) _____________इव अतिकठिनम् जानामि।

**मञ्जूषा**

**[ प्रमाथि वायोः श्रीकृष्णं मनसः]**

**28. मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

**असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।**
**अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥**

**भावार्थः-**

अस्य भावोऽस्ति यत्-श्रीकृष्णः (i) ____________शिक्षयति यत् हे महाबाहो! हे कुन्ती पुत्र अर्जुन! (ii)_______________चञ्चलस्य मनसः नियन्त्रणम् वशीकरणम् वा (iii)__________भवति। परन्तु हे कौन्तेय! वारम्वारम् (iv) _____________विषयान् प्रति वैराग्यभावेन च मनः वशं गच्छति।

**मञ्जूषा**

**[ अभ्यासेन अर्जुनं निस्संदेहम् अतिकठिनं ]**

**29. मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

**परमापद्गतेनापि नैव तात त्वया रणे ।**
**इदमस्त्रं प्रयोक्तव्यं मानुषेषु विशेषतः ।।**

**भावार्थः-**

अर्थात् (i)_________शिक्षाप्रदानात् पूर्वम् आचार्यः द्रोणः स्वपुत्रम् सावधानम् कुर्वन् अकथयत् यत्-हे पुत्र! अत्यधिके (ii)___________आगते सति अपि त्वम् (iii)___________ अस्य अस्त्रस्य प्रयोगम् विशेषरूपेण (iv)__________न कुर्याः।

**मञ्जूषा**

[ सङ्कटे   मनुष्येषु   रणभूमौ   ब्रह्मास्त्रस्य]

**30. मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

**प्रार्थितं ते मया चक्रं देवदानवपूजितम् ।**
**अजेयः स्यामिति विभो ! सत्यमेतद् ब्रवीमि ते ॥**

**भावार्थः-**

अस्य भावोऽस्ति यत्-द्रोणपुत्रः (i)_______ अवदत् हे सर्वव्यापक ! (विभो!) अहम् अस्मिन् संसारे (ii)____________ स्याम् अतः अहम् त्वाम् देवदानवपूजितम् इदम् (iii)__________ प्रार्थितवान्। अहम् त्वाम् एतत् (iv) __________वदामि।

**मञ्जूषा**

[ **सत्यं   चक्रं   श्रीकृष्णम्   अजेयः** ]

**31.मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

**नानाशस्त्रविदः पूर्वे येऽप्यतीता महारथाः ।**
**नैतदस्त्रं मनुष्येषु तैः प्रयुक्तं कथञ्चन ॥**

**भावार्थः-**

अस्य भावोऽस्ति यत्-नारदः (i)__________अर्जुनम् च कथयति यत् हे वीरौ युवाम् (ii)_________ संहरतम् यतोहि पूर्वे ये अपि (iii)_________ महावीराः अभवन् तेऽपि कदापि एतत् अस्त्रम् (iv)__________ न प्रयुक्तवन्तः ॥

**मञ्जूषा**

[ **निजास्त्रे , नानाशस्त्रज्ञातारः , मनुष्येषु , द्रोणपुत्रम्** ]

**32. मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

**अस्त्रं ब्रह्मशिरो यत्र परमास्त्रेण वच्यते ।**
**समाः द्वादश पर्जन्यस्तद् राष्ट्रं नाभिवर्षति ॥**

**भावार्थः-**

अर्थात्-यत्र (i)_________नाम अस्त्रं परमास्त्रेण नश्यते (ii)___________राष्ट्रे मेघाः द्वादश वर्षाणि न (iii) __________। अर्थात् अस्य अस्त्रस्य प्रयोगेण तु (iv) _________विनश्यति।

**मञ्जूषा**

[ **जीवनमेव   ब्रह्मशिरः   तस्मिन्   अभिवर्षन्ति**]

**33. मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

**पाण्डवास्त्वं च राष्ट्रं च सदा संरक्ष्यमेव हि।**

**तस्मात् संहर दिव्यं त्वमस्त्रमेतन्महाभुज ॥**

**भावार्थः-**

व्यासमुनिः (i) __________आश्वस्तम् कुर्वन् वदति यत् हे द्रोणपुत्रा (ii)_________त्वम् च एतत् राष्ट्रम् च सदा एव संरक्ष्याः (iii)__________।अतएव हे महाभुज! त्वम् एतत् (iv)________अस्त्रं ब्रह्मस्त्र संहर। येन सर्वनाशः न भवेत्।

**मञ्जूषा**

[ **दिव्यम् ,  द्रोणपुत्रम्,  पाण्डवाः ,  सन्ति** ]

**34 . मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

**क्रन्दनं वर्धते तस्य नान्तं समधिगच्छति ।**
**व्यसनं प्राप्य यो मोहात् केवलं परिदेवयेत् ॥**

**भावार्थः-**

अर्थात् अस्य भावोऽस्ति यत्-प्रच्छन्नभाग्यस्य (i)___________ पत्नी तम् शिक्षयति यत् यः जनः (ii) ________ कृत्वा सम्मोहात् केवलं विषादं करोति तस्य (iii)__________ एव वर्धते तत् क्रन्दनं दुःखम् च कदापि (iv)__________ न प्राप्नोति ।

**मञ्जूषा**

[ **दुष्कर्म  रोदनम्  बुद्धिमती  अन्तः** ]

**35. मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

**जलबिन्दुनिपातेन क्रमशः पूर्यते घटः ।**
**स हेतुः सर्वविद्यानां धर्मस्य च धनस्य च ॥**

**भावार्थः-**

प्रच्छन्नभाग्यस्य (i)_________पत्नी तम् शिक्षयति यत् चिन्तां मा कुरु यथा क्रमशः (ii)_______ निपातेन घटः (iii)_________प्राप्नोति तथैव सर्वविद्यानाम् (iv)__________च धनस्य च सः हेतुः भवति।

**मञ्जूषा**

[ **जलबिन्दूनां  बुद्धिमती  धर्मस्य  पूर्णतां** ]

**36. मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

**पापिनाञ्च सदा दुःखं सुखं वै पुण्यकर्मणाम् ।**
**एवं स्थिरतरं ज्ञात्वा साधुवृत्तिं समाचरेत् ॥**

**भावार्थः-**

अस्मिन् संसारे ईश्वरस्य व्यवस्थया (i)__________ जनं सदैव दुःखं प्राप्नोति एवमेव पुण्यकर्मकर्तारं जनं (ii) ___________एव प्राप्यते। इयं पूर्णनिश्चिता व्यवस्था अस्ति। अतः इदं निश्चितं (iii)___________ ज्ञात्वा जनैः सदैव (iv)_________जनानाम् इव व्यवहारं कर्तव्यम्।

**मञ्जूषा**

[ **नियमम्  श्रेष्ठानां  दुष्टं  सुखम्** ]

**37. मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

**पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्।**
**पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता ॥**

**भावार्थः-**

अर्थात् बाल्ये काले स्वपुत्राय (i)________ दातुं पिता अतिकष्टं सहमानः सर्वविधं तपः कृत्वा अपि सः(ii)__________ शिक्षयितुं यतते। यदि तस्य पुत्रः एतन्मात्रम् एव स्मरेत् यत् (iii) ________तस्मै (विद्यादानाय) महत् तपः अकरोत् इयम् (iv)__________ एव तस्य पुत्रस्य कृतज्ञतां प्रकटयति।

**मञ्जूषा**

[ **उक्तिः स्वसन्तति पिता विद्याधनं** ]

**38. मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत –**

**अवक्रता यथा चित्ते तथा वाचि भवेद् यदि।**
**तदेवाहुः महात्मानः समत्वमिति तथ्यतः ॥**

**भावार्थः-**

अर्थात् जनानां मनसि यथा (i) ___________अस्ति तथैव यदि (ii)________ अपि भवेत् तामेव (iii)_______ ज्ञानिनः च वस्तुतः (iv)___________ कथयन्ति।

**मञ्जूषा-**

[ **समत्त्वम् (समानता) वाण्याम् मनस्विनः सरलता**]

**39. मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

**त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्।**
**परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः ॥**

**भावार्थः-**

अस्य भावोऽस्ति यत्-यः नरः सत्याम् धर्मयुक्ताम् (i) _________त्यक्त्वा (ii)___________वाचम् वदेत् सः(iii)__________पक्वं फलं त्यक्त्वा (iv)_________ फलम् खादति अर्थात् तस्य नरस्य वाण्याम् सरसता मधुरता च न भवति।

**मञ्जूषा**

[ **कठोरां वाणीं अपक्वं मूर्खबुद्धिः** ]

**40. मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

**विद्वांस एव लोकेऽस्मिन् चक्षुष्मन्तः प्रकीर्तिताः।**
**अन्येषां वदने ये तु ते चक्षुर्नामनी मते ॥**

**भावार्थः-**

अर्थात् जनानां मनसि यथा (i) ___________अस्ति तथैव यदि (ii)________ अपि भवेत् तामेव (iii)_______ ज्ञानिनः च वस्तुतः (iv)___________ कथयन्ति।

**मञ्जूषा.**

[ **आनने विद्वांसः नेत्रम् नेत्रवन्तः** ]

**41. मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

**यत् प्रोक्तं येन केनापि तस्य तत्त्वार्थनिर्णयः।**
**कर्तुं शक्यो भवेद्येन स विवेक इतीरितः॥**

**भावार्थः-**

अस्य भावोऽस्ति यत्-येन केनापि (i)__________ यत् पूर्वं (ii)______ अस्ति तस्य (iii)_________ येन कर्तुम् शक्यते सः (iv)___________ कथ्यते।

**मञ्जूषा.**

[ **यथार्थनिर्णयः नरेण विवेकः कथितम्** ]

**42. मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

**वाक्पटुर्धैर्यवान् मन्त्री सभायामप्यकातरः।**
**स केनापि प्रकारेण परैर्न परिभूयते॥**

**भावार्थः-**

अर्थात्- यः (i)__________वक्तुं चतुरः धैर्ययुक्तः सभायाम् (ii)___________च भवति सः अन्यैः (iii)__________केन अपि प्रकारेण न (iv)______________

**मञ्जूषा**

[ **निर्भीकः तिरस्क्रियते जनैः मन्त्री** ]

**43. मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

**भगवन्किमुपादेयम् ? गुरुवचनम्, हेयमपि च किम् ? अकार्यम्।**
**को गुरुः ? अधिगततत्त्वः शिष्यहितायोद्यतः सततम्॥**

**भावार्थः-**

हे भगवन् अस्मिन् लोके (i) ____________किम् अस्ति ? उत्तरम् अस्ति गुरुणाम् वचनम्। एवमेव (ii)____________किम्? उत्तरम् अस्ति दुष्कार्यम्। गुरुः कः कथ्यते? यः (iii)____________ स्वशिष्याणाम् कल्याणाय (iv)____________ भवति,येन च यथार्थज्ञानम् प्राप्तम् भवति।

**मञ्जूषा.**

[ **तत्परः, ग्राह्यम्, निरन्तरम्, त्याज्यम्** ]

**44. मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

**कः पथ्यतरः ? धर्मः, कः शुचिरिह ? यस्य मानसं शुद्धम् ।**
**कः पण्डितः ? विवेकी, किं विषम् ? अवधीरणा गुरुषु ॥**

**भावार्थः-**

अस्मिन् संसारे (i)__________ एव पथ्यतरः अस्ति। यस्य मनः पवित्रं निर्मलं (ii)__________चास्ति सः एव पवित्रः भवति। यः सर्वाणि कार्याणि विचार्य करोति सः पण्डितः (iii)__________भवति। गुरुणाम् तिरस्कारम् (iv) __________इव जनान् नाशयति।

**मञ्जूषा.**

[ **विवेकी, विषम्, धर्मः, शुद्धम्**]

**45. मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

**किं जीवितम् ? अनवद्यम्, किं जाड्यम् ? पाठतोऽप्यनभ्यासः ।**
**को जागर्ति? विवेकी, का निद्रा ? मूढता जन्तोः ॥**

**भावार्थः-**

अर्थात् अनिन्द्यं (i)__________ च जीवनम् एव वस्तुतः जीवनं कथयितुम् शक्यते। पठितं परं तस्य अभ्यासः न कृतः तदेव (ii) ________ कथ्यते यतो हि अनभ्यासे विद्या विषं भवति। सः एव नरः (iii)___________ भवति यः जीवने सदैव जागरुकः भवति। यः अवसरे प्राप्ते सावधानः भूत्वा तस्य सदुपयोग न करोति, तस्य नरस्य ईदृशी मूर्खता एव अत्र (iv)_________ कथिता।

**मञ्जूषा.**

[ **मूढता, जाड्यं, निष्कलङ्कम्, विवेकी**]

**46. मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

**नलिनीदलगत जलवत्तरलं किम् ? यौवनं धनं चायुः ।**
**कथय पुनः के शशिनः किरणसमाः ? सज्जना एव ॥**

**भावार्थः-**

अस्य भावः अस्ति यत्-अस्मिन् संसारे यौवनम् धनम् आयुः च कमलिन्याः पत्रे पतितं जलम् इव (i)_______भवन्ति।अर्थात् यथा कमलपत्रपतितम् जलकणानि क्षणभङ्गराणि अस्थिराणि च भवन्ति तथैव मनुष्यस्य युवावस्था तेन अर्जितं धनम् तस्य आयुः चापि अस्थिराणि भवन्ति। एतद्विपरीतम् (ii)________किरणसमाः (शीतलाः शान्ताः वा) के भवन्ति? अस्य उत्तरम् अस्ति नूनमेव सज्जनाः। अर्थात् यथा चन्द्रस्य (iii)_________मनुष्येभ्यः शीतलताम् प्रयच्छन्ति तथैव (iv)_______सम्पर्क: अपि मनुष्यः शीतलताम् आप्नोति।

**मञ्जूषा.**

[ **शशिनः, सज्जनानाम्, चञ्चलानि, किरणाः**]

**47. मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

**कोऽनर्थफलः ? मानः, का सुखदा ? साधुजनमैत्री ।**
**सर्वव्यसनविनाशे को दक्षः ? सर्वथा त्यागी ॥**

**भावार्थः-**

अस्य भावः अयम् अस्ति यत्-अभिमानः परिणामे (i)________भवति। अतः (ii)_________अत्र अनर्थफलः कथितः। साधुजनानां मैत्री सदैव (iii)_________भवति। यः मानवः सर्वथा (iv)____________भवति स एव सर्वासां विपदां विनाशं कर्तुं समर्थः भवति।

**मञ्जूषा.**

[ **त्यागी, अनर्थकरः, सुखदायिनी, मानः**]

**48. मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

**किं मरणम् ? मूर्खत्वम्, किं चानर्घम् ? यदवसरे दत्तम्।**
**आमरणात्किं शल्यम् ? प्रच्छन्नं यत्कृतं पापम्॥**

**भावार्थः-**

अस्य भावोऽस्ति यत्-अस्मिन् जीवने (i) _________एवं मरणं कच्यते। यस्य जन्म भवति तस्य मरणम् अपि निश्चितं भवति। एतत् तु प्राकृतिकं विधानम् अस्ति। परन्तु ये जनाः मूर्खतावशात् पदे पदे (ii)__________भवन्ति ते तु जोविताः भूत्वा अपि मृताः एव। एवमेव यत् यथासमयं दीयते तत् अमूल्यम् बहुमूल्यं वा भवति। (iii)___________ गुप्तरूपेण क्रियते तत् मरणम् यावत् (iv)_______ इव कष्टं ददाति।

**मञ्जूषा.**

[ **अपमानिताः, शल्यम्, मूर्खत्वं, यत्पापं**]

**उत्तरसंकेतः**

**भावार्थः श्लोकस्य भावार्थे रिक्तस्थानपूर्तिः**

| | | | | |
|---|---|---|---|---|
| 1) | (i)कमलम् | (ii) सरस्वती | (iii) मुखकमलस्य | (iv) निवासं |
| 2) | (i)सरस्वति | (ii) अपूर्वः | (iii) क्षीणताम् | (iv) कोषस्य |
| 3) | (i)विद्यया | (ii) सत्येन | (iii) तपः | (iv) भवति |
| 4) | (i) शीतला | (ii)आनन्दयति | (iii) वाणी | (iv) मधुरभाषिर्णी |
| 5) | (i)अष्टगुणाः | (ii) श्रोतुम् इच्छा | (iii) अर्थस्य विशुद्धं ज्ञानम् | (iv)उत्कृष्टा |
| 6) | (i)पाठकानां | (ii) सम्मिलिताः | (iii) स्पष्टतया | (iv) मधुरतया |
| 7) | (i) शिक्षाप्राप्तेः | (ii)आचार्यात् | (iii) स्वमेधया | (iv)सब्रह्मचारिभिः |
| 8) | (i)वाक्यम् | (ii)प्रियं | (iii) वाचनम् | (iv) वाङ्मयं |
| 9) | (i)दानस्य | (ii)पालनम् | (iii) अनिश्चितमतेः | (iv) पापी |
| 10) | (i) नृपम् | (ii) शक्रः | (iii) उपागतः | (iv) माम् |
| 11) | (i) सारहीनम् | (ii) लाभः | (iii) निधिरूपे | (iv) नाशः |
| 12) | (i) स्वर्णस्य | (ii) माणिक्यरत्नम् | (iii) काकस्य | (iv) काकः |
| 13) | (i) श्वेतः | (ii) बकहंसयोः | (iii) हंसः | (iv) बके |
| 14) | (i) वसन्तकालः | (ii) भेदः | (iii) कर्णकटुः | (iv) पिकस्य |

15) (i) जीवनम्	(ii) आयुषः	(iii) स्वर्णकोटिकैः	(iv) हानिः
16) (i) ईश्वरस्य	(ii) मनोहरा	(iii) प्राणिनः	(iv) भावयन्तः
17) (i) सुखी जीवनम्	(ii) गृहम्	(iii) कलहः	(iv) अकारणः
18) (i) विवादैः	(ii) मैत्री	(iii) राष्ट्राणि	(iv) मनुष्याणां
19) (i) उदये	(ii) कपीनाम्.	(iii) वह्निदाहात्	(iv) दोषः
20) (i) विद्वद्भिः	(ii) रिपवः	(iii) वाक्यानि	(iv) सेवन्ते
21) (i) श्रीकृष्णं	(ii) मनुष्यः	(iii) बलपूर्वकम्	(iv) प्रेरितः
22) (i) अर्जुनम्.	(ii) समुत्पन्नः .	(iii) महापापी.	(iv) शत्रुम्
23) (i) मृत्योः	(ii) वेगं	(iii) सोढुं	(iv) योगी
24) (i) ध्यायतः.	(ii) आसक्तिः.	(iii) कामः.	(iv) उत्पन्नः
25) (i) उद्विग्नता	(ii) स्मृतेः	(iii) बुद्धेः	(iv)विनाशात्
26) (i) अर्जुनम्	(ii) विनाशस्य	(iii) इन्द्रियाणि	(iv) पाप्मानं
27) (i) श्रीकृष्णं	(ii) प्रमाथि	(iii) मनसः	(iv) वायोः
28) (i) अर्जुनं	(ii) निस्संदेहम्	(iii) अतिकठिनं	(iv) अभ्यासेन
29) (i) ब्रह्मास्त्रस्य	(ii) सङ्कटे	(iii) रणभूमौ	(iv) मनुष्येषु।
30) (i) श्रीकृष्णम्	(ii) अजेयः	(iii) चक्रं	(iv) सत्यं
31) (i) द्रोणपुत्रम्	(ii) निजास्त्रे	(iii) नानाशस्त्रज्ञातारः	(iv) मनुष्येषु
32) (i) ब्रह्मशिरः	(ii) तस्मिन्	(iii) अभिवर्षन्ति	(iv) जीवनमेव
33) (i) द्रोणपुत्रम्	(ii) पाण्डवाः	(iii) सन्ति	(iv) दिव्यम्
34) (i) बुद्धिमती	(ii) दुष्कर्म	(iii) रोदनम्	(iv) अन्तः
35) (i) बुद्धिमती	(ii) जलबिन्दूनां	(iii) पूर्णतां	(iv) धर्मस्य
36) (i) दुष्टं	(ii) सुखम्	(iii) नियमम्	(iv) श्रेष्ठानां
37) (i) विद्याधनं	(ii) स्वसन्ततिं	(iii) पिता	(iv) उक्तिः
38) (i) सरलता	(ii) वाण्याम्	(iii) मनस्विनः	(iv)समत्त्वम् (समानता)
39) (i) वाणी	(ii) कठोरां	(iii) मूर्खबुद्धिः	(iv) अपक्वं
40) (i) नेत्रम्	(ii) विद्वांसः	(iii) नेत्रवन्तः	(iv) आनने।
41) (i) नरेण	(ii) कथितम्	(iii) यथार्थनिर्णयः	(iv) विवेकः
42) (i) मन्त्री	(ii) निर्भीकः	(iii) जनैः	(iv) तिरस्क्रियते
43) (i) ग्राह्मम्	(ii) त्याज्यम्	(iii) निरन्तरम् ।	(iv) तत्परः
44) (i) धर्मः	(ii) शुद्धम्	(iii) विवेकी	(iv) विषम्।
45) (i) निष्कलङ्ङ्कम्	(ii) जाड्यं	(iii) विवेकी	(iv) मूढता
46) (i) चञ्चलानि।	(ii) शशिनः	(iii) किरणाः	(iv) सज्जनानाम्
47) (i) अनर्थकरः	(ii) मानः	(iii) सुखदायिनी	(iv) त्यागी
48) (i) मूर्खत्वं	(ii) अपमानिताः	(iii) यत्पापं	(iv) शल्यम्।

## प्रसङ्गानुकूलम् उचितार्थः

**1. रेखाङ्कितपदानां प्रसङ्गानुसारम् उचितम् अर्थं चित्वा लिखत - - (केवलं प्रश्नचतुष्टयम्)**

(क) राज्ञ: दानशीलताम् **आकर्ण्य** जना: तं देशम् आयान्ति स्म।

(i) ज्ञात्वा (ii) मत्वा (iii) प्राप्य (iv) श्रुत्वा

(ख) राज्ञ: नेत्रदानार्थं निश्चयं ज्ञात्वा अमात्या: **विषण्णा:** भूत्वा अवदन्।

(i) विमुखा: (ii) खिन्ना: (iii) प्रसन्ना: (iv) हर्षिता

(ग) यदि भवान् प्रीत:, तदा त्वा: एकस्य **चक्षुष:** दानम् इच्छामि।

(i) श्रोत्रस्य (ii) गात्रस्य (iii) नेत्रस्य (iv) मुखस्य

(घ) एकदा राजा **सरोवरस्य** समीपे विहरति।

(i) तडागस्य (ii) नगरस्य (iii) नद्या: (iv) ग्रामस्य

(ङ) न **अयं** चिरं परिक्लेशम् अनुभवितुम् अर्हति।

(i) एष: (ii) स: (iii) तत् (iv) इदम्

**2. रेखाङ्कितपदानां प्रसङ्गानुसारम् उचितम् अर्थं चित्वा लिखत - (केवलं प्रश्नचतुष्टयम्)**

(क) **हेयम्** अपि च किम्?

(i) ग्राह्यम् (ii) त्याज्यम् (iii) कर्त्तव्यम् (iv) यन्त्रम्

(ख) क: **शुचि:** इह।

(i) पवित्र: (ii) सत्यवादी (iii) परोपकारी (iv) कल्याणकारी

(ग) के **शशिन:** किरणसमा:।

(i) सूर्यस्य (ii) शशकस्य (ii) चन्द्रस्य (iv) नगरस्य

(घ) आमरणात्किं **शल्यम्।**

(i) कण्टकम् (ii) यन्त्रम् (iii) युद्धम् (iv) मरणम्

(ङ) यस्य **मानसं** शुद्धम्।

(i) मन: (ii) तप: (iii) सर: (iv) हस्तः

**3. रेखाङ्कितपदानां प्रसङ्गानुकूलं समुचितार्थं चित्वा लिखत -(केवलं प्रश्नचतुष्टयम्)**

(क) अहं खलु काल: **विश्वस्य** आत्मा।

(i) जगत: (ii) समयस्य (iii) देशस्य (iv) नगरस्य

(ख) अहमेव साक्षी जगत: उत्पत्ते: विकासस्य **प्रलयस्य** च।

(i) प्रवर्धनस्य (ii) क्रोधस्य (iii) प्रलापस्य (iv) विनाशस्य

(ग) कथम् इमं सङ्कल्पं **श्रुत्वा** विस्मिता: यूयम्?

(i) ज्ञात्वा (ii) विज्ञाय (iii) आकर्ण्य (iv) कृत्वा

(घ) प्रत्येकम् अयनस्य **अवधि:** षण्मासा:।

(i) काल: (ii) अवधानम् (iii) अवधारणा (iv) अभिभूय:

(ङ) समारोहारम्भे कश्चन **विद्वान्** सङ्कल्पवाचनं करोति।

(i) ज्ञानवान् (ii) किञ्चिज्ञ: (iii) अल्पज्ञ: (iv) मूर्ख:

**4. रेखाङ्कितपदानां प्रसङ्गानुकूलं समुचितार्थं चित्वा लिखत -(केवलं प्रश्नचतुष्टयम्)**

(क) प्रश्नोत्तरमाध्यमेन भवतां **जिज्ञासां** शमयितुम् इच्छामि।

(i) गन्तुम् इच्छा (ii) ज्ञातुम् इच्छा (iii) गातुम् इच्छा (iv) कर्तुम इच्छा

(ख) अस्य अवशेषा: तु आर्यकला-संस्कृति-सम्पद: **परिचायका**:।

(i) सूचका: (ii) सेवका: (iii) पर्यटका: (iv) चालका:

(ग) **साधु** पृष्टम्।

(i) संन्यासी (ii) शुद्धम् (iii) मुनि (iv) सम्यक्

(घ) **विपुला** च अत्र वनसम्पदा।

(i) पृथ्वी (ii) विशाला (iii) स्थूला (iv) अखिला

(ङ) वनौषधीनां तु अयं **स्रोत**: एव।

(i) उद्गमस्थलम् (ii) प्रवाह: (iii) निर्झर: (iv) निर्गतः

**5. स्थूलाक्षरपदानां प्रसङ्गानुसारम् उचितम् अर्थं चित्वा लिखत -(केवलं प्रश्नचतुष्टयम्)**

(क) य इच्छत्यात्मन: **श्रेय**: प्रभूतानि सुखानि च।

(i) श्रेष्ठ: (ii) कल्याणम् (iii) सम्पत्तिम् (iv) सौन्दर्यम्

(ख) तदैव **आहु**: महात्मान: समत्वमिति तथ्यत: ।

(i) चलन्ति (ii) शृण्वन्ति (iii) चिन्तयन्ति (iv) कथयन्ति

(ग) **वाक्पटु**: धैर्यवान् मन्त्री सभायामप्यकातर: परै: न परिभूयते।

(i) निपुण: (ii) उत्तम: श्रोता (iii) वाक्कुशल: (iv) श्रेष्ठ:

(घ) त्यक्त्वा धर्मप्रदां वाचं **परुषां** योऽभ्युदीरयेत्।

(i) कठोराम् (ii) कोमलाम् (iii) प्रयुक्ताम् (iv) दुष्कराम्

(ङ) स विवेक इति **ईरित**: ।

(i) दृष्ट: (ii) कथित: (ii) श्रुत: (iv) अनीप्सित:

**6. स्थूलाक्षरपदानां प्रसङ्गानुसारम् उचितम् अर्थं चित्वा लिखत - (केवलं प्रश्नचतुष्टयम्)**

(क) सन्धिं **प्रकल्प्य** कलशं गृहाभ्यन्तरे क्षिप्तवान्।

(i) चिन्तयित्वा (ii) रचयित्वा (iii) कथयित्वा (iv) पठित्वा

(ख) प्रचुरमणिमाणिक्यानाम् **आभया** भासमानं गृहम् अपश्यताम्।

(i) प्रकाशेन (ii) सूर्येण (iii) अग्निना (iv) चन्द्रेण

(ग) आपदां **तरणि**: धैर्यम्।

(i) सूर्य: (ii) तरणम् (iii) नौका (iv) सलिलम्

(घ) **झटिति** एव क्षेत्रं गत:।

(i) सहसा (ii) मन्दम् (iii) विलम्बेन (iv) शीघ्रम्

(ङ) विषादं त्यक्त्वा **उद्यम**: क्रियताम्।

(i) परिश्रम: (ii) प्रयत्न: (iii) प्रयोग: (iv) प्रवर्धन:

**7. रेखाङ्कितपदेषु प्रसङ्गानुसारम् उचितम् अर्थचयनं कुरुत -(केवलं प्रश्नचतुष्टयम्)**

(क) किम् इदं **घोरम्** आपतितम्।

(i) पत्रम् (ii) भयङ्करम् (iii) दायित्त्वम् (iv) कल्याणम्

(ख) **समीचीनं** न कृतं भवता।

(i) घृणितम् (ii) वञ्चनम् (iii) उचितम् (iv) वर्णितम्

(ग) पवन: **स्तब्ध**: जात:।

(i) आरब्ध: (ii) स्थगित: (iii) प्रदूषित: (iv) कथित(

(घ) **सकलं** जगत् ध्वस्तं भविष्यति।

(i) समस्तम् (ii) ईश्वरीयम् (iii) अर्धम् (iv) धर्म

(ङ) द्वादश **समा:** पर्जन्य: तद् राष्ट्रं नाभिवर्षति।
(i) मासा: (ii) वर्षाणि (iii) दिनानि (iv) नानाविधानि

**8. रेखाङ्कितपदानां प्रसङ्गानुसारम् उचितम् अर्थं चित्वा लिखत - (केवलं प्रश्नचतुष्टयम्)**

(क) ''चञ्चलं हि मन: कृष्ण! **प्रमाथि** बलवद्दृढम्।''
(i) मथनशीलम् (ii) चिन्तनशीलम् (iii) गुणवत् (iv) दानशीलम्

(ख) ''ध्यायत: विषयान् **पुंस**: सङ्गस्तेषूपजायते।''
(i) मित्रस्य (ii) बालकस्य (iii) शिक्षकस्य (iv) पुरुषस्य

(ग) तस्मात् त्वम् **आदौ** इन्द्रियाणि नियम्य पाप्मानं प्रजहि।
(i) सर्वप्रथमम् (ii) रात्रौ (iii) यदा कदा (iv) सर्वदा

(घ) अभ्यासेन तु **कौन्तेय** वैराग्येण च गृह्यते।
(i) भीम: (ii) अर्जुन: (iii) नकुल: (iv) सहदेव:

(ङ) क्रोधाद् भवति **सम्मोह:**।
(i) उद्विग्नता (ii) निर्धनता (iii) व्याकुलता (iv) धीरः

**9. अधोलिखितपङ्क्तिषु स्थूलाक्षरपदानाम् प्रसङ्गानुसारं शुद्धम अर्थं चिनुत -(केवलं प्रश्नचतुष्टयम्)**

(क) मेष: **महानसं** प्रविश्य यत् पश्यति तद् भक्षयति।
(i) हयशालाम् (ii) मन्दिरम् (iii) पाकशालाम् (iv) जन्तुशालाम्

(ख) 'कलहान्तानि **हर्म्याणि** कुवाक्यान्तं च सौहृदम्।'
(i) राजभवनानि (ii) उद्यानानि (iii) मन्दिराणि (iv) गृहाणि

(ग) 'अन्यस्मिन् **अहनि** महानसं प्रविष्ट: मेष: सूपकारेण ताडित:।
(i) रात्रौ (ii) मार्गे (iii) दिवसे (iv) अवसरे

(घ) 'तस्य **क्षितौ** प्रलुठत: तृणेषु वह्निज्वाला: समुत्थिता:।'
(i) मार्गे (ii) भूमौ (iii) पाकशालायाम (iv) रात्रौ

(ङ) '**सपदि** उपाय: क्रियताम्।'
(i) एकपदेन (ii) पादेन सह (iii) झटिति (iv) विलम्बेन

**10. स्थूलाक्षरपदानां प्रसङ्गानुसारम् उचितम् अर्थं चित्वा लिखत -(केवलं प्रश्नचतुष्टयम्)**

(क) **मेध्यम्** अमेध्यं सर्वमेव भक्षयति।
(i) मेधाविनम् (ii) अभक्षणीयम् (iii) विशुद्धम् (iv) मधुरम्

(ख) अस्माकम् **ऐक्यं** तु जगत्प्रसिद्धम्।
(i) एकता (ii) भिन्नता (iii) क्रूरता (iv) विभिन्नम्

(ग) काकस्य **गात्रं** यदि काञ्चनस्य।
(i) गोत्रम् (ii) कुटुम्बम् (iii) शरीरम् (iv) चञ्चु(

(घ) आपत्काले सरांसि त्यक्त्वा दूरं **व्रजसि।**
(i) वदसि (ii) भजसि (iii) गच्छसि (iv) भ्रमति

(ङ) बक: मीनान् छलेन **अधिगृह्य** क्रूरतया भक्षयति।
(i) कृत्वा (ii) खादित्वा (iii) त्यक्त्वा (iv) गृहीत्वा

## उत्तरसंकेत:
## प्रसङ्गानुसारम् उचितार्थचयनम्

| | | | |
|---|---|---|---|
| 1. | (क) –(iv) श्रुत्वा | (ख) – (ii) खिन्ना: | (ग) –(iii) नेत्रस्य , |
| | (घ) -(i) तडागस्य | (ङ) - (i) एष: | (च) –(i) सम्पूर्णम् |
| 2 | (क) -(ii) त्याज्यम् | (ख) -(i) पवित्र | (ग) –(ii) चन्द्रस्य |
| | (घ) - (i) कण्टकम् | (ङ)- (i) मन: | |
| 3. | (क) –(i) जगत: | (ख) – (iv) विनाशस्य | (ग) –(iii) आकर्ण्य |
| | (घ) - (i) काल: | (ङ) (i) ज्ञानवान् | |
| 4. | (क) -(ii) ज्ञातुम् इच्छा | (ख) - (i) सूचका: | (ग) -( iv) सम्यक् |
| | (घ) - (ii) विशाला | (ङ) (i) उद्गमस्थलम् | |
| 5. | (क) –(ii) कल्याणम् | (ख) – (iv) कथयन्ति | (ग) –(iii) वाक्कुशल: |
| | (घ) - (i) कठोराम् | (ङ) - (ii) कथित: | |
| 6. | (क) –(ii) रचयित्वा | (ख) – (i) प्रकाशेन | (ग) –(iii) नौका |
| | (घ) - (iv) शीघ्रम् | (ङ) –(i) परिश्रम: | |
| 7. | (क) –(ii) भयङ्करम् | (ख) –(iii) उचितम् | (ग) –(ii) स्थगित: |
| | (घ) - (i) समस्तम् | (ङ) –(ii) वर्षाणि | (च) –(iv) मेघ: |
| 8. | (क) –(i) मथनशीलम् | (ख) –( iv) पुरुषस्य | (ग) –(i) सर्वप्रथमम् |
| | (घ) - (ii) अर्जुन | (ङ) –(i) उद्विग्नता | |
| 9. | (क) –(iii) पाकशालाम् | (ख) –(i) राजभवनानि | (ग) –(iii) दिवसे |
| | (घ) - (ii) भूमौ | (ङ) –(iii) झटिति | |
| 10. | (क) –(iii) विशुद्धम् | (ख) –(i) एकता | (ग) –(iii) शरीरम् |
| | (घ) - (iii) गच्छसि | (ङ) –(iv) गृहीत्वा | |

## कथायाः रिक्तस्थानपूर्तिः

**1**

**मञ्जूषाप्रदत्तपदानां सहायतया रिक्तस्थानानि पूरयित्वा अधोलिखित-कथाम् उत्तरपुस्तिकायां लिखत –**

एकदा भगवान्बोधिसत्त्व: (i) ------- राजा अभवत्। सः महान्दानी, विनयशीलः, वृद्धोपसेवी च (ii) ---। तस्य दानशीलताम् श्रुत्वा (iii) ----------- देशेभ्योऽपि जनाः तस्य देशम् आयान्ति स्म। एकदा शक्रः अपि तस्य (iv) -------------- परीक्षितुम् आगच्छत्। सः नेत्रहीनयाचक-रूपेण आगत्य तं राजानम् एकं (v) ------------- अयाचत। राजा तस्मै चक्षुर्द्वयमेव प्रायच्छत्। प्रसन्न: (vi) ------------- कतिपयेभ्यः दिनेभ्यः पश्चात्पुनः राज्ञः पुरतः उपस्थितः अभवत्। सः राज्ञः त्यागवृत्तिं प्रशंसन्नेत्रद्वयमपि प्रत्यस्थापयत्। अपि च शतयोजनपर्यन्तं (vii) ------------ पारं द्रष्टुं समर्थः भव इति तस्मै वरम्अयच्छत्। उच्यते अपि- नास्ति त्याग समं (viii) ---------------।

| |
|---|
| आसीत्, शिवीनाम्, सुखम्, शैलानाम्, अन्येभ्यः, दानशीलताम्, शक्रः, नेत्रम्। |

**2**

**मञ्जूषाप्रदत्तपदानां सहायतया रिक्तस्थानानि पूरयित्वा अधोलिखित-कथाम् उत्तरपुस्तिकायां लिखत –**

स: दुष्टबुद्धिः तु तयोः वार्ता ........ झटिति एव क्षेत्रं गतः । तत्र अश्वत्थमूलं .......... तं सुवर्णकलशं प्राप्तवान्। यदा स तस्य आवरणम् अपसारयति तदैव भयङ्करम् एकं विषधरं ......... कुर्वन्तं पश्यति। भीतः स ........ पुनः आवृत्य तं च आदाय ..........गृहं समागतः । स्वमित्रं सर्पेण ........ इच्छन् सः भित्ती सन्धिं प्रकल्प्य तन्मध्यतः कलशं गृहाभ्यन्तरे क्षिप्तवान् । विचित्रा खलु दैवगतिः । .......... कलशाद् बहिः निर्गत्य ......... तमेव दुष्टबुद्धिं दष्टवान् ।

**मञ्जूषा**

| |
|---|
| श्रुत्वा, मित्रस्य, मारयितुम्, पतितात्, खनित्वा, विषधरः, फूत्कारं, कलशं |

**3**

**मञ्जूषाप्रदत्तपदानां सहायतया रिक्तस्थानानि पूरयित्वा अधोलिखित-कथाम् उत्तरपुस्तिकायां लिखत –**

चन्द्रनामकस्य राजपुत्राः राजगृहे वानरान् पालयन्ति स्म। तस्मिन् राजगृहे (i) ……….एकं मेषयूथम् अपि आसीत्। तेषु एकः उद्दण्डः मेषः अहर्निशं (ii)……..प्रविश्य यत् पश्यति स्म तत् खादति स्म। अतः तेन सह सूपकाराणां कलहः भवति स्म। मेषस्य सूपकाराणां च कलहं दृष्ट्वा वानराणां बुद्धिमान् यूथपतिः तान् अवदत् एतेषां कलहो वानराणां विनाशकारणं भविष्यति अतः (iii)……… राजभवनं त्यक्त्वा वनं गच्छामः। किन्तु (iv)……..वानराः तस्य वचनम् अश्रद्धेयं मत्वा वनं न अगच्छन्। एकदा सः उद्दण्डः (v) ……..सूपकारैः ज्वलितकाष्ठेन ताडितः । ऊर्णाप्रचुरः मेषः जाज्वल्यमानशरीरः निकटस्थाम् अश्वशालां प्राविशत् । तेन अश्वशालायाम् अपि अग्निज्वालाः समुत्थिताः। अतः केचित् अश्वाः दग्धाः केचित् च (vi)…….. राजवैद्यः नृपम् अवदत् यत् अश्वानां वह्निदाहसमुद्भवः दोषः (vii)……. मेदसा नाशमभ्येति । राजा आदिशत्- यथोचितं क्रियताम्। राजादेशं श्रुत्वा भयत्रस्ताः (viii)……….अचिन्तयन्-अवधीरिताः अस्माभिः गुरुजनोपदेशाः।

**मञ्जूषा**

| |
|---|
| मृताः, मेषः, वानराः, बालवाहनयोग्यम्, मदोद्धताः, वयम्, वानराणाम्, महानसम् । |

**4.**

**मञ्जूषाप्रदत्तपदानां सहायतया रिक्तस्थानानि पूरयित्वा अधोलिखित-कथाम् उत्तरपुस्तिकायां लिखत –**

अस्ति कर्मपुरनाम्नि (i)…….प्रच्छन्नभाग्य-नामधेयः कश्चित् कुमारः। बाल्ये वयसि विद्यापराङ्मुखः स केनचित् दुष्टबुद्धिनाम्ना (ii)…….. सह चौर्यकर्मणि निरतः सञ्जातः। एकदा स दुष्टबुद्धिना सार्धं कस्यचित् श्रेष्ठिनः गेहे धनहरणार्थं ग्रामान्तरं प्रस्थितः। अथ व्रजन्तौ तौ गर्तसङ्गले मार्गे क्रीडतः कांश्चित् (iii)……. प्रेक्ष्य अवदताम्- भो भो बालकाः! कथमत्र नतोन्नते विषमे मार्गे क्रीडथ? कश्चित् उद्दण्डः बालकः उवाच-अयि भो ! यद्येवं तर्हि कथं भवन्तौ सुपथं परित्यज्य अनेन कुपथेन गन्तुं प्रवृत्तौ ? अपि इदं (iv)………. ? अनेन वचसा प्रच्छन्नभाग्यः अचिन्तयत्-अहो! कुमार्गम् आश्रितस्य मम कीदृशी इयं क्लेशपरम्परा। एवं बहुविधम् (v)………श्रुत्वा शान्तचित्तः सः कस्यचित् कृषकस्य शस्यक्षेत्रे हलकार्यं कर्तुं प्रारभत, श्रमेण च शनैः शनैः प्रभूतं धनम् अर्जितवान्। अथ पूर्वमित्रं दुष्टबुद्धिः प्रच्छन्नभाग्यस्य धनागमवृत्तान्तं श्रुत्वा कदाचित् मध्यरात्रे तस्य एवं गृहे चौर्यार्थं सन्धि-खननसुयोगम् विलोकयन् स्थितः। तस्मिन्नेव काले सुतोत्थितः प्रच्छन्नभाग्यः सम्भ्रान्तचित्तः (vi)……. सम्बोध्य उवाच- अहो विचित्रः स्वप्नो मया दृष्टः| अस्माकं क्षेत्रे अश्वत्थतरुमूले सुवर्णपूरितः कलशः विद्यते इति। दुष्टबुद्धिः तु तयोः वार्तां श्रुत्वा झटिति एव क्षेत्रं गतः। तत्र अश्वत्थमूलं खनित्वा तं सुवर्णकलशं प्राप्तवान् । यदा स तस्य आवरणम् अपसारयति तदैव भयङ्करम् एकं (vii)…….. फूत्कारं कुर्वन्तं पश्यति । (viii)……. खलु दैवगतिः । पतितात् कलशाद् बहिः निर्गत्य विषधरः तमेव दुष्टबुद्धिं दष्टवान् । कलशपातशब्देन प्रबुद्धौ तौ दम्पती आश्चर्येण प्रचुरमणिमाणिक्यानाम् आभया भासमानं निजगृहं दृष्ट्वा परस्परम् अवलोकयन्तौ अतिष्ठताम्।

**मञ्जूषा**

| |
|---|
| नगरे, विचित्रा, विषधरं, स्वपत्नीं, उपदेशं, श्रेयस्करम्, चौरेण, बालकान् , |

**5.**

**मञ्जूषाप्रदत्तपदानां सहायतया रिक्तस्थानानि पूरयित्वा अधोलिखित-कथाम् उत्तरपुस्तिकायां लिखत –**

कालोऽहम् । अहं खलु कालः। विश्वस्य आत्माहम्। कलयामि (i)…….. जगतः आयुः प्रमाणम्। सततं चक्रवत् परिवर्तमानः भूतं वर्तमानं भविष्यदपि च वीक्षमाणः अहमेव साक्षी जगतः उत्पत्तेः विकासस्य प्रलयस्य च। इदं जगत् तु पुनः (ii) ……जायते विलीयते च परमहं विद्यमानोऽस्य सर्व क्रियाकलापं पश्यामि। 'कृतयुगं त्रेतायुगं द्वापरयुगं कलियुगञ्चेति (iii) ………युगानि। चतुर्णां युगानां समूहः एव महायुगम्। एकसप्ततिमहायुगानाम् एक मन्वन्तरम्। चतुर्दशमन्वन्तराणां (iv)………कल्पः। एकः कल्प एव ब्रह्मणः एक दिनं मन्यते। ब्रह्मणः आयुः शतं वर्षाणि। अद्य कलियुगं तु द्विपञ्चाशत्तमं शतकं प्रविशिति । तदैव समारोहारम्भे कश्चन विद्वान् सङ्कल्पवाचनं करोति।अये! कथम् इमं सङ्कल्पं श्रुत्वा विस्मिताः यूयम् ?अयं तु वर्तमानकालदेशपरिचायकः। प्राचीनतमा हि एषा (v)……….। मम कलनस्य तु आधारः सूर्य एव । सूर्यस्य द्वे गती (vi) ………. दक्षिणायनञ्च । प्रत्येकम् अयनस्य अवधिः षण्मासाः । भारतीयमासानां नामानि नक्षत्रनामभिः सम्बद्धानि । पूर्णिमायां यत् नक्षत्रं भवति तेनैव नाम्ना तस्य (vii) ……. नाम भवति । यथा चैत्रे मासे पूर्णिमा चित्रानक्षत्रयुता भवति, अतः तस्य मासस्य नाम (viii) ……..भवति। षड् ऋतव एव मे नाभयः। द्वादशमासा एव अक्षत्वेन गण्यन्ते। चतुर्विंशतिः पक्षा एव पर्वाणि षष्ट्युत्तर-त्रिशतानि दिनानि एव अराणि ।

**मञ्जूषा**

| |
|---|
| चैत्र, उत्तरायणं, गणयामि, चत्वारि, गणना, मासस्य, समूहः, पुनः |

**उत्तरसंकेतः**

**कथायाः रिक्तस्थानपूर्तिः**

**1**

(i) शिवीनां (ii) आसीत् (iii) अन्येभ्यः (iv) दानशीलतां
(v) नेत्रम् (vi) शक्रः (vii) शैलानां (viii) सुखम्।

**2.**

(i) श्रुत्वा (ii) खनित्वा (iii) फूत्कारं (iv) कलशं (v) मित्रस्य (vi) मारयितुम् (vii) पतितात् (viii) विषधरः

**3.**

(i) बालवाहनयोग्यम् (ii) महानसम् (iii) वयम् (iv) मदोद्धताः
(v) मेषः (vi) मृताः (vii)वानराणाम् (viii) वानराः

**4.**

(i) नगरे (ii) चौरेण (iii) बालकान् (iv) श्रेयस्करम्
(v) उपदेशं (vi) स्वपत्नीं (vii) विषधरं (viii) विचित्रा

**5.**

(i) गणयामि (ii) पुनः (iii) चत्वारि (iv) समूहः
(v) उत्तरायणम् (vi) गणना (vii) मासस्य (viii) चैत्र

## आदर्श-प्रश्नपत्रम् - 1

## कक्षा-दशमी

## संस्कृतम् (सम्प्रेषणात्मकम्) (कोड-सङ्ख्या-119)

**समयः - 3 होराः** **पूर्णाङ्काः -80**

**सामान्यनिर्देशाः -**

1. प्रत्येकं भागम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।

**प्रश्नपत्रस्वरूपम्-**

**'क' भागः - अपठितावबोधनम् - 10 अङ्काः**
**'ख' भागः - रचनात्मककार्यम् - 15 अङ्काः**
**'ग' भागः - अनुप्रयुक्तव्याकरणम् - 25 अङ्काः**
**'घ' भागः - पठितावबोधनम् - 30 अङ्काः**

2. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
3. प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः।
4. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
5. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

**'क' भागः - अपठितावबोधनम् - 10 अङ्काः**

**1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत- 10**

विधात्रा निर्मिता इयं सृष्टिः अतीव सौन्दर्यमयी । प्रकृतेः शोभा वस्तुतः अतीव आह्लादकारी, परं निरन्तरं विकासशीलैः मानवैः विकासेन सह प्रदूषणमपि वर्धितं येनास्माकमेव स्वास्थ्यहानिः भवति। वायुप्रदूषणम्, ध्वनिप्रदूषणम्, जलप्रदूषणम् एतत् त्रिविधं प्रदूषणमेव मुख्यतया सर्वं वातावरणम् आकुलीकरोति। वायुप्रदूषणेन श्वासग्रहणे काठिन्यं वर्धते। एतत् सर्वेषां स्वास्थ्याय हानिकरं सिध्यति। ध्वनिप्रदूषणं मार्गेषु वाहनानां 'पों-पों' इति शृङ्गवादनेन, ध्वनिविस्तारकयन्त्रैश्चापि भवति। अनेन श्रवणशक्तेः हानिर्भवति। प्रदूषितजलोपयोगः तु सर्वेषां व्याधीनां मूलभूतमेव। तस्मादस्माकं सर्वेषामेव कर्त्तव्यमिदं यदत्रतत्रसर्वत्र अवकररहितस्य वातावरणस्य निर्माणं वयं कुर्याम, येन वायुप्रदूषणम् अस्माकं स्वास्थ्यं नाशयितुं सक्षमं न भवेत्। तथैव ध्वनिप्रदूषणं जलप्रदूषणञ्चापि रोद्धुम् वयं सर्वे मिलित्वैव प्रयासं कृत्वा- सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः इति भावनां बलं प्राप्नुयाम।

**I. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) 1x2=2**

(i) मुख्यतया प्रदूषणं कतिविधं भवति?
(ii) ध्वनिप्रदूषणेन कस्याः हानिः भवति?
(iii) सर्वैः मिलित्वा प्रदूषणावरोधाय किं विधेयम्?

**II. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) 2x2=4**

(i) अद्यत्वे अस्माकं स्वास्थ्यहानिः कथं भवति?
(ii) वयं मिलित्वा कां भावनां बलं प्राप्नुयाम?
(iii) केन निर्मिता इयं सृष्टिः अतीव सौन्दर्यमयी?

**III. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत। 1**

**IV. यथानिर्देशम् उत्तरत- (केवलं प्रश्नत्रयम्) 1x3=3**

(i) **'सततम्'** इति पदस्य समानार्थकं पदम् अनुच्छेदात् चित्वा लिखत।
अ) वर्धते ब) निरन्तरं स) काठिन्यं द) प्रयासं

(ii) **'अनेन श्रवणशक्तेः हानिर्भवति'** अस्मिन् वाक्ये क्रियापदं किम्?
अ) श्रवणशक्तेः ब) हानिर्भवति स) अनेन द) भवति

(iii) **'सौन्दर्यमयी सृष्टिः'** अत्र विशेषणपदं किम्?
अ) सृष्टिः ब) सौन्दर्यमयी स) निर्मिता द) अतीव

(iv) **'अनेन श्रवणशक्तेः हानिर्भवति'** अत्र 'भवति' क्रियापदस्य कर्तृपदं किम्?
अ) अनेन ब) श्रवणशक्तेः स) हानिः द) सृष्टिः

**'ख' भागः - रचनात्मककार्यम् - 15 अङ्काः**

2. **स्वदिनचर्यायाः विषये वर्णनम् कुर्वन्तः पितरं प्रति पत्रं लिखतु-** **(½×10= 5)**

छात्रावासतः

तिथिः---------

पूज्य पितृमहाभागाः

सादरं (1) ----------

अत्र कुशलं तत्रास्तु। भवतां निर्देशानुसारम् अहं समयानुसारम् सर्वं कार्यं (2) ----------। प्रातः पञ्चवादने उत्तिष्ठामि। दैनिककार्येभ्यः निवृत्तो(3)-------सार्धपञ्चवादने भ्रमणाय गच्छामि। ततः प्रत्यागत्य (4) --------- कृत्वा सप्तवादने विद्यालयं गच्छामि। द्विवादने (5)-------- प्रत्यागच्छामि। भोजनादि खादित्वा (6) --------- करोमि। चतुर्वादने उत्थाय गृहकार्यं करोमि। षड्वादनतः सप्तवादनपर्यन्तं क्रीडामि। ततः (7) ----------कृत्वा पठामि दशवादने च शयनाय गच्छामि। इयं मम (8) ---------- अस्ति। आशासे भवताम् (9) ---------- श्रेष्ठाङ्कैः उत्तीर्णः भविष्यामि। अनुजायाः अपि प्रणामाः स्वीकुर्वन्तु।

भवताम् पुत्रः

(10)-----------

**मंजूषा -**

| |
|---|
| प्रातराशं, आशीर्वादेन, करोमि, भूत्वा, प्रणामाः, विद्यालयात्, संजीवः, भोजनम्, दिनचर्या, शयनं, |

3. **प्रदत्तचित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चवाक्यानि संस्कृतेन लिखत-1X5=5**

**मञ्जूषा**

| |
|---|
| बालः, पश्यतः, वृक्षः, हरितः, पुष्पे, पादपाः, पत्राणि, पश्यन्ति, सूर्यः, हरीतिमा, खगाः, कुरुतः, |



**अथवा**

**मञ्जूषायां प्रदत्तशब्दानां सहायतया ग्रामीण-जीवनम् इति विषयम् अधिकृत्य पञ्चवाक्यानि संस्कृतेन लिखत।**

| |
|---|
| शिक्षिताः, जनाः सर्वसुविधासम्पन्नाः, क्षेत्राणि, सिञ्चति, अपि, विद्यालयः वैज्ञानिकविधिना, अस्ति, कुर्वन्ति, कृत्रिम, पठन्ति, हरीतिमा, सर्वत्र, प्रदूषणरहितम्। |

4. **मञ्जूषातः उचितपदानि चित्वा संवादपूर्तिः कुरुत -** **1x5=5**

**(द्वादश, अस्याम्, सूर्यस्य, विशालः अर्थात्)**

सविता - अहो भव्यः (i).............. देवालयः।

रवि: - अये ! किमयं देवालय: रथो वा।
सहस्रान्शु: - अयं तु कोणार्क: (ii) ............ रथ:।
प्रभा - कोणार्कस्य कोऽर्थ:।
सविता - अर्कस्य (iii) ..........सूर्यस्य कोण:। (iv).......... एव दिशि सूर्य: उदेति।
दिवाकर: - (गणयित्वा) अस्मिन् रथे तु (v) ........... चक्रं।

**अथवा**

**मञ्जूषात: उचितपदानि चित्वा कथां पूरयत -** **10x1/2=5**

**(कश्चन, च, नीचै:, यदा, सहसा, तदा, यदि, तर्हि, परम्, दूरे )**

एकस्मिन् वने (i) ................ व्याध: जालं विस्तीर्य (ii) ............ स्थित:। क्रमश: आकाशात् सपरिवार: कपोतराज: (iii) .............आगच्छत्। (iv) ................कपोता: तण्डुलान् अपश्यन् (v) ................ तेषां लोभो जात:। परं राजा सहमत: नासीत् ।तस्य युक्ति: आसीत् (vi) ….......... वने कोऽपि मनुष्य: नासीत्। (vii) ........... कुत: तण्डुलानाम् सम्भव:। (viii) .......... राज्ञ: उपदेशम् अस्वीकृत्य कपोता: तण्डुलान् खादितुम् प्रवृता: जाले (ix) ................ निपतिता:। अत: उक्तं (x) ............... विदधीत: न क्रियाम्।

**'ग' भाग: - अनुप्रयुक्तव्याकरणम् - 25 अङ्का:**

**5. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिविच्छेदं वा कृत्वा लिखत- 1x4=4 (केवलं प्रश्नचतुष्टयं)**

(i) सर्वदा **सत् + मार्गे** गच्छेत् ।
(ii) पापिनां च **सदैव** दु:खं भवति।
(iii) कृष्णं वन्दे **जगद्गुरुम्** ।
(iv) सर्वे आश्चर्यचकिता: **इतस्तत:** पश्यन्ति।
(v) **शरीरस्थो** महान् रिपु:।

**6. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्य: चित्वा लिखत। (केवलं प्रश्नचतुष्टयम्)** **1x4=4**

(i) **कुशलवौ** रामं प्रणमतः।
(क) कुशः च लवः च (ख) कुशः लवः च
(ग) कुश लव च (घ)कुशलवाः

(ii) नास्ति **त्यागेन समं** सुखम्।
(क) त्यागेन समं (ख) त्यागेसमं
(ग) त्यागसमं (घ) त्यागेसम

(iii) काक: **क्रोधेन सहितम्** प्रविशति।
(क) क्रोधसहितम् (ख) क्रोधेनसहितम्
(ग) सक्रोधम् (घ) सक्रोध:

(iv) **समयम् अनतिक्रम्य** सर्वेषां महत्त्वं विद्यते।
(क) यथासमयम (ख) यथासमय:
(ग)ससमयम् (घ)यथासमयम्

(v) अर्जुन: **उपकृष्णं** गछति l
(क) कृष्ण: समीपम् (ख) अर्जुनस्य समीपम्
(ग) कृष्णस्य समीपम् (घ) समीपं कृष्णम्

**7. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्य: चित्वा लिखत। (केवलं प्रश्नचतुष्टयम्)** **1x4=4**

(i) **स्थिरत्वं** लाघवं मृजा ।
(क) स्थिर + मतुप् (ख) स्थिर + टाप् (ग) स्थिर + त्व

(ii) **शिक्षिका** कक्षामध्ये पाठयति ।

(क) शिक्षिका + तल्　　　(ख) शिक्षिका + त्व　　　(ग) शिक्षक + टाप्

(iii) **देवी** सरस्वती माँ रक्षतु ।

(क) देव + ङीप्　　　(ख) देवी + ङीप्　　　(ग) देवि + ङीप्

(iv) मनसा सततं **स्मरणीयम्**।

(क) स्म + अनीयर्　　　(ख) स्मृ + अनीयर्　　　(ग) स्मृ + टाप्

(v) ननु **भगवान्** वाल्मीकिः।

(क) भग + वान्　　　(ख) भग + मतुप्　　　(ग) भग + टाप्

**8. वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत। 1x3=3 (केवलं प्रश्नत्रयम्)**

राधिका - सुधे! त्वं विद्यालयं केन यानेन गच्छसि ?

सुधा - राधिके! .................... विद्यालयबसयानेन विद्यालयं गम्यते।

राधिका - सुधे! कतिवादने गृहं प्रत्यागच्छसि ?

सुधा - मया एकवादने ................ प्रत्यागम्यते।

राधिका - किं सायं क्रीडायै ................. अपि गच्छसि ?

सुधा - आम्, मया सायं नित्यं क्रीडायै उपवनम् अपि ...................।

**मञ्जूषा -**

| उपवने, गृहम्, त्वया, गम्यते |
|---|

**9 कालबोधशब्दैः अधोलिखितं रिक्तस्थानानि पूरयत।- (केवलं प्रश्नत्रयम्) 1 x 3 = 3**

(i) विकासः प्रातः 9:30 __________वादने विद्यालयं गच्छति ।

(ii) सः नित्यं 7:15 ___________ वादने भ्रमणाय गच्छति ।

(iii) गौरवः प्रातः 8:00 _________ वादने पूजां करोति ।

(iv) देवदत्तः रात्रौ 9:45 ___________ वादने वार्ताः श्रृणोति ।

**10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत। 1 x 4= 4 (केवलं प्रश्नचतुष्टयम्)**

(i) अहं पश्यामि यद् वृद्धाः तु ................... चलन्ति।

(ii) सः .................. एव अत्र आगच्छत्।

(iii) धनात् विना .............. सुखम्।

(iv) ................... एकं विशालम् उपवनम् अस्ति।

(v) अवक्रता यथा चित्ते ......... वाचि भवेत्।

**मञ्जूषा -**

| शनैः, कुतः, ह्यः, तथा, अत्र |
|---|

**11. अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत। 1x3=3 (केवलं प्रश्नत्रयम्)**

(i) छात्रा: विद्यालयं **गच्छति**।

(क) गच्छतः　　(ख) गच्छसि　　(ग) गच्छथः　　(घ) गच्छन्ति

(ii) नीलकमलानि **सरोवरं** विकसन्ति।

(क) सरोवरः　　(ख) सरोवरे　　(ग) सरोवरात्　　(घ) सरोवरस्य

(iii) वयं श्वः प्रदर्शनीं **गच्छामः**।

(क) गच्छति　　(ख) गमिष्यामि　　(ग) गमिष्यथः　　(घ) गमिष्यामः

(iv) आनन्द: ह्य: न **<u>आगमिष्यति</u>** ।

(क) आगच्छत्  (ख) आगच्छति  (ग) आगच्छन्  (घ) गच्छति

**'घ' खण्डः  पठितावबोधनम्  30 अङ्काः**

**12. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत । 5**

अथ एकदा भगवान् बोधिसत्त्वः बहुजन्मार्जितपुण्यफलैः शिवीनां राजा अभवत्। स बाल्यात् एव वृद्धोपसेवी, विनयशीलः, शास्त्रपारङ्गतः च आसीत्। जनकल्याणकर्मसु रतः असौ पुत्रवत् प्रजाः पालयति स्म। कारुण्य-औदार्यादिसद्गुणोपेतः स नगरस्य समन्ततः धन-धान्यसमृद्धाः दानशालाः अकारयत्। तत्र अर्थिनां समूहः अन्न-पान-वसन-रजत- सुवर्णादिकानि अभीष्टानि वस्तूनि प्राप्य सन्तुष्टः अभवत् । राज्ञः दानशीलताम् आकर्ण्य देशान्तरेभ्योऽपि जनाः तं देशम् आयान्ति स्म।

**I. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) ½x2=1**

(i) क: शिवीनां राजा अभवत्?

(ii) असौ कथं प्रजाः पालयति स्म।?

(iii) भगवान् बोधिसत्त्व: कथं शिवीनां राजा अभवत् ?

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 1x2=2**

i) राज्ञ: काम् आकर्ण्य जनाः तं देशम् आयान्ति स्म ?

ii) बोधिसत्त्व: बाल्यात् एव कीदृश: आसीत् ?

iii) तस्य राज्ये याचका: किं लब्ध्वा संतुष्टा: अभवन् ?

**III. निर्देशानुसारम् उचितम् उत्तरं लिखत - (केवलं प्रश्नद्वयम्) 1x2=2**

(i) 'शास्त्रपारङ्गतः' इति पदं कस्य विशेषणम् अस्ति ?

(ii) 'शिवीनां राजा अभवत्।' इत्यत्र क्रियापदं किम् अस्ति?

(iii) ' अभवत् 'अस्य क्रियायाः कर्तृपदं किमस्ति ?

**13. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत । 5**

**शारदा शारदाम्भोजवदना वदनाम्बुजे।**
**सर्वदा सर्वदाऽस्माकं सन्निधिं सन्निधिं क्रियात्।**

**I. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) 1/2x2=1**

(i) कविः कस्या: प्रार्थनां करोति?

(ii) शारदा कुत्र वसेत्?

(iii) का सर्वदा अस्ति ?

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 1x2=2**

(i) कीदृशी सरस्वती अस्माकं सन्निधिं क्रियात्?

(ii) का अस्माकं सन्निधिं कुर्यात् ?

(iii) सर्वदा शारदा किं क्रियात् ?

**III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत - (केवलं प्रश्नद्वयम्) 1x2=2**

(i) 'शारदा' इति कर्तृपदस्य किं क्रियापदं पद्यांशे प्रयुक्तम्?

(ii) पद्यांशे 'सरस्वती' इति अर्थे किं पदं प्रयुक्तम्?

(iii) 'सर्वदा' इति पदस्य विशेष्यपदं किम् ?

**14. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत । 5**

पर्यटनाधिकारी- शोभनम्! उचितम् उक्तम् । हिमाद्रितुङ्गश्रिङ्गै: सुशोभिता सुर्योदयभूमि: इयम् । अत: अरुणाचल: । अस्मिन् प्रदेशे पञ्चाशदधिका: नद्य: प्रवहन्ति। विपुला च अत्र वनसम्पदा । वनौषधीनाम् तु अयं स्रोत एव। पुष्पाणां समृद्धि: सुगन्धि: च मनोहर:। सर्वत्र हरितिमा । शुद्धपर्यावरणेन युक्तस्य अस्य प्रदेशस्य केवलं: प्रकृति: एव न विविधा मनोहरा च प्रत्युत संस्कृति: अपि।

**I. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) ½x2=1**

(i) अरुणाचल: कासां तु स्रोत: एव ?

(ii) अत्र कति नद्य: वहन्ति ?

(iii) सूर्योदय: भूमि: क:?

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम् ) 1x2=2**

(i) इयं सूर्योदय: कै: सुशोभिता अस्ति?

(ii) अस्य प्रदेशस्य का -का विविधा मनोहरा ?

(iii) पञ्चाशदधिका: नद्य: कुत्र प्रवहन्ति ?

**III. निर्देशानुसारम् उचितम् उत्तरं लिखत - (केवलं प्रश्नद्वयम् ) 1x2=2**

(i) अनुच्छेदे 'सरिता: ' इति पदस्य क: पर्याय: अत्र प्रयुक्त: ?

(ii) अनुच्छेदे ' प्रवहन्ति ' इति क्रियाया: कर्तृपदं किम् ?

(iii) 'विपुला च अत्र वनसम्पदा' अत्र विशेषणपदं किम् ?

**15. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत। ( केवलं पञ्चप्रश्ना:) 1x5=5**

(i) **शारदा** सर्वदा अस्माकं समीपे वसेत्।

(ii) **नेपथ्ये** काकध्वनि: श्रूयते।

(iii) **विषयाणाम्** उपभोगेन तेषु आसक्ति जायते।

(iv) धैर्यम् **आपदां** तरणि।

(v) **साधूनां** चित्ते वाचि च सरलता भवति।

(vi) राजा पुत्रवत् **प्रजा:** पालयति स्म।

**16. मञ्जूषात: समुचितपदानि चित्वा अधोलिखितश्लोकस्य अन्वयं पूरयत। 1/2x4=2**

आचार्यात्पादमादत्ते पादं शिष्यः स्वमेधया।

कालेन पादमादत्ते पादं सब्रह्मचारिभिः ॥

अन्वय: -

i --------- आचार्यात् आदत्ते, पादं ii ----------- स्वमेधया। iii -------- पादमादत्ते पादं iv---------।

| सब्रह्मचारिभिः, पाद्म्, शिष्यः, कालेन |
|---|

**अथवा**

**मञ्जूषाया: साहाय्येन श्लोकस्यभावार्थे रिक्तस्थानानि पूरयित्वा पुन: लिखत।**

असंशयं महाबाहो ! मनो दुर्निग्रहं चलम्।

अभ्यासेन तु कौन्तेय ! वैराग्येण च गृह्यते ॥

भावार्थ :-

हे महाबाहो ! अत्र संशय: नास्ति यत् एतत् ( i ) .................. अतीव चञ्चलम् अस्ति। इदं (ii) .................... नियन्त्रितम् भवति परन्तु यदि वयं पुन: पुन: (iii)..................कुर्म: , विरक्ता च भवाम: तदा निश्चयेन एतत् वशीकर्तुं (iv)..............।

| बहुकष्टेन, अभ्यासम्, शक्नुम:, मन: |
|---|

**17. रेखाङ्कितानां पदानां प्रसङ्गानुकुलम् उचितार्थं चित्वा लिखत - (केवलं प्रश्नचतुष्टयम्) 1x4=4**

(i) राज्ञ: दानशीलताम् **आकर्ण्य** जना: तं देशम् आयान्ति स्म।

क) श्रुत्वा ख) मत्वा ग) प्राप्य

(ii) अभ्यासेन तु **कौन्तेय** वैराग्येण च गृह्यते।

क) भीम: ख) अर्जुन: ग) नकुल:

(iii) **सकलं** जगत् ध्वस्तं भविष्यति।

क) समस्तम् ख) ईश्वरीयम् ग) अर्थम्

(iv) स विवेक इति **ईरित:**।

क) दृष्ट: ख) कथित: ग) श्रुत:

(v) प्रश्नोत्तरमाध्यमेन भवतां **<u>जिज्ञासां</u>** शमयितुम् इच्छामि ।

क) गन्तुम् इच्छा     ख) ज्ञातुम् इच्छा     ग) गातुम् इच्छा

**18. मञ्जूषाया: सहायतया पाठाधारित कथापूर्तिं कुरुत -** **1/2x8=4**

कस्मिन्श्चित् नगरे चन्द्रो नाम (i)............ प्रतिवसति स्म। तस्य पुत्रा: वानरक्रीडारता: वानरयूथं नित्यमेव (ii)............भोज्यपदार्थै: पुष्टिं नयन्ति स्म। (iii).......... राजगृहे बालवाहनयोग्यं मेषयूथम् आसीत्। तेषां मेषाणां (iv).......... एको मेष: जिह्वालोलुपतया अहर्निशं महानसं (v)............ यत् पश्यति तद् भक्षयति। (vi)............. च सूपकारा: यत्किञ्चित् काष्ठं ,मृण्मयं भाजनं कांस्यताम्रपात्रं वा पश्यन्ति (vii)............ तम् आशु (viii)..................।

**मञ्जूषा -**

| |
|---|
| ताडयन्ति स्म, भूपति:, मध्ये, विविधै:, प्रविश्य, तस्मिन्, ते, तेन |

## आदर्श-प्रश्नपत्रम्- 2

**'क' भाग: - अपठितावबोधनम् - 10 अङ्का:**

**1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-**

जयदेवः वेदशास्त्रज्ञः सदाचारी वयोवृद्धः च आसीत्। तस्य पुत्रः धनेशः अस्ति। धनेशस्य सर्वाणि कार्याणि परिश्रमेण एव सिध्यन्ति। सफलता परिश्रमिणः पुरुषस्य चरणौ चुम्बति। विद्यार्थी परिश्रमेण ज्ञानं लभते, धनार्थी चापि परिश्रमेण एव धनं प्राप्नोति। शक्तेः प्राप्तये अपि परिश्रमः आवश्यकः। 'उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः' इति उक्तिः स्पष्टं यत् धनस्य देवी लक्ष्मीः उद्योगिनं पुरुषं प्रति गच्छति। अतएव साफल्यं लब्धुं परिश्रमम् अवश्यं करणीयम्। अत्यधिकः मेधावी अपि यदि सततं पठनाभ्यासं न करोति तदा असफलः भवति, परं सामान्यमेधासम्पन्न: अपि अध्ययनशीलः छात्रः सफलतायाः उच्चशिखरं प्राप्नोति-'उद्यमेनैव सिध्यन्ति कार्याणि न मनोरथैः'इति प्राचीनोक्तिः सदैव स्मरयति- कर्मसहचरी इच्छा एव साकाररूपताम् इति। श्रीमद्भगवद्गीता अपि कर्मणः महत्त्वं स्मारयति। अतएव छात्राः सर्वदा परिश्रमस्य अवलम्बनं कुर्वन्तु, भाग्यस्य शरणं मा गच्छन्तु।

**I. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम् )** **1x2=2**

(i) साफल्यं लब्धुं किं करणीयम्?

(ii) कः अपि असफलः भवति?

(iii) अध्ययनशीलः छात्रः किं प्राप्नोति?

**II. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम् )** **2x2=4**

(i) 'उद्यमेनैव सिध्यन्ति कार्याणि न मनोरथैः' इति उक्तिः किं स्मारयति?

(ii) धनस्य देवी कं प्रति गच्छति?

(iii) सर्वाणि कार्याणि केन सिध्यन्ति?

**III. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।** **1**

**IV. यथानिर्देशम् उत्तरत- (केवलं प्रश्नत्रयम् )** **1x3=3**

(i) **'परिश्रमस्य अवलम्बनं कुर्वन्तु'** इति वाक्ये किं क्रियापदम्?

(क) कुर्वन्तु     (ख) अवलम्बनं     (ग) कार्याणि     (घ) परिश्रमस्य

(ii) **'कुशाग्रबुद्धिः'** इत्यस्य समानार्थपदं गद्यांशात् चित्वा लिखत।

(क) देवी     (ख) उच्चशिखरं     (ग) परिश्रमः     (घ) मेधावी

(iii) **‘कर्मसहचरी इच्छा’** इत्यनयोः पदयोः किं विशेषणपदम्?

(क) कर्म (ख) अवलम्बनं (ग) इच्छा (घ) कर्मसहचरी

(iv) **‘उद्यमेनैव सिध्यन्ति कार्याणि न मनोरथैः’** अत्र कर्तृपदं किम्?

(क) सिध्यन्ति (ख) कार्याणि (ग) मनोरथैः (घ) उद्यमेनैव

**'ख' भागः - रचनात्मककार्यम् - 15 अङ्काः**

2. **भवतः अनुजः रमेशः पठनं त्यक्त्वा चलदूरभाषयन्त्रेण क्रीडने सर्वदा व्यस्तः भवति। तं पठनार्थं प्रेरयन् लिखितं पत्रं मञ्जूषायां प्रदत्तैः पदैः पूरयित्वा लिखत - (½×10 = 5)**

**मञ्जूषा -**

| |
|---|
| त्वम्, मानसिकरूपेण, पत्रम्, स्वास्थ्याय, अरुचिम्, रमेशः, अङ्काः, क्रीडने, उचितम्, परामर्शः |

परीक्षाभवनात्

दिनाङ्कः .........................

प्रिय (i) ............................।


शुभाशीषः।

ह्यः एव मातुः (ii) ......................... प्राप्तम्। माता अद्यत्वे पठने तव (iii) ......................... दृष्टवा चिन्तिता अस्ति। त्वं पठनं त्यक्त्वा चलदूरभाषयन्त्रेण (iv).....................रतः भवसि। अर्धवार्षिक-परीक्षायाम् अपि तव (v) ............................. न्यूनाः आगताः। एतद् तु न (vi) ...............। यद्यपि क्रीडनम् अपि (vii) .......................... आवश्यकं परं तत् शारीरिकं भवेत्। क्रीडनेन सह पठनम् अपि अत्यावश्यकम्। ये चलदूरभाषयन्त्रेण अत्यधिकं समयं वृथा यापयन्ति ते न केवलं (viii) ................ अस्वस्थाः भवन्ति अपितु जीवने असफलाः अपि। अतः मम (ix) ............... अस्ति यत् समयस्य महत्त्वम् अवगत्य (x) ...................... ध्यानेन पठ। मातृपितृचरणयोः मे प्रणामाः कथनीयाः।

तव अग्रजः ,

रोहितः

3. **चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चवाक्यानि संस्कृतेन लिखत- 1X5=5**



**मञ्जूषा –**

| |
|---|
| व्याधः, तण्डुलान्, प्रसार्य, जालम्, प्रासारयत्, वने, वृक्षाः कपोताः, मिलित्वा, आदाय, नभसि, उड्डीष, अन्यत्र, धावति, नष्टम् |

**अथवा**

**' विद्यालये दशमकक्षायाः दीक्षान्तसमारोहः' इति विषयम् अधिकृत्य मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत – 1x5=5**

**मञ्जूषा –**

| |
|---|
| अल्पाहारस्य, व्यवस्था, मस्तके, आशीर्वादः, सान्स्कृतिकः कार्यक्रमः, प्रधानाचार्येण, तिलकं, प्राङ्गणे, संस्कृताध्यापकेन, कृतम्, आयोजितः, छात्रेभ्यः |

**4. मञ्जूषातः उचितपदानि चित्वा कथां पूरयत - 10x1/2=5**

एकस्मिन् वने एकः विशालः (i) ............. आसीत्। तस्मिन् बहवः खगाः वसन्ति स्म। एकदा ते अतीव (ii) .......... आसन्। अतः भोजनं (iii)............. इतस्ततः भ्रमन्ति स्म। ते दूरं दूरं गच्छन्ति स्म। अन्ते च एकस्मिन् क्षेत्रे (iv) ........... अपश्यन्। ते तत्र गत्वा प्रसन्नतया तण्डुलान् खादन्ति स्म। परन्तु (v) ............ बद्धाः अभवन्। अधुना किं (vi) ............. इति चिन्तयित्वा ते सर्वे जालेन सह एव एकं (vii) ............ उपागच्छन्। तेषाम् मित्रं एकम् (viii) ........... आसीत्। सः जालं (ix) ......... अकर्तयत्। अन्ते सर्वे स्वतन्त्रः भूत्वा अनृत्यन् अगायन् च -सुखं तु (x) ........... एव विद्यते।

**मञ्जूषा –**

| |
|---|
| दन्तैः, करणीयम्, बुभुक्षिता, वृक्षः, खादितुम्, एकतायाम्, स्वमित्रम्, तण्डुलान्, मूषकः, जालेन |

**अथवा**

**मञ्जूषातः उचितपदानि चित्वा संवादपूर्तिः कुरुत - 1/2x10=5**

कृष्णः - त्वं कुत्र (i)..................?
राधा - अहं (ii) ................ गच्छामि।
कृष्णः - (iii) .............. पाठशालायाम् कति शिक्षकाः ?
राधा - मम पाठशालायाम् (iv) ............. शिक्षकाः।
कृष्णः - तव (v) .............. शिक्षिका न अस्ति ?
राधा - (vi) ............ शिक्षिका अस्ति।
कृष्णः - शिक्षकाणां (vii) ............... कीदृशः अस्ति ?
राधा - (viii) ......................।
कृष्णः - अहमपि तत्र (ix) ............ इच्छामि।
राधा - (x) ......................।

**मञ्जूषा-**

| |
|---|
| अवश्यमेव, आचारः, पाठशालाम्, एका, पञ्चदश, स्नेहशीलः, तव, अध्येतुम्, पाठशालायाम्, गच्छसि |

**ग- (अनुप्रयुक्त-व्याकरणम्) 25 अङ्काः**

**5. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिविच्छेदं वा कृत्वा लिखत- 1x4=4**
**(केवलं प्रश्नचतुष्टयं)**

(i) रामशब्दः **अच् +अन्तः** भवति।
(ii) हे प्रभो! मह्यं **सत्+मतिं** देहि।
(iii) संसारे **सदाचारस्य + एव** महत्त्वं वर्तते।
(iv) **शुष्कवृक्षाश्च** मूर्खाश्च न नमन्ति कदाचन।
(v) न **कुर्यादहितं** कर्म।

**6. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत।**
**(केवलं प्रश्नचतुष्टयम्) 1x4=4**

(i) सः **यथेच्छम्** फलानि खादति।
(क) इच्छाम् अनतिक्रम्य (ख) इच्छया सहितम् (ग) इच्छाभिः समम्
(ii) **अविवेकः** परमापदां पदम्।
(क) न विवेकः (ख) अ विवेकः (ग) नवि वेकः

(iii) **गुरो: उपदेश:** शिष्यस्य कल्याणाय भवति।

(क) गुरोपदेश (ख) गुरूपदेश : (ग) गुरो उपदेश

(iv) सिद्धार्थ: विहाराय **प्रतिदिनं** वनम् अगच्छत्।

(क) दिनं दिनं (ख) दिनं दिनं प्रति (ग) प्रति प्रति दिनं

(v) **रामलक्ष्मणौ** भ्रातरौ स्तः।

(क) रामः च लक्ष्मणः च (ख) रामौ च लक्ष्मणः च (ग) रामौ च लक्ष्मणौ च

7. **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्य: चित्वा लिखत। (केवलं प्रश्नचतुष्टयम्) 1x4=4**

(i) सत्यभाषणस्य **महत् + त्व** क: न जानाति ?

(क) महत्व (ख) महताम् (ग) महत्त्वम्

(ii) लङ्कापति: रावण: अति **शक्ति + मतुप्** मान्यते।

(क) शक्तिमतु (ख) शक्तिमान् (ग) शक्तिवान:

(iii) उपवनस्य दृश्यं **रमणीयम्** अस्ति।

(क) रमणीय + त्व (ख) रम् + तल् (ग) रम् + अनीयर्

(iv) सा समाजस्य **सेविका** अपि अस्ति।

(क) सेवक + टाप् (ख) सेविक +टाप् (ग) सेवक +तल्

(v) अद्य मम **वार्षिकी** परीक्षा अस्ति।

(क) वर्ष +इक (ख) वर्ष +ई (ग) वर्ष +ठक्

8. **वाच्यानुसारम् उचितपदै: रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुन: लिखत। 1x3=3 (केवलं प्रश्नत्रयम्)**

नयना- सुमेश! त्वं किं पठसि ?

सुमेश: - अधुना तु ............... मणिकापुस्तकम् पठ्यते।

नयन- शोभनम्! किं त्वं श्लोकान् अपि ................।

सुमेश: - आम् मया ............... अपि पठ्यन्ते।

नयना - ............... तु अद्य नाटकं दृश्यते।

सुमेश: - शोभनम्!

**मञ्जूषा**

| |
|---|
| पठसि , मया ,श्लोका: ,मया |

9. **समुचितं कालबोधशब्दं लिखत - (केवलं प्रश्नत्रयम्) 1x3=3**

(i) अहं प्रतिदिनं प्रात: ............... (5:00) वादने उत्तिष्ठामि।

(ii) प्रात: ...............(11:15) वादने संस्कृतश्लोकोच्चारण प्रतियोगिता।

(iii) ऋत्विक: ..............(2:45) वादने विद्यालयात् आगच्छति।

(iv) अहं ...................(4:30) मित्रै: सह क्रीडामि।

10. **मञ्जूषायां प्रदत्तै: उचितै: अव्ययपदै: अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत। (केवलं प्रश्नचतुष्टयम्) 1x4=4**

(i) भवान् ............... भ्रमित्वा समयं व्यर्थं मा कुरुत।

(ii) ........... अहं परीक्षायां सर्वोच्चं स्थानं प्राप्स्यामि।

(iii) अद्य शनिवासर: ................ रविवासर: भविष्यति।

(iv) वर्षायां भ्रमणाय गृहात् ................ मा गच्छ।

(v) वृद्ध: जन: .............. चलति।

**मञ्जूषा –**

11. अधोलिखितवाक्येषु | शनैः, नूनम्, बहिः, श्वः, इतस्ततः | रेखाङ्कित-अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत। 1x3=3 (केवलं प्रश्नत्रयम्)

(i) विद्वान् सर्वत्र **पूज्यन्ते**।

(अ) पूज्यते (ब) पूज्येते (स) पूज्ये (द) पूजय

(ii) ते दशरथस्य **पुत्राणि** सन्ति।

(अ) पुत्रान् (ब) पुत्रः (स) पुत्राः (द) पुत्रम्

(iii) अहम् अध्ययनशीलः **असि**।

(अ) अस्ति (ब) अस्मि (स) स्तः (द) सन्ति

(iv) ते **बालिकाः** कुत्र गमिष्यतः ?

(अ) बालिका (ब) बालिके (स) बालकाः (द) बालिकः

**'घ' खण्डः पठितावबोधनम् 30 अङ्काः**

12. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत। 5

नाहं स्वर्गं न मोक्षं वा कामये किन्तु आर्त्तानां परित्राणाय एव मे निश्चयः। अस्य याच्ञा वृथा मा अस्तु इत्युक्त्वा स राजा वैद्योक्तविधिना नीलोत्पलम् इव एकं चक्षुः शनैः अक्षतम् उत्पाट्य प्रीत्या याचकाय समर्पितवान्। सः अपि तत् नेत्रं यथास्थानम् अस्थापयत्। ततो महीपालः द्वितीयं नेत्रमपि शनैः निष्कास्य तस्मै अयच्छत्। अथ विस्मितः शक्रः अचिन्तयत्- "अहो धृतिः! अहो सत्त्वम्! अहो सत्त्वहितैषिता:!"

I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) ½x2=1

(i) का वृथा मा अस्तु ?

(ii) याचकः नेत्रं कुत्र अस्थापयत् ?

(iii) आर्त्तानां परित्राणाय कस्य निश्चयः?

II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 1x2=2

(i) राजा स्वं एकं चक्षुः कथं याचकाय समर्पितवान् ?

(ii) विस्मितः शक्रः किम् अचिन्तयत् ?

(iii) कस्य याच्ञा वृथा मा अस्तु ?

III. निर्देशानुसारम् उचितम् उत्तरं लिखत - (केवलं प्रश्नद्वयम्) 1x2=2

(i) **'कामये '** इति क्रियायाः कर्तृपदं किम् ?

(ii) **'चक्षुः'** इति पदस्य किं विशेषणं प्रयुक्तम् ?

(iii) **'अचिन्तयत्'** इति क्रियापदस्य कर्तृपदं किम् ?

13. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत। 5

**चञ्चलं हि मनः कृष्णः प्रमाथि बलवद्दृढम्।**
**तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्॥**

I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) ½x2=1

(i) किं चञ्चलम् अस्ति ?

(ii) मनसः निग्रहः कस्य इव सुदुष्करः ?

(iii) कस्य निग्रहः अर्जुनः वायोरिव सुदुष्करम् मन्यते ?

II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 1x2=2

(i) अस्मिन् श्लोके कः कं सम्बोधयति ?

(ii) मनः कथं प्रमाथि ?

(iii) मनः कीदृशम् अस्ति ?

III. निर्देशानुसारम् उचितम् उत्तरं लिखत - (केवलं प्रश्नद्वयम्) 1x2=2

(i) श्लोके **'मन:'** शब्दस्य कृते विशेषणपदं किं प्रयुक्तम् ?

(ii) श्लोके द्वितीये पङ्क्तौ कर्तृपदं किम् ?

(iii) **'तस्याहं निग्रहं मन्ये'** अत्र क्रियापदं किम्?

**14. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत। 5**

राजहंसः - अये! किन्तु खलु सरस्तीरे विहरति मयि केनापि कर्कशै: 'का का' शब्दै: वातावरणम् आकुली क्रियते ?

राजहंसी - भर्त:! काकात् अन्य: को भवितुमर्हति ? अस्य वर्ण: अपि कृष्ण:, कर्म अपि कृष्णम्। मेध्यम् अमेध्यं सर्वमेव भक्षयति। कर्णकटुशब्दै: .....

काक: - (प्रविश्य, सक्रोधम् ) आ:! किम् उक्तवती भवती? यदि अहं कृष्णवर्ण: तर्हि श्रीरामस्य वर्ण: कीदृश:? श्रीवासुदेवस्य वर्ण: कीदृश:? मुग्धे! अहं तु अतीव कर्त्तव्यपरायण:। प्रभाते 'का का' ध्वनिना सुप्तान् प्रबोधयामि कर्मसु विनियोजयामि।

**I. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम् ) ½x2=1**

(i) कस्य कर्कशध्वनिना वातावरणं आकुली क्रियते ?

(ii) श्रीरामस्य वर्ण: कीदृश: ?

(iii) क: कर्त्तव्यपरायण: अस्ति ?

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम् ) 1x2=2**

(i) प्रभाते क: कान् प्रबोधयति ?

(ii) काक: किं भक्षयति ?

(iii) सरस्तीरे कौ विहरत: स्म ?

**III. निर्देशानुसारम् उचितम् उत्तरं लिखत - (केवलं प्रश्नद्वयम् ) 1x2=2**

(i) **'अहं तु अतीव कर्त्तव्यपरायण:'** इति वाक्ये विशेष्यपदं किम् ?

(ii) **'उक्तवती'** इति क्रियापदस्य कर्तृपदं किम् ?

(iii) **'मेध्यं'** इति पदस्य विलोमपदं नाटकांशात् चित्वा लिखत।

**15. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत। 1x5=5**

(i) पाठकस्य **षट्** गुणा: सन्ति।

(ii) राजा **याचकेभ्य:** दानं ददाति स्म।

(iii) सूपकारेण मेष: **अर्धज्वलितकाष्ठेन** ताडित:।

(iv) कामस्य नाशाय **इन्द्रियाणि** वशे करणीयानि।

(v) **अस्मिन् संसारे** कश्चिदपि त्वया सदृश: नास्ति।

(vi) प्रच्छन्नभाग्यस्य गृहं **मणीनाम्** आभया भासमानम् अभवत्।

**16. मञ्जूषात: समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयित्वा पुन: लिखत- 1/2x4=2**

चञ्चलं हि मन: कृष्ण: प्रमाथि बलवद् दृढम्।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्॥

अन्वय : -

कृष्ण! मन: हि ................ (i) बलवद् दृढम् .................... (ii)। अहं तस्य निग्रहं ................(iii) इव दुष्करं ...............(iv)।

**मञ्जूषा –**

| मन्ये , प्रमाथि , चञ्चलम् , वायो: |
|---|

**अथवा**

**मञ्जूषाया: साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुन: लिखत-**

त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत् ।
परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वम् विमूढधीः॥

भावार्थः -

अस्य भावः अस्ति यत् यः मूर्खबुद्धिः जनः ..............(i) कर्मबोधकारिणी ................(ii) त्यक्त्वा कठोरां वाणीं वदति सः ............(iii) फलं परित्यज्य ............ (iv) फलं भक्षयति।

**मञ्जूषा –**

| |
|---|
| पक्वं , अपक्वम् , वाचं , धर्मप्रदायिनीं |

**17. रेखाङ्कितानां पदानां प्रसङ्गानुकुलम् उचितार्थं चित्वा लिखत - (केवलं प्रश्नचतुष्टयम्) 1x4=4**

(i) आचार्यात् **पादम्** आदत्ते।

क) श्लोकस्य पङ्क्तिम् ख) चरणम् ग) चतुर्थांशम्

(ii) **माधुर्यम्** अक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः।

क) शर्करायुक्तम् ख) कोमलतया वर्णोच्चारणम् ग) मधुरतायाः अभावः

(iii) तदैव **आहुः** महात्मानः समत्वमिति तथ्यतः।

क) कथयन्ति ख) शृण्वन्ति ग) चिन्तयन्ति

(iv) विषादं त्यक्त्वा **उद्यमः** क्रियताम्।

क) प्रयत्नः ख) प्रयोगः ग) परिश्रमः

(v) द्वादश **समाः** पर्जन्यः तद् राष्ट्रं नाभिवर्षति।

क) वर्षाणि ख) मासाः ग) दिनानि

**18. मञ्जूषायाः सहायतया पाठाधारित कथापूर्तिं कुरुत - 1/2x8=4**

एकदा बोधिसत्त्वः बहुजन्मार्जितपुण्यफलैः ..............(i) राजा अभवत्। सः नगरस्य समन्ततः धनधान्यसमृद्धाः .................. (ii) अकारयत्। राज्ञः दानशीलताम् आकर्ण्य देशान्तरेभ्योऽपि ............... (iii) तं देशम् आयान्ति स्म। तस्य दानशीलताम् परीक्षितुं शक्रः ..................... (iv) रूपं धारयित्वा आगच्छत्। राज्ञः नेत्रदानार्थं निश्चयं ज्ञात्वा मन्त्रिणः ............(v) अभवन्। राजा वैद्योक्तविधिना स्वचक्षुः ..............(vi) समर्पितवान्। देवराजः शक्रः तस्य ...................(vii) प्राशंसत्। शक्रस्य प्रभावेण आत्मनः ................ (viii) च राजा पुनः द्रष्टुं समर्थः अभवत्।

**मञ्जूषा-**

| |
|---|
| त्यागवृत्तिम्, दानशालाः, विषण्णाः, सत्यपुण्यबलेन, जनाः, याचकाय, शिवीनां, नेत्रहीनयाचकस्य |

## अङ्कयोजना उत्तरसङ्केताश्च
## आदर्श-प्रश्नपत्रम्-1
## कक्षा-दशमी
## संस्कृतम् (सम्प्रेषणात्मकम्) (कोड-सङ्ख्या-119)

**समयः - 3 होराः** **पूर्णाङ्काः -80**

**'क' भागः - अपठितावबोधनम् - 10 अङ्काः**

**1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत- 10**

**I. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) 1x2=2**

(i) त्रिविधं (ii) श्रवणशक्तेः (iii) प्रयासं

**II. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) 2x2=4**

(i) विकासशीलैः मानवैः विकासेन सह प्रदूषणमपि वर्धितं येनास्माकमेव स्वास्थ्यहानिः भवति।

(ii) वयं सर्वे मिलित्वैव प्रयासं कृत्वा- सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः इति भावनां बलं प्राप्नुयाम।

(iii) विधात्रा निर्मिता इयं सृष्टिः अतीव सौन्दर्यमयी।

**III.** शीर्षकं- प्रदूषणम् **1**

**IV.** **यथानिर्देशम् उत्तरत- (केवलं प्रश्नत्रयम्)** **1x3=3**

(i) ब) निरन्तरं (ii) द) भवति (iii) ब) सौन्दर्यमयी (iv) स) हानिः

**'ख' भागः - रचनात्मककार्यम् - 15 अङ्काः**

**2.** **स्वदिनचर्यायाः विषये वर्णनम् कुर्वन्तः पितरं प्रति पत्रं लिखतु-** **½×10 = 5**

(i) प्रणामाः (ii) करोमि (iii) भूत्वा
(iv) प्रातराशं (v) विद्यालयात् (vi) शयनं
(vii) भोजनम् (viii) दिनचर्या (ix) आशीर्वादेन
(x) संजीवः

**3.** **मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चवाक्यानि संस्कृतेन लिखत-** **1X5=5**

छात्रः स्वविवेकानुसारम् उत्तरं लिखेत्।

**अथवा**

**मञ्जूषायां प्रदत्तशब्दानां सहायतया ग्रामीण-जीवनम् इति विषयम् अधिकृत्य पञ्चवाक्यानि संस्कृतेन लिखत।**

छात्रः स्वविवेकानुसारम् उत्तरं लिखेत्।

**4.** **मञ्जूषातः उचितपदानि चित्वा संवादपूर्तिः कुरुत -** **1x5=5**

(i) विशालः (ii) सूर्यस्य (iii) अर्थात् (iv) अस्याम् (v) द्वादश

**अथवा**

**मञ्जूषातः उचितपदानि चित्वा कथां पूरयत -** **10x1/2=5**

(i) कश्चन (ii) दूरे (iii) नीचैः (iv) यदा (v) तदा
(vi) यदि (vii) तर्हि (viii) परम् (ix) च (x) सहसा

**'ग' भागः - अनुप्रयुक्तव्याकरणम् - 25 अङ्काः**

**5.** **अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिविच्छेदं वा कृत्वा लिखत- (केवलं प्रश्नचतुष्टयं)** **1x4=4**

(i) सन्मार्ग (ii) सदा + एव (iii) जगत् +गुरुम्
(iv) इतः + ततः (v) शरीरस्थ : + महान्

**6.** **अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत- (केवलं प्रश्नचतुष्टयं)** **1x4=4**

(i) कुशः च लवः च (ii) त्यागसमं (iii) सक्रोधम्
(iv) यथासमयम् (v) कृष्णस्य समीपम्

**7.** **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत। (केवलं प्रश्नचतुष्टयम्)** **1x4=4**

(i) स्थिर + त्व (ii) शिक्षक + टाप् (iii) देव + ङीप्
(iv) स्मृ + अनीयर् (v) भग + मतुप्

**8.** **वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत। 1x3=3 (केवलं प्रश्नत्रयम्)**

(i) मया (ii) गृहम् (iii) उपवनम् (iv) गम्यते

**9** **कालबोधशब्दैः अधोलिखितं रिक्तस्थानानि पूरयत।- (केवलं प्रश्नत्रयम्)** **1x3 =3**

(i) सार्ध नव (ii) सपाद सप्त (iii) अष्ट (iv) पादोन दश

**10.** **मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत।(केवलं**

प्रश्नचतुष्टयम्) 1x4=4

(i) शनैः (ii) ह्यः (iii) कुतः (iv) अत्र (v) तथा

11. अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत। (केवलं प्रश्नत्रयम्) 1x3=3

(i) गच्छन्ति (ii) सरोवरे (iii) गमिष्यामः (iv) आगच्छत्

**'घ' खण्डः पठितावबोधनम् 30 अङ्काः**

12. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत। 5

I. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) ½x2=1

(i) बोधिसत्त्वः (ii) पुत्रवत् (iii) बहुजन्मार्जितपुण्यफलैः

II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 1x2=2

(i) राज्ञः दानशीलताम् आकर्ण्य देशान्तरेभ्योऽपि जनाः तं देशम् आयान्ति स्म।

(ii) स बाल्यात् एव वृद्धोपसेवी, विनयशीलः, शास्त्रपारङ्गतः च आसीत्।

(iii) तत्र अर्थिनां समूहः अन्न-पान-वसन-रजत- सुवर्णादिकानि अभीष्टानि वस्तूनि प्राप्य सन्तुष्टः अभवत्।

III. निर्देशानुसारम् उचितम् उत्तरं लिखत - (केवलं प्रश्नद्वयम्) 1x2=2

(i) सः (ii) अभवत् (iii) बोधिसत्त्वः/राजा

13. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत। 5

I. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) ½x2=1

(i) शारदायाः (ii) वदनाम्बुजे (iii) शारदा

II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 1x2=2

(i) शारदाम्भोजवदना सरस्वती अस्माकं सन्निधिं क्रियात्।

(ii) शारदा अस्माकं सन्निधिं कुर्यात्।

(iii) सर्वदा शारदा अस्माकं सन्निधिं कुर्यात्।

III. निर्देशानुसारम् उचितम् उत्तरं लिखत - (केवलं प्रश्नद्वयम्) 1x2=2

(i) क्रियात् (ii) शारदा (iii) शारदा

14. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत। 5

I. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) ½x2=1

(i) वनौषधीनाम् (ii) पञ्चाशदधिका : (iii) अरुणाचलः

II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 1x2=2

(i) इयं सूर्योदयः हिमाद्रितुङ्गश्रिङ्गै : सुशोभिता अस्ति।

(ii) अस्य प्रदेशस्य केवलः प्रकृतिः एव न विविधा मनोहरा च प्रत्युत संस्कृतिः अपि।

(iii) अरुणाचलप्रदेशे पञ्चाशदधिका : नद्यः प्रवहन्ति।

III. निर्देशानुसारम् उचितम् उत्तरं लिखत - (केवलं प्रश्नद्वयम्) 1x2=2

(i) नद्यः (ii) नद्यः (iii) विपुला

15. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत। (केवलं पञ्चप्रश्नाः) 1x5=5

(i) **का** सर्वदा अस्माकं समीपे वसेत्। (ii) **कुत्र** काकध्वनिः श्रूयते।

(iii) **केषाम्** उपभोगेन तेषु आसक्ति जायते (iv) धैर्यम् **कासां** तरणि।

(v) **केषाम्** चित्ते वाचि च सरलता भवति। (vi) राजा पुत्रवत् **का:** पालयति स्म।

16. मञ्जूषातः समुचितपदानि चित्वा अधोलिखितश्लोकस्य अन्वयं पूरयत। 1/2x4=2

(i) शिष्यः (ii) पादम् (iii) कालेन (iv) सब्रह्मचारिभिः

**अथवा**

मञ्जूषायाः साहाय्येन श्लोकस्यभावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत।

(i) मन:		(ii) बहुकष्टेन		(iii) अभ्यासम्		(iv) शक्नुम:

17. रेखाङ्कितानां पदानां प्रसङ्गानुकुलम् उचितार्थं चित्वा लिखत - (केवलं प्रश्नचतुष्टयम्) 1x4=4

(i) श्रुत्वा	(ii) अर्जुन:	(iii) समस्तम्	(iv) कथित:	(v) ज्ञातुम् इच्छा

18. मञ्जूषाया: सहायतया पाठाधारित कथापूर्तिं कुरुत - 1/2x8=4

(i) भूपति:	(ii) विविधै:	(iii) तस्मिन्	(iv) मध्ये
(v) प्रविश्य	(vi) ते	(vii) तेन	(viii) ताडयन्ति स्म

## अङ्कयोजना उत्तरसङ्केताश्च
## आदर्श-प्रश्नपत्रम्-2

### 'क' भाग: - अपठितावबोधनम् - 10 अङ्का:

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत- 10

I. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) 1x2=2

(i) परिश्रमम्	(ii) मेधावी	(iii) सफलतायाः उच्चशिखरं

II. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) 2x2=4

(i) 'उद्यमेनैव सिध्यन्ति कार्याणि न मनोरथैः' इति प्राचीनोक्तिः सदैव स्मरयति- कर्मसहचरी इच्छा एव साकाररूपताम् इति
(ii) धनस्य देवी लक्ष्मीः उद्योगिनं पुरुषं प्रति गच्छति।
(iii) सर्वाणि कार्याणि उद्यमेन सिध्यन्ति।

III. शीर्षकं- परिश्रमस्य महत्त्वं

IV. यथानिर्देशम् उत्तरत- (केवलं प्रश्नत्रयम्) 1x3=3

(i) (क) कुर्वन्तु	(ii) (घ) मेधावी	(iii) (घ) कर्मसहचरी	(iv) (ख) कार्याणि

### 'ख' भाग: - रचनात्मककार्यम् - 15 अङ्का:

2. भवत: अनुज: रमेश: पठनं त्यक्त्वा चलदूरभाषयन्त्रेण क्रीडने सर्वदा व्यस्त: भवति। तं पठनार्थं प्रेरयन् लिखितं पत्रं मञ्जूषायां प्रदत्तै: पदै: पूरयित्वा लिखत - ½×10 = 5

(i) रमेश:	(ii) पत्रम्	(iii) अरुचिम्	(iv) क्रीडने	(v) अङ्का :
(vi) उचितम्	(vii) स्वास्थ्याय	(viii) मानसिकरूपेण	(ix) परामर्श :	(x) त्वम्

3. मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चवाक्यानि संस्कृतेन लिखत- 1X5=5

छात्र: स्वविवेकानुसारम् उत्तरं लिखत।

**अथवा**

'विद्यालये दशमकक्षाया: दीक्षान्तसमारोह:' इति विषयम् अधिकृत्य मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत – 1x5=5

छात्र: स्वविवेकानुसारम् उत्तरं लिखत।

4. मञ्जूषात: उचितपदानि चित्वा कथां पूरयत - 10x1/2=5

(i) वृक्ष:	(ii) बुभुक्षिता:	(iii) खादितुम्	(iv) तण्डुलान्	(v) जालेन
(vi) करणीयम्	(vii) स्वमित्रम्	(viii) मूषक:	(ix) दन्तै :	(x) एकतायाम्

**अथवा**

मञ्जूषात: उचितपदानि चित्वा संवादपूर्ति: कुरुत - 1/2x10=5

(i) गच्छसि	(ii) पाठशालाम्	(iii) तव	(iv) पञ्चदश	(v) पाठशालायाम्
(vi) एका	(vii) आचार:	(viii) स्नेहशील:	(ix)अध्येतुम्	(x)अवश्यमेव

### 'ग' भाग: - अनुप्रयुक्तव्याकरणम् - 25 अङ्का:

5. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिविच्छेदं वा कृत्वा लिखत- 1x4=4

(i) अजन्त:	(ii) सन्मतिम्	(iii) सदाचारस्यैव	(iv) शुष्कवृक्षा: + च	(v) कुर्यात् +अहितं

6. रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत- 1x4=4

(i) इच्छाम् अनतिक्रम्य (ii) न विवेक: (iii) गुरूपदेश :

(iv) दिनं दिनं प्रति (v) रामः च लक्ष्मणः च

7. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत। 1x4=4

(i) महत्त्वम् (ii) शक्तिमान् (iii) रम् + अनीयर्

(iv) सेवक + टाप् (v) वर्ष +ठक्

8. वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत। 1x3=3

(i) मया (ii) पठसि (iii) श्लोका: (iv) मया

9 कालबोधशब्दैः अधोलिखितं रिक्तस्थानानि पूरयत।- 1x3 =3

i) पञ्च ii) सपाद एकादश iii) पादोनत्रि iv) सार्धचतुर्वादने

10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत। 1x4=4

i) इतस्ततः ii) नूनम् iii) श्वः iv) बहि: v) शनैः

11. रेखाङ्कित-अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत। 1x3=3

i) पूज्यते ii) पुत्राः iii) अस्मि iv) बालिके

**'घ' खण्डः**

**पठितावबोधनम् 30 अङ्काः**

12. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत। 5

I. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) ½x2=1

i) याच्ञा ii) यथास्थानम् iii) मे/ राज्ञ:

II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 1x2=2

i) राजा वैद्योक्तविधिना नीलोत्पलम् इव एकं चक्षु: शनै: अक्षतम् उत्पाट्य प्रीत्या याचकाय समर्पितवान्।

ii) विस्मित: शक्र: अचिन्तयत् -"अहो धृति:! अहो सत्त्वम्! अहो सत्त्वहितैषिता:!"

iii) याचकस्य याच्ञा वृथा मा अस्तु।

III. निर्देशानुसारम् उचितम् उत्तरं लिखत - (केवलं प्रश्नद्वयम्) 1x2=2

i) अहं ii) एकं iii) शक्र:

13. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत। 5

I. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) ½x2=1

i) मन: ii) वायो: iii) मनस:

II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 1x2=2

i) अस्मिन् श्लोके अर्जुन: श्रीकृष्णं सम्बोधयति।

ii) मन: बलवद्दृढम् प्रमाथि।

iii) मन: चञ्चलम् अस्ति।

III. निर्देशानुसारम् उचितम् उत्तरं लिखत - (केवलं प्रश्नद्वयम्) 1x2=2

i) चञ्चलम् ii) अहं iii) मन्ये

14. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत। 5

I. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) ½x2=1

i) काकस्य ii) कृष्ण: iii) काक:

II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 1x2=2

i) प्रभाते काक: सुप्तान् जनान् प्रबोधयति।

ii) काक: मेध्यम् अमेध्यं सर्वमेव भक्षयति।

iii) सरस्तीरे राजहन्स : राजहन्सी च विहरत: स्म ।

**III. निर्देशानुसारम् उचितम् उत्तरं लिखत - (केवलं प्रश्नद्वयम् )** **1x2=2**

I) कर्तव्यपरायण: ii) भवती iii) अमेध्यं

**15. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत । ( केवलं पञ्चप्रश्ना:)** **1x5=5**

(i) कति (ii) केभ्य: (iii) केन (iv) कानि

(v) कुत्र (vi) केषाम्

**16. मञ्जूषात: समुचितपदानि चित्वा अधोलिखितश्लोकस्य अन्वयं पूरयत ।** **1/2x4=2**

(i) चञ्चलम् (ii) प्रमाथि (iii) वायो: (iv) मन्ये

**अथवा**

**मञ्जूषाया: साहाय्येन श्लोकस्यभावार्थे रिक्तस्थानानि पूरयित्वा पुन: लिखत ।**

i) धर्मप्रदायिनीं ii) वाचं iii) पक्वं iv) अपक्वम्

**17. रेखाङ्कितानां पदानां प्रसङ्गानुकुलम् उचितार्थं चित्वा लिखत -** **1x4=4**

i) चरणम् ii) कोमलतया वर्णोच्चारणम् iii) कथयन्ति iv) परिश्रम: v) मासा:

**18. मञ्जूषाया: सहायतया पाठाधारित कथापूर्तिं कुरुत -** **1/2x8=4**

i) शिवीनां ii) दानशाला: iii) जना: iv) नेत्रहीनयाचकस्य

v) विषण्णा: vi) याचकाय vii) त्यागवृत्तिम् viii) सत्यपुण्यबलेन